॥ श्रीः ॥

BHĀRAVI'S

KIRĀTĀRJUNĪYA

CANTO II

[Edited with an Introduction, Mallinatha's Commentary and extracts from other Commentaries, Prose-order, Bengali and English Translations, Explanations, Notes, Questions and Answers, Appendices, etc.]

BY

Prof. Ashokanath Shastri,

Vedantatirtha, M. A. (Gold Medalist) Premchand Roychand Scholar, Mouat Medalist, Eshan Scholar, Some-time Lecturer in Sanskrit and Bengali—Ashutosh, Hooghli and Presidency Colleges, Lecturer and Examiner in Sanskrit, Calcutta University

&

Prof. Sarojendra Nath Bhanja,

M. A., Kavya-Puranatirtha, Sahityasastri,

Senior Professor of Sanskrit, Maharaja Manindra Chandra College, Calcutta, and Examiner in Sanskrit, Calcutta University.



MODERN BOOK AGENCY

10, College Square, Calcutta

1947

Published by
D. C. Basu, Vāṇīvinoda,
10, College Square, Calcutta

PUBLISHERS' NOTE

Prof. Sarojendranath Bhanja very kindly undertook to prepare this new edition of the Kirāta, Canto II under the directions of Pandit Ashokanath Shastri, who subsequently revised the whole work thoroughly. We are thankful to both of them for their labour.

10, College Square,
Calcutta.
Dola Pūrṇimā,
1353 B. S.

MODERN BOOK AGENCY

Printed by
Ajit Kumar Bose, Bhāratībhūṣaṇa,
SAKTI PRESS
27/3B, Hari Ghosh Street,
Calcutta.

॥ श्रीः ॥

"चतुर्मुखमुखाम्भोजवनहंसवधूर्मम । मानसे रमतां नित्यं सर्वशुक्ला सरस्वती" ॥

"वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्" ॥

INTRODUCTION

The present work Kirātārjunīya is a Literary Epic which has drawn its materials broadly from the Śivapurāṇa and the Mahābhārata (Vanaparvan), though in the major part of the work (containing eighteen Cantos), Bhāravi, the great poet, has displayed his imaginative insight and inventive genius to make it a full-fledged Literary Epic. The episode of the Pāṇḍavas dwelling in the Dvaita forest during the term of their exile and the fight between the Kirāta (Śiva in disguise) and Arjuna, forming the Epic-kernel of this work, covers a very few small chapters in the Śivapurāṇa or in the Vanaparvan of the Mahābhārata ; but practically a major portion of the work (ranging from Cantos I to XII—giving long and full discourses on politics, ethics and duties of heroes and detailing vivid descriptions of the beautiful scenery of the Himālayan region and the autumn season) is the outcome of poetic and inventive genius of Bhāravi. The skeleton story of the Mahābhārata has attained a full Epic grandeur and unity due to the exceptional descriptive power of Bhāravi, who has, to the extreme limit, justified the characteristics of the Mahākāvya of the Sanskrit Rhetoricians.

"Of Bhāravi's life" and activities we practically "know nothing whatever, though he ranks as second in magnitude among the

constellations of" classical Epic poets. "External evidence proves that he was older than A. D. 634, when he is mentioned with Kālidāsa in the Aihole inscription, and he is cited in the Kāśikā Vṛtti.*" "Bāṇa ignores him, so that he can hardly have preceded him long enough for his fame to compel recognition. It is, therefore, wiser to place him at A. D. 550 than as early as A. D. 500." (Keith, A. Hist. of Sans. Lit., p. 109.)

There are several commentaries (not less than eighteen in number) on the Poem. Of these, the commentary of Mallinātha (named Ghaṇṭāpatha) is very well-known and widely read. Mallinātha was a Brāhmaṇa of the Kolācala family in the Telinganā district of Madras Presidency. Fifteenth century is the date generally assigned to him. His commentaries on the Raghuvaṃśa, Kumārasambhava, Meghadūta, Bhaṭṭikāvya (doubted by some), Śiśupālavadha and also on the rhetorical work Ekāvalī are very popular. From one of the introductory verses of his Ghaṇṭāpatha it appears that he was a sound scholar, conversant with the six orthodox systems of Indian philosophy.

[For further details, vide our Introductions to Cantos I, XIII and XIV.]

Summary of Canto II

I. Summary of the speech of Bhīma as delivered by him to Yudhiṣṭhira :—

Hearing the words of Draupadī, Bhīma thus delivered his

---

* "येनायोजि न वेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः" ॥

Also, vide, Kāśikā, under rule I. 3. 23.

spirited speech supporting her fully—"O king! The speech of Draupadī is simply wonderful. Though a woman, she has given the finest display of wisdom in her speech which is sure to excite the admiration of even the Lord of speech. The science of politics which is crude and beyond the reach of ordinary men, has been well studied by her and she has shown us the path to enter into the science—which is singularly admirable, because rare are the persons who can act as true guides. Her speech has the mark of pregnant brevity and is efficacious, noble and productive of good in the end. It is like a potent medicine which though taken in a small quantity, cures in the end. As you are an appreciator of merits you should accept her speech. The most unfortunate thing which appears in my eyes is that a wise man like you should allow his reason thus to go amuck. What is more lamentable than that your prowess, once praised even by gods, should thus deteriorate when you are reduced to this deplorable plight by your enemies! The prosperity of the enemy, if bound to ruin, can be brooked; but one should not close his eyes against the enemy's decline, if it is likely to be crowned with success. The wise man, considering that the decline of the enemy is great and imminent and that his own case is just the reverse, remains silent; but when the case is contrary he counteracts the same. Fortune forsakes those kings who neglects through indolence, the increasing power of their enemies. The rising king, like the waxing moon, is always an object of worship to the people. That policy which is based on the ascertainment of the five principal means of success, is really the true source of treasure and power; but even such a perfect policy depends for success on unflinching energy as do the people on Providence. A man of self-respect always considers his personal valour as the chief remover of obstacles. Difficulties overwhelm a feeble man; future forsakes one smitten by calamities; no respect is shown to him who has no hopes of rising, and Royal Fortune never smiles upon him who is slighted. Cast

off this life of inaction. Fortune favours the brave. If you wait for the expiry of the term of thirteen years, then you are befooled; because Duryodhana has already evinced his fraudulent nature in usurping your kingdom; and having once tasted the comforts of Royal Fortune, he will not make over the kingdom to you without bloodshed. Even if your enemy gives back the kingdom after the expiry of the term, then vain is the prowess of your brothers. To a valiant person freedom as a gift is worse than slavery. The lion lives upon elephants killed by himself. The brave values fame more than wealth which is only a secondary object to him. Men of self-respect never part with their inherent lustre even at the cost of their lives. The mighty never brooks the superiority of another. So abandon your false notion and resolve to manifest your valour; otherwise the destruction of your enemy will be delayed by your inaction. None of your enemies will be able to cope with your four brothers who are well known for their prowess. May the ever-blazing fire of anger, burning in your mind, be extinguished by the flow of tears from the eyes of the ladies of your enemies!"

II. Summary of the speech of Yudhiṣṭhira as delivered by him to pacify excited Bhīma:—

Yudhiṣṭhira thus began to appease angry Bhīma who had manifested his excitement—"As the clear mirror bears the faithful reflection of the face, so your lucid, elegant and attractive speech clearly reflects your mind. Your words are perspicuous and have a depth of meaning; there is no repetition of words and the syntax has not been neglected. It is to your credit that the arguments in favour of war were ably put forth and your logical inferences were not in conflict with the teaching of Śāstras. But inspite of your having conclusively proved the advisability of war, my mind is not satisfied, and I am still in the dark because it is not easy to grasp the many special rules among general enunciations. Nothing should be done rashly; for want of discrimination is the chief source

of misfortunes. Prosperity, ever attached to merits, selects the men of circumspection as her lord. Duty coupled, with prudence, brings sure success. Knowledge adorns the person ; tranquility of mind beautifies knowledge ; valour sets off tranquility and success produced by thoughtfulness is the natural result of valour. Thoughtfulness, therefore, is the ornament and source of all. When the knowledge of duty is eclipsed by a conflict of ideas, then the correct and definite knowledge of the Śāstras acquired after long study, acts as the beacon of the wise. In the case of persons who emulate the achievements of great men, even fall caused by adverse fate is as creditable as rise itself. Those who wish to conquer their enemies, first overcome their wrath and then use their valour when favourable opportunities occur. Removal of ignorance, caused by anger, is therefore the first duty of a man who wishes to rise. Even a powerful man loses all his regal power, if he does not check the influence of ignorance caused by anger. That king who is neither too mild nor too severe and assumes mildness or displays severity at the proper time, brings under sway the whole world. Wealth which is flitting like autumnal clouds, cannot be properly managed by those who are slaves of their passions By exhibiting this untimely excitement of your impulsive mind, you have forsaken that profundity which surpassed that of the ocean. Verily, those who, even after studying the Śāstras, do not check their carnal passions, quickly bring on the Goddess of Wealth the infamy due to ficklenss. Do not allow anger to rob you, like ordinary people, of the success to be had by following a sound policy. Remember that forgiveness is the noblest revenge. The Yādavas will never side with Duryodhana—leaving us who are humbly devoted to them. The friends and followers of the Yādavas, follow Duryodhana, as if in submission for their private ends ; but they are sure to join in the end the standard of the Yādavas. And if before the stipulated time, you attack Duryodhana, that will detach the Yādavas and their partisans.

Sooner or later, proud Duryodhana will insult other kings and thus drive them to embrace our cause. Even common people do not pocket insults, what to speak of the kings. The prosperity of arrogant persons is sure to heighten their insolence. The proud man is never left by imprudence; he who is extremely imprudent easily swerves from the right path; and one, not following the right path of conduct, is disliked by the people. The man of patience can uproot even the mighty enemy who is disliked by the people and whose powers gradually decay. Even an insignificant revolt, produced by the disaffection of his trusted counsellors, is sure to destroy such a king. The wise man should connive at the prosperity of his impudent enemy, as such a foe is easy to be conquered in his weak points. A neighbouring prince who is ambitious of conquest, attacks and seizes the dominion of a king whose subjects and counsellors are dissatisfied with him due to his ill conduct, as the forcible current of a river encroaches upon the loosened banks and takes them off."

॥ श्रीः ॥

श्रीभारविकृते

श्रीकिरातार्जुनीये महाकाव्ये

द्वितीयः सर्गः

KIRĀTĀRJUNĪYA

CANTO II

Bhīma made the following vigorous speech to Yudhiṣṭhira.

विहितां प्रियया मनःप्रिया-
मथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥ १ ॥

Prose—अथ वृकोदरः प्रियया विहितां मनःप्रियां गिरं गरीयसीं निश्चित्य नृपम् उपपत्तिमत् ऊर्जिताश्रयं वचनम् ऊचे ।

Beng.—প্রিয়তমা দ্রৌপদী যাহা কহিলেন, তাহা মনোহর ও সারবান্ জ্ঞান করিয়া ভীম নৃপতিকে (যুধিষ্ঠিরকে) যুক্তিযুক্ত ও উদার বাক্য বলিতে লাগিলেন ।

Eng. Equiv.—विहितां—uttered. प्रियया—by his dear wife. मनःप्रियाम्—charming to the mind. निश्चित्य—concluding. गिरं—words. गरीयसीम्—substantially true. उपपत्तिमत्—argumentative. ऊर्जिताश्रयं—vigorous. वचनं—speech. ऊचे—made. वृकोदरः—Bhīma.

Eng.—Bhīma, concluding that the words—uttered by his dear (wife Draupadī) and charming to the mind—were substantially true, made the following vigorous and argumentative speech to the king.

Expl.—Draupadi's speech had produced profound effect on the mind of Bhīma. According to him, the words of his dear wife were simply beautiful. Though a woman, she had delivered a speech which was charming to the mind and which carried weight. He fully supported Draupadī who echoed his own sentiments. And in his support of Draupadī he addressed to the king the following words which were spirited and full of reasoning.

Malli.—विहितामिति । (अथ वृकोदरः भीमः । प्रियया द्रौपद्या ; प्रियाग्रहणम् अस्या हितोपदेशतात्पर्यसूचनार्थम् । विहिताम् अभिहिताम् इत्यर्थः । विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषपर्यवसानात् । मनःप्रियाम् अभिमतार्थयोगात् मनोहराम् । विशेषणद्वयेन अपि गिरो ग्राह्यत्वम् उक्तम् । गिरं गरीयसीं सारवत्तरां निश्चित्य नृपं धर्मराजम् । उपपत्तिमत् युक्तियुक्तम्, ऊर्जिताश्रयम् उदारार्थं वचनम् । ऊचे उक्तवान् । कर्तरि लिट् । ब्रुवो वचिरादेशः । "ब्रुविशासि—" इत्यादिना द्विकर्मकत्वम् । "अकथितञ्च" इति नृपस्य कर्मत्वम् ।) अस्मिन् सर्गे वियोगिनी सुन्दरी वा छन्दः ।

Notes on Malli—(1) प्रियाग्रहणम्.........सूचनार्थम्—The use of the word प्रिया indicates her intention of offering wholesome advice.

(3) अस्मिन् सर्गे.........छन्दः—The metre in this canto is वियोगिनी or सुन्दरी । For metre, see Appendix A.

Extracts from other Commentaries—"धीमत्या धर्मपत्न्या सोपपत्त्यापच्छन्दनात्मकं वचनं किमसावजातशत्रुर्नाभिनन्दति, युक्तियुक्तमपि स्त्रीवाक्यं न प्रमाणीकर्तव्यमिति प्रतीत्या वा मतिविपर्ययेण वा, सर्वथा महाराजो मतिविपर्यये युवराजेन बोधनीयः ; तस्मादस्या वाक्यस्य गुणान् सोपपत्तिभिः वाक्यैः उपबृंहयन् महाराजस्य मतिविपर्ययं परिवर्तयिष्यामि इति वृकोदरविमर्शानन्तर्यम् अथशब्देन द्योत्यते ।...न खलु कश्चित् विषयो बाह्येन्द्रियस्य प्रीतिमकृत्वा अन्तःकरणस्य प्रीतिं करोतीति 'मनःप्रिया'मित्यनेनैव श्रोत्रप्रियामित्यपि सिध्यति ।... ..वचनक्रियाप्रयोजकत्वमिह आश्रयत्वमभिप्रेतम् ।.........चिरितव्रतमेव तव स्वधर्मो न जपोपवासादीति राजधर्मस्मारणेन युधिष्ठिरस्य विपर्ययं व्यावर्तयितुं वृकोदरस्य उद्यमं द्योतयितुं नृपमित्युक्तं न गुरुमित्यादि"—चित्रभानुः ।

Notes—विहिताम्—Adj. to गिरम् । वि – धा + क्त, कर्मणि + स्त्रियां टाप् । The

root धा preceeded by the prefix वि is used in the general sense of "doing" (comp. 'करोतीति क्रियासर्वनाम'—महाभाष्य); but here it is used in the particular sense of uttering. So says Malli.

प्रियया—अनुक्ते कर्तरि तृतीया। Refers to Draupadī. प्रीणातीति प्री + क (कतार) by the rule "इगुपधज्ञाप्रीकिरः कः"। स्त्रियां टाप्। For significance of this word see notes on Malli.

मनःप्रियाम्—Adj. to गिरम्। मनसः प्रिया (षष्ठीतत्) ताम्। Charming to the mind and also to the ears (see Chitrabhānu).

अथ—अव्यय। "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ" इत्यमरः। Here it is used to denote the immediate proximity (आनन्तर्य) of Bhīma's thought. Before delivering his speech Bhīma thus thought in his mind—Yudhiṣṭhira may ignore the words of Draupadī, as she is a woman ; and yet she has told the truth ; so it is my duty to bring out the excellence of Draupadī's words and thus change his mind. (See Chitrabhānu).

निश्चित्य—निर् – चि + ल्यप्। The तकार comes after the root चि by the rule "ह्रस्वस्य पिति कृति तुक्"।

गिरम्—Obj. to निश्चित्य। गृणातीति नाम इति गृ + क्विप् (सम्पदादित्वात्) = गीः। According to भागुरि the form गिरा is also available—"आपश्चैव हलन्तानां यथा वाचा निशा दिशा"।

गरीयसीम्—Adj. to गिरम्। अतिशयेन गुरु इति गुरु + ईयसुन्, स्त्रियां ङीप् = गरीयसी, weighty.

उपपत्तिमत्—Adj. to वचनम्। उप – पद् + क्तिन् (भावे) = उपपत्तिः reasoning or argument. उपपत्ति + मतुप् = उपपत्तिमत्। Compare : "उपपत्तिरुदाहृता बलात्" St 28.

ऊर्जिताश्रयम्—Adj. to वचनम्। ऊर्ज् (बलप्राणनयोः—चुरादि) + क्त कर्मणि = ऊर्जितः strengthened. Or, ऊर्जः (बलम्) सञ्जातः अस्य इति तारकादिभ्य इतच् = ऊर्जितः (compare "ऊर्जशब्दः अदन्तः सान्तश्च"—Bhānuji)। ऊर्जितः आश्रयः यस्य तत् (बहुव्रीहि)—vigorous. आ – श्रि + अच् कर्मणि = आश्रयः। Acc. to Prof. Kāle—"ऊर्जिताशय' would be a simpler reading, as आशय directly means intention." But this is against Malli and Chitrabhānu.

नृपम्—Indirect object of the verb ऊचे । नॄन् पाति इति उपपदसमासे नृ-पा+क कर्तरि=नृपः । The word नृप has taken the accusative case-ending by the rule "अकथितञ्च" which means that a कारक which is not spoken of as coming under any one of the special relations of अपादान etc., is also called कर्म ।

N. B. An अकथित कर्म is the indirect object of a verb governing two objects. It is also called अविवक्षित कर्म or गौणकर्म । That which is necessarily put in the accusative case in order to complete the idea of the verb is the direct object (मुख्यकर्म), while that which may be put in the accusative, depending upon the speaker's will is called the indirect object (गौणकर्म).

ऊचे—ब्रू+लिट् ए कर्तरि । ब्रू is substituted by वच् by the rule "ब्रुवो वचिः" ; ब्रू is a द्विकर्मक root. Comp. "दुह्-याच्-पच्-दण्ड-रुधि-प्रच्छि-चि-ब्रू-शास-जि-मन्थ्-मुषाम् । कर्मयुक् स्यादकथितं तथा स्यान् नी-हृ-कृष्-वहाम्" ।

वचनम्—Direct object of the verb ऊचे । उच्यते अनेन इति वच्+ल्युट् करणे ।

वृकोदरः—Refers to Bhīma. वृकस्य उदरम् (षष्ठीतत्) ; वृकोदरमिव उदरं यस्य सः (उपमान-पूर्वपदलोपी बहुव्रीहि) ; यद्वा, वृकः (वृकनामाग्निः) उदरे यस्य (व्यधिकरण-बहुव्रीहि)—गड्वादित्वात् सप्तम्यन्तपदस्य परनिपातः ; यद्वा वृक-(वृकनामाग्नि)-युक्तम् उदरं यस्य (उत्तरपदलोपी बहुव्रीहि)—compare "यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः । मया दत्तः स तेनासौ कथितो हि वृकोदरः" ।

Ch. of Voice—......वृकोदरेण नृपः वचनमूचे (दुह्यादेरप्रधाने) ।

Remark—Here the use of the word वचनम् (speech) is superfluous, because ऊचे (uttered) denotes the uttering of speech. Thus there is the defect अपुष्टार्थता in this verse. Vāmana has sought to justify such uses by saying that though a word is superfluous or irrelevant (अपुष्ट), being implied by another word in the sentence, its separate mention may be allowed when it is intended to be qualified. Compare : "विशेषणस्य च" (काव्यालङ्कारसूत्र II. 2. 18), also "अपुष्टस्यापि तस्योपादानमुचितं यत्र तद्विशिष्यते"—प्रदीप on काव्यप्रकाश, Ch. VII.

N. B. It is to be noted in this connection that Vamana's view

holds good only when the purpose served by the epitl et qualifying the noun cannot be served by any adverbial expression, e. g., "जगाद मधुरोदारविशदाच्चरमीश्वरः" इति विन्यासकल्पनायां विशेषणस्य प्रयोगः क्रियाविशेषणत्वेऽपि उपपद्यते। अतः 'नीलनीरजविकाशहारिणा कान्तमीक्षणयुगेन वीक्षते' इत्यादाहार्थम्"। Cf :—Cognate objects of English Grammar.

The figure of speech in the first half of the verse is (अनुप्रास) (Alliteration) which is defined as—"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्" —साहित्यदर्पण X. 3.

The speech of Draupadī will excite universal admiration.

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं
वचनं तद् विदधीत विस्मयम्॥ २॥

Prose—मानिनी स्नेहमयेन चक्षुषा परितः वीक्ष्य यत् अवोचत, (केनापि) दुर्वचं तत् वचनं वागधिपस्यापि विस्मयं विदधीत ; (अथवा) तत् वचनं वागधिपस्यापि दुर्वचं (अत एव सर्वस्य) विस्मयं विदधीत।

Beng.—ক্ষত্রিয়কুলাভিমানিনী দ্রৌপদী স্নেহচক্ষুতে সকল বিবেচনা করিয়া যাহা কহিলেন, অন্যের পক্ষে বলা দুষ্কর সেই বাক্য বাগীশ্বর বৃহস্পতিরও বিস্ময় উৎপাদন করে। (অথবা) সেই বাক্যপ্রয়োগ বাগীশ্বর বৃহস্পতিরও পক্ষে দুষ্কর, অতএব তাহা সকলের বিস্ময় উৎপাদন করিয়াছিল।

Eng. Equiv.—यत्—that. अवोचत—has just spoken. परितः वीक्ष्य—with proper circumspection. मानिनी—proud of her Kṣattriya race. स्नेहमयेन चक्षुषा—with eyes beaming with affection. वागधिपस्य—of the Lord of speech. दुर्वचम्—difficult to make. तत् वचनं—that speech. विदधीत—is likely to excite. विस्मयम्—admiration.

Eng.—The speech which the lady (Draupadī), justly proud (of her Kṣattriya race), has just spoken with proper circumspection and with eyes beaming with affection, and (1) which it is difficult for any one to make, will excite the admiration of even the Lord.

of speech (Bṛhaspati) : or (2) which is difficult even for Bṛhaspati to make, is capable of exciting universal admiration.

Expl.—Women are are always guided by their sentiments and not by their reasons. Draupadī, being a woman, is no exception to this rule. Yet it is a great wonder that she; being a woman, has been able to deliver such a beautiful speech. No doubt affection was the guiding principle of her speech, yet she has admirably reviewed the entire situation and has given us no chance to forget an incident or miss a point. Such a speech is indeed difficult for the ordinary man to make. There is no wonder if the Lord of speech himself be astonished at her speech ; and lastly what she has said, has vindicated the pride of our Kṣattriya race.

Malli.—किं तद् वचनं, तदाह—यदिति । (मानिनी क्षत्रियकुलाभिमानवती द्रौपदी । स्नेहमयेन स्नेहप्रचुरेण, "तत्प्रकृतवचने मयट्" । चक्षुषा ज्ञानचक्षुषा । एतेन आप्तत्वमुक्तम् । परितः वीक्ष्य समन्ताद् विविच्य यत् वचनम् अवोचत । ब्रुवो वचेर्वा लुङ् ।) "वच उम्" इति उमागमः । वागधिपस्य बृहस्पतेः अपि दुर्वचं वक्तुमशक्यम् । शेषे षष्ठीयं न कृद्योगलक्षणा । अतो "न लोक" इत्यादिना षष्ठीप्रतिषेधो नास्ति । तत् वचनं विस्मयं विदधीत । सर्वस्यापीति शेषः । अथवा वागधिपस्य अपि विस्मयं विदधीत इति सम्बन्धः । दुर्वचं केनापि इति शेषः । यतः स्त्रीणामपि वचः शास्त्रमनुरुणद्धि हितं चानुबध्नाति, अतो विस्मयकरं ग्राह्यं च एतद् वचनम् इति तात्पर्यार्थः ।)

Notes on Malli.—यतः स्त्रीणाम्........ तात्पर्यार्थः—The purport is—this speech (of Draupadī) is simply astonishing and acceptable ; because the words, though coming from a woman, closely follow the Śāstras and enjoin what is good.

Extracts from other commentaries.—"मानिनीति मानेन नित्यसम्बद्धा इत्यर्थः ।......चक्षुःशब्देन मनो लक्ष्यते......तथा चोक्तम्—"अवहितं हि चित्तमर्थान् पश्यतीति"........सुदुःसहपरिभवव्यसनजनिताभिषङ्गमुषितविवेकविज्ञानधृतेः अस्या वचस्तदानीं परमार्थविसंवादि स्यादपि, इदानीं तु मुनिजनसंवासजनित-विनयविवेक-धैर्यविज्ञानायाः याज्ञसेन्या वचनं कृत्यनिर्णये प्रमाणमेव इत्ययमर्थः अद्यतनभूतार्थेन अवोचत इति लुङ्-प्रत्ययेन द्योत्यते ।

......वागधिपस्य कथमन्यवचनं विषयं विधास्यतीति विरोधमपिशब्दो द्योतयति।.........शेष-लक्षणैवेयं षष्ठी......अथवा वागधिपेनेति विभक्तिविपरिणामेन वागधिपशब्दः अत्रानुषज्यते"—चित्रभानुः।

Notes—यत्—Object to अवोचत। यत् वचनम् that speech.

अवोचत—ब्रू + लुङ् त। Nom. मानिनी। वच् comes in place of ब्रू by the rule "ब्रुवो वचिः", ; वच् with लुङ् will yield the form अवोचत् in परस्मैपद। Hence Malli's remark as "ब्रुवो वचेर्वा लुङ्" is a mistake. Prof. Kale however, notices a reading "अवोचदवेक्ष्य"। It may be that Malli's remark 'वचेर्वा' refers to this reading. The लुङ् has been correctly used here. लुङ् expresses a past action done very recently, as in the course of the current day, and it also implies the completion of an action at a past time generally (भूतसामान्ये लुङ्). The poet could not use लङ् here; because an action done before to-day is expressed by लङ् ("पूर्वापरनिशायामौ दिनञ्चाद्यतनं विदुः"—तद्भिन्नम् अनद्यतनः कालः) and लिट् denote remote past. Chitrabhānu discovers the hint of लुङ् more beautifully (See extracts).

वीक्ष्य—वि - ईक्ष् + ल्यप्; considering.

मानिनी—मानिन नित्यसम्बद्धा इति मान + इनि मत्वर्थे (नित्ययोगार्थे) + स्त्रियाम् ङीप् = मानिना refers to Draupadī. Always conscious of the high position of her family.

परितः—अव्यय। परि + तसिल् (सर्वतोभावे) by the rule "पर्यभिभ्यां च" ; from all sides. परितः governs a word in the accusative. Comp. "अभितः-परितः-समया-निकषा-हा प्रतियोगेऽपि" (वार्तिक)।

स्नेहमयेन—Adj. to चक्षुषा। स्नेह + मयट् (प्रकृतवचने) by the rule "तत्प्रकृतवचने मयट्"। The word प्रकृतवचन means 'abundance'—"प्राचुर्येण प्रस्तुतं प्रकृतं, तस्य वचनं प्रतिपादनम्" (Bhaṭṭoji)—Comp. "यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढः, तथापि वचनग्रहणादयं विशेषो लभ्यते। वचनग्रहणं हि याद्दशस्य प्रकृतस्य लोके मयटा वचनं प्रत्यायनं तत्र यथा स्यादित्येवमर्थम्" (तत्त्वबोधिनी)। स्निह् + घञ्, भावे = स्नेहः ; beaming with affection.—"He means—in this speech made by Draupadī, affection was the guiding principle"—Kāle.

चक्षुषा—करणे तृतीया। Acc. to Malli ज्ञानचक्षुषा—that means with an eye full of love and knowledge.

अपि—अव्यय। अपि denotes incongruity (विरोध) in the fact that how can the speech of a human being excite the admiration of the Lord of speech ? See—Extracts from other commentaries.

वागधिपस्य—वाचामधिपः (षष्ठीतत्) = वागधिपः, तस्य। Lord of speech i. e., Bṛhaspati. अधिपाति इति अधि – पा + क (कर्तरि) = अधिपः। Malli notices two constructions—(1) (केनापि) दुर्वचं तत् वचनं वागधिपस्य अपि विस्मयं विदधीत —which is difficult for any one to make, will excite the admiration of even the Lord of speech. Chitrabhānu follows this construction. (2) वागधिपस्य अपि दुर्वचं तत् वचनं (सर्वस्य) विस्मयं विदधीत—the speech which was difficult even for Bṛhaspati to make, might excite the admiration of all. In this construction the sixth case-ending in वागधिपस्य is to be explained as शेषे षष्ठी। A कारकषष्ठी is not available ; because दुर्वचं is a word which ends in the affix खल्। The rule is "न लोकाव्ययनिष्ठाखलर्थतृनाम्"। If, however, we accept the first construction, no such anamaly arises. Comp. "सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः, शेषे षष्ठी तु स्यादेव" (सिद्धान्तकौमुदी) ; "शेषे षष्ठीत्विति। एतेन "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" (Raghu I. 72), "अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्" इत्यादि व्याख्यातम्। यद्वा इक्ष्वाकूणां सिद्धय इत्यन्वयः। न तु इक्ष्वाकूणां दुराप इति। तथा वागधिपस्य विस्मयमित्यन्वयः। न तु वागधिपस्य दुर्वचमिति" (प्रौढ़मनोरमा)।

N. B. Of the two constructions it is better to accept the first ; because the conception of a human speech difficult even for Bṛhaspati to make—is going beyond the furthest limit of a hyperbole.

दुर्वचम्—Adj. to वचनम्। दुःखेन उच्यते इति दुर् – वच् + खल् (कर्मणि) by the rule "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ; difficult to be spoken.

वचनम्—Nom. to विदधीत। वच + ल्युट् (भावे)।

विदधीत—वि – धा + विधिलिङ् ईत—in the sense of capability. "शकि लिङ् च"।

विस्मयम्—Obj. to विदधीत। वि – स्मि + अच्, भावे by the rule "एरच्"।

Ch. of Voice—यत मानिन्या अवाचि.........दुर्वचेन तेन वचनेन विस्मयः विधीयेत।

Remark—The figure of speech in this verse is असम्बन्धे सम्बन्धरूपा अतिशयोक्ति which is defined as "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते" (साहित्यदर्पण X. 64). "Bṛhaspati was not likely to be astonished at the speech of Draupadī and yet it is said that he would be"--Prof. Kāle.

The science of politics can be understood by deep study; but rare is the man who can guide us right through.

विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः।
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः॥ ३॥

Prose—विषमः अपि नयः पयसाम् आशय इव कृततीर्थः सन् विगाह्यते। तु तत्र स विशेषदुर्लभः यः कृत्यवर्त्म सत् उपन्यस्यति।

Beng.—হ্রদ নিতান্ত দুরবগাহ হইলেও তাহার সোপান-পথ প্রস্তুত করিয়া দিলে লোকে যেমন তাহাতে অনায়াসে অবগাহন করিয়া থাকে; সেইরূপ নীতিশাস্ত্র একান্ত জটিল ও দুর্বোধ হইলেও অভ্যাসাদি উপায় বিধান করিলে তন্মধ্যে সহজেই প্রবেশ করিতে পারা যায়। কিন্তু গর্ত্তগ্রাহাদি দোষ দূর করিয়া হ্রদের সোপান পথ প্রস্তুত করিয়া দেয়, এরূপ লোক যেমন সুলভ নহে, সেইরূপ দেশকালাদির অব্যাঘাতে সন্ধি-বিগ্রহাদি কার্য্যে উপদেশ দেয়, এই প্রকার লোকও অতি বিরল।

Eng. Equiv.—विषमः—(1) inaccessible; (2) intricate. विगाह्यते—(1) dived in; (2) understood. नयः—science of politics. कृततीर्थः—(1) when descent is prepared; (2) by close study. पयसामाशय इव—as a lake (reservoir of water). सः—that man. तु—but. विशेषदुर्लभः—extremely rare. सत्—rightly. उपन्यस्यति—set forth. कृत्यवर्त्म—path of action to be pursued.

Eng.—As a lake, though inaccessible, can be dived in by any one when descent is prepared, so the science of politics, though intricate, can be understood by close study: but that man is

extremely rare who can rightly set forth the path of action to be pursued.

Expl.—For an ordinary man the science of politics is not easy to grasp. Kings often lose their kingdoms by the slightest blunder they commit in their policy. But though difficult of comprehension the science of politics can be understood by proper study. It is like a lake which though inaccessible can be entered into when a flight of steps to it is prepared. But rare is the man who can rightly guide us through by pointing out proper places of baths etc., and in the second case by suggesting proper times for conciliation, declaration of war, etc. And it is a great credit to Draupadī, that she, being a woman, has dived so deep in the intricate science of politics. Her speech is indeed astonishing and worthy of acceptance.

Malli.—विस्मयकरत्वे हेतुमाह—विषम इति । (विषमोऽपि दुर्बोधोऽपि; अन्यत्र दुष्प्रवेशोऽपि । नयः नीतिशास्त्रं, पयसाम् आशयः ह्रद इव । कृततीर्थः कृताभ्यासादुपायः सन् । "तीर्थं शास्त्राध्वर-क्षेत्रोपायोपाध्यायमन्त्रिषु । योनौ जलावतारेषु मन्त्र्याद्यष्टादशस्वपि" । इति विश्वः । अन्यत्र कृतजलावतारः सन् । "तीर्थं योनौ जलावतारे च" हलायुधः । विगाह्यते गृह्यते प्रविश्यते च । तु किन्तु तत्र नये जलाशये च सः तादृशः पुरुषः विशेषदुर्लभः अत्यन्तदुर्लभः यः कृत्यवर्त्म, कृत्यं सन्धिविग्रहादिकार्यं स्नानादिकं च तस्य वर्त्म, सत् साधु देशकालाद्यविरुद्धं यथा तथा । अन्यत्र गर्तग्राहपाषाणादिरहितं यथा तथा उपन्यस्यति उदाहरति । "उपन्यासस्तु वाङ्मुखम् । उपोद्घात उदाहारः" इत्यमरः । यथा केनचित् कृततीर्थे पयसि गम्भीरेऽपि प्रवेष्टारः सन्ति, तीर्थकरस्तु विरलः, तद्वत् नीतावपि निगूढमपि तत्त्वं सति वक्तरि बोद्धारः सन्ति, वक्ता तु न सुलभः । इयं च साधु वक्तीति युज्यते विस्मय इति तात्पर्यार्थः ।)

Notes on Malli—(1) यथा केनचित्......तात्पर्यार्थः—The idea is this—as in the case of a lake—which though deep is dived in by bathers when a flight of steps is prepared, but the step-maker is rare—, so in politics there are persons who can grasp the obscure principle if there is some one to teach, but the teacher is rare. And this

Draupadī speaks well and hence her speech is worthy of producing wonder.

Extracts from other Commentaries—......कृततीर्थं इति। तीर्थशब्देन सम्प्रदाय इह विवक्ष्यते।......लोकप्रसिद्धोऽपि सम्प्रदायसाध्यः अर्थः तत्पूर्वंप्रयत्नप्राप्य इति द्योतयितुं कृततीर्थं इत्युक्तम् नाश्रिततीर्थं इत्यादि।......सकृत् विगाहनेनैव जलाशयस्य पारं प्राप्यते न नयस्य इति नयस्य जलाशयात् व्यतिरेकं द्योतयितुम् उपमा अङ्गीकृता न रूपकम्। गभीरबुद्धिना भारविणा द्योतितोऽयमर्थं उत्तानमनसा माघेन मफुटीकृतः—"षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः। ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम्"। इति।......अथवा सदिति वर्तमानमुच्यते, तदा तदुपचितं द्विविचक्षणमवस्थाय अन्वयव्यतिरेकासहमित्यर्थः। विशेषदुर्लभ इति। भेदप्रकर्षार्थौ विशेषशब्दः, अत्र तु भृशार्थः, भृशदुर्लभः अतिकृच्छ्रलभ्य इत्यर्थः। अथवा, सजातीयेषु उपायान्तरेषु अविद्यमाना गुणगणा विशेषशब्देन विवक्ष्यन्ते। विशेषैः दुर्लभः विशेषदुर्लभः; हेतौ तृतीया। तत्तदुपायविशेषपर्यवसायित्वात् अस्या वचो विस्मयहेतुः, न नयसामान्योक्तिमात्रेण इति तात्पर्यार्थः—चित्रभानुः।

Notes—विषमः—Adj. to नयः and पयसाम् आशयः। (1) नयपक्षे—intricate. (2) जलाशयपक्षे—difficult to enter into i. e., inaccessible. विगतः समः यस्मात (बहुव्रीहि)। The dental सकार changes into cerebral षकार by the rule "सुविनिर्दुर्भ्यः सुपिसूतिसमाः"।

विगाह्यते—वि–गाह्+लट ते कर्मणि। (1) नयपक्षे—is well grasped, (2) जलाशयपक्षे—is dived into.

नयः—The science of politics—उक्ते कर्मणि प्रथमा। Bhānuji suggests two derivations—(1) नय (गतौ)+घञ् (संज्ञापूर्वकालत् न वृद्धिः) = नयः; (2) नी+अच् by the rule "एरच्" (क्वचिदपवादविषयेऽपि उत्सर्गोऽभिनिविशते) = नयः।

कृततीर्थः—Adj. to नयः and पयसाम् आशयः। कृतं तीर्थं यस्य सः (बहुव्रीहि) —(1) नयपक्षे—The word तीर्थ means ways of understanding i. e., deep study; (2) जलाशयपक्षे—a flight of steps. तरति तीर्यते वा अनेन इति तॄ+थक् (औणादिक) = तीर्थम् cf. "तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च। अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु" इति मेदिनी।

पयसाम् आशय इव—Like a lake. आ–शी+अच् = आशयः reservoir (of water).

विशेषदुर्लभः—Adj. to सः ; Extremely rare. विशेषेण दुर्लभः (सुपसुपा), दुर् – लभ् + खल् कर्मणि = दुर्लभः । Chitrabhānu suggests another analysis विशेषैः दुर्लभः (तृतीयातत्)—"सजातीयेषु उपायान्तरेषु अविद्यमाना गुणगणा विशेषशब्देन विवक्ष्यन्ते" (See Extracts from other Commentaries).

सत्—Adv. to उपन्यस्यति ; in a proper way. Chitrabhānu interprets सत् as वर्तमानम् also. The meaning is "who shows the action to be done at present." (See Extracts).

उपन्यस्यति—उप - नि – अस् (दिवादि) लट् ति । Puts forth. (1) नयपक्षे—by suggesting proper times for conciliation, declaration of war etc. ; (2) जलाशयपक्षे—by pointing out proper places of bath, etc. Alt. form उपन्यस्यते by the Vārttikā—"उपसर्गादस्यत्यूह्योर्वेति वाच्यम्"—which means that अस् (to throw) and ऊह् (to reason) optionally take आत्मनेपद, when preceded by an उपसर्ग ।

कृत्यवर्त्म—Obj. to उपन्यस्यति ; the path of action. कृत्यस्य वर्त्म (षष्ठीतत्) ; कृ + क्यप् भावे = कृत्य ।

Ch. of Voice—विषमं नयं विगाहते......कृततीर्थं.........आशयम् । तेन विशेषदुर्लभेन भूयते......उपन्यस्यते येन ।

Remark—The figure of speech in this verse is a सङ्कर of उपमा and श्लेष । Here the science of politics is compared with a lake and उपमा is here the main (अङ्गी) figure. The sub ordinate (अङ्ग) figure is श्लेष । So these two figures are not independent by themselves but bear the mutual relation of helper and helped ; hence सङ्कर (नीरक्षीर-न्यायेन सङ्करः) । उपमा is thus defined "साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः" (साहित्यदर्पण X. 17). The definition of श्लेष is "श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते" (साहित्यदर्पण X. 13). In विषमः, विगाहते, उपन्यस्यति and कृत्यवर्त्म we have अर्थश्लेष but in कृततीर्थः we have शब्दश्लेष । The distinction between शब्दश्लेष and अर्थश्लेष is that in the former the श्लिष्ट word is not capable of being replaced by a synonym and in the latter it can be so replaced. Chitrabhānu also discovers व्यतिरेक as the suggested figure in उपमा । When उपमेय is described as superior to उपमान or vice versa, and when the distinction between them is predominant, the

figure is called व्यतिरेक। Here a lake if once dived into can be easily crossed, but the science of politics requires repeated study to grasp it thoroughly. Here lies the superiority of polity. "सकृत् विगाहनेनैव जलाशयस्य पारं प्राप्यते न नयस्य इति नयस्य जलाशयात् व्यतिरेकं द्योतयितुम् उपमा अङ्गीकृता न रूपकम्"। In रूपक there is complete identity between उपमेय and उपमान।

Her speech, though brief, is efficacious.

परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम्।
अतिवीर्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः॥ ४

Prose—परिणामसुखे गरीयसि क्षतौजसां व्यथके अल्पीयसि (अपि) अस्मिन् वचसि अतिवीर्यवति भेषजे इव बहुः गुणः दृश्यते।

Beng.—পরিণামে সুখকর, গুরুতর ও দুর্ব্বলের একান্ত অসহনীয় দ্রৌপদীর এই বাক্য অল্প হইলেও অতিবীর্য্যবান্ ঔষধের ন্যায় বহুগুণ প্রদর্শন করিতেছে।

Eng. Equiv.—परिणामसुखे—(1) productive of good in the end; (2) curing in the end. गरीयसि—(1) highly spirited; (2) highly (potent). क्षतौजसां व्यथके—(1) painful only to those who have lost their manliness; (2) hateful only to the weak. अस्मिन् वचसि—in this speech. अतिवीर्यवति—potent भेषजे—medicine. बहु—great. अल्पीयसि—(1) short; (2) of small quantity. दृश्यते—is found. गुणः—efficacy.

Eng.—Great efficacy is found in this speech, though short, which is highly spirited, painful only to those who have lost their manliness but productive of good in the end, as in a highly potent medicine, though taken in a small quantity, hateful only to the weak, but curing in the end.

Expl.—Oh king! this short and stirring speech of Draupadī has great merits. Her words urging strong action, may not be liked by peace loving kings like you. Her words are highly spirited

and painful only to those who have lost their manliness. Yet as a drop of a highly potent drug cures in the long run the most dangerous disease so her advice, like a powerful medicine, is productive of good in the end. So, do not neglect her advice; because greatness is often discovered in small things.

Malli.—(अथ ग्राह्यत्वे हेतुमाह, परिणामेति । परिणामसुखे, परिणामः फलकालः परिपाकावस्था च तत्र सुखे हिते । "शक्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च" इत्यमरः । इति सुखशब्दस्य विशेष्यलिङ्गत्वम् । गरीयसि गुर्वर्थप्रतिपादके भूयिष्ठे श्रेष्ठे च ; क्षतौजसाम् उभयत्रापि क्षीणशक्तीनां व्यथके युद्धोपदेशकत्वात् भयङ्करे, अन्यत्र आदौ संशयसन्तापादिदुःख-जनके । अल्पीयसि अल्पाक्षरे अल्पमात्रे च । उक्तञ्च—"स्वल्पा च मात्रा बहुलो गुणश्च" इति । अस्मिन् वचसि द्रौपदीवाक्ये, अतिवीर्यवति अत्यन्तसामर्थ्यवति भेषजे औषधे इव । "भेषजौषध-भैषज्यम्" इत्यमरः । बहुः अनेकः गुणः मानत्राणराज्यलाभादिः आरोग्यबलपोषादिश्च दृश्यते । अतो ग्राह्यमस्या वचनमिति भावः ।)

Notes on Malli.—(1) अथ ग्राह्यत्वे हेतुमाह—He states reason for the acceptability (of Draupadī's speech).

Extracts from other Commentaries—"गरीयसि अतिगम्भीरे ध्वनिमत्तरे बहुतरार्थद्योतनसमर्थे इत्यर्थः ।... ..क्षतौजसां व्यथके इति । वैक्लव्यशङ्कासादितमनो-बलानां भयचलनकारिणीत्यर्थः ।......अतिवीर्यवति । अतिक्रान्ता वीर्यवन्तो येन तदतिवीर्यवत् तस्मिन् । वीर्यवत्तर-धनञ्जयादिशक्तिप्रतापप्रकाशनेन वीर्यवतो भीष्मादीनधःकुर्वतीत्यर्थः ।...... भेषज इवेति । भिषग्भिः औषधयोगेन विपाकिमं घृतरसायनगुलिकादि भेषजमुच्यते नौषधमात्रम् । दृष्टान्तेऽपि विशेषणानि योजनीयानि ।......किञ्च कविरपि शीतजन-प्रीतिप्रत्ययसम्पादनाय स्वकाव्यस्य गुणभूमानम् अनेनैव श्लोकेन अनुस्वानद्वारेण द्योतयति"—चित्रभानुः ।

Notes—परिणामसुखे—Adj. to वचसि and भेषजे । परिणामे सुखं तस्मिन् । सुखयतीति सुखं, सुखय् + अच् (कर्तरि)—(1) वाक्पक्षे—productive of good in the end; (2) भेषजपक्ष—curing in the end. The word सुख, as Malli observes on the authority of Amara, is used in all the three genders when refers to some द्रव्य and in the present case it has got the gender of वचः and भेषज । परि – नम् + घञ्, भावे = परिणामः ।

गरीयसि—Adj. to भेषजे ; (1) वाक्पक्षे—of high significance ; (2) भेषजपक्षे—good. अतिशयेन गुरु इति गुरु+ईयसुन् ।

व्यथके—Adj. to वचसि and भेषजे । व्यथयतीति व्यथ-णिच्+ण्वुल् (अक)=व्यथकः, तस्मिन्—(1) वाक्पक्षे—painful because it fosters war ; (2) भेषजपक्षे—hateful because it creates doubt (as to its efficacy) and pain.

अस्मिन् वचसि—अधिकरणे ७मी ; in this speech (of Draupadī)—as described in Canto I.

हतौजसाम्—कृद्योगे कर्मणि षष्ठी । हतम् ओजः येषां ते (बहुव्रीहि) तेषाम् । (1) वाक्पक्षे—who have lost their manliness or spirit (2) भेषजपक्षे—who have lost the intrinsic strength of their body. हतौजसां व्यथके ।

अतिवीर्यवति—Adj. to भेषजे acc. to Malli. अतिशयेन वीर्यवत् (प्रादितत्) तस्मिन्—highly potent. वीरे साधुः इति वीर+यत् by the rule "तत्र साधुः"=वीर्यम् । वीर्य+मतुप्=वीर्यवत् । If it qualifies वचसि, the meaning is "stirring"—In this case Chitrabhānu analyses as "अतिक्रान्ता वीर्यवन्तो येन" —See Extracts.

भेषजे—अधिकरणे, ७मी । भेषं रोगं जयति इति भेष+जि+ड (अ)=भेषजम् ।

बहुः—Adj. to गुणः—Great.

अल्पीयसि—Adj. to वचसि and भेषजे । अतिशयेन अल्पम् इति अल्प+ईयसुन् । (1) वाक्पक्षे—short ; (2) भेषजपक्षे—of small quantity cf. "स्वल्पा च मात्रा बहवो गुणाश्च"—the smaller the dose the greater the efficacy.

दृश्यते—दृश्+लट् ते, कर्मणि । Nom. मया or लोकैः understood.

गुणः—उक्ते कर्मणि १मा । In both cases 'efficacy'. (1) वाक्पक्षे—gaining of kingdom and protection of self-prestige. (2) भेषजपक्षे—cure and nursing.

Ch. of Voice—......बहुं गुणं पश्यामि or (लोकाः पश्यन्ति) ।

Remark—The main figure in the verse is पर्यायोक्त which is defined as "पर्यायोक्तं यदा भङ्ग्या गमामेवाभिधीयते" (साहित्यदर्पणे X. 79) cf. काव्यदर्श II. 295—which means—when what is meant to be expressed (वाच्य) is conveyed by व्यञ्जना which is apart from वाच्यवाचकभाव, the

figure is पर्यायोक्त। The figure is significantly so called because the meaning is conveyed in another manner. In this figure both वाच्यार्थ and व्यङ्ग्यार्थ are finally the same but the वाच्यार्थ is not stated in the same term in which व्यङ्ग्यार्थ is understood. Cf. "अस्मिंश्चालङ्कारे व्यङ्ग्यं वाच्यपरम्। अप्रस्तुतप्रशंसायाम् तु वाच्यं व्यङ्ग्यपरम्। तेनायमलङ्कारो वाच्यसिद्ध्यङ्गगुणीभूत व्यङ्ग्यभेद इति ध्वनिकारानुयायिनः"—(रसगङ्गाधर)। In this verse what is intended to be said (वाच्य) is that the speech of Draupadī is acceptable—and the same is the व्यङ्ग्यार्थ (suggested sense) here. Here पर्यायोक्त is of this variety—(कारणेन वाच्येन कार्यस्य गमने)। Bhīma states the reasons why her speech is acceptable.

As in the previous stanza we have here the सङ्कर of उपमा and श्लेष (for def. See St. 3). Here Draupadī's speech is compared with a powerful drug. The श्लेष is अर्थश्लेष as the words can be replaced by their synonyms. Between पर्यायोक्त and उपमाश्लेष—we have संसृष्टि and not सङ्कर because the two figures are independent of each other—"तिलतण्डुलन्यायेन संसृष्टिः"।

May this speech commend itself to you who are a lover of merits.

इयमिष्टगुणाय रोचतां
रुचिरार्था भवतेऽपि भारती।
ननु वक्तृविशेषनिःस्पृहा
गुणगृह्या वचने विपश्चितः॥ ५॥

Prose—रुचिरार्था इयं भारती इष्टगुणाय भवतेऽपि रोचताम्; गुणगृह्याः विपश्चितः वचने वक्तृविशेषनिःस्पृहाः ननु।

Beng.—দ্রৌপদীর এই হিতার্থসম্পন্ন বাক্য গুণগ্রাহী আপনার অবশ্যই প্রীতিকর হইবে। বাক্যবিষয়ে গুণপক্ষপাতী বিদ্বজ্জনেরা বক্তা স্ত্রী কি পুরুষ ইহা কিছুই লক্ষ্য করেন না।

Eng. Equiv.—इयम्—this. इष्टगुणाय—appreciator of merits. रोचतां—commend itself. रुचिरार्था—salutary. भवते अपि—even to you. भारती—speech. ननु—indeed. वक्तृविशेषनिःस्पृहाः—indifferent as to the indivi-

duality of the speaker. गुणगृह्या:—who look to merits only. वचने—as regards a speech. विपश्चित:—wise men.

Eng.—May this salutary speech commend itself even to you, an appreciator of merits. As regards a speech, wise men who look to merits only are indifferent indeed as to the individuality of the speaker.

Expl.—This speech of Draupadī, though coming from a woman is full of salutary advice. You are a wise man and a well known appreciator of merits. So it behoves thee to accept her speech. Wise men who look to merits only are impartial about the differentia of the speaker. Because mediocrity knows nothing higher than itself, but talent instantly recognises genius.

Malli.—(सत्यमेवं तथापि मह्यं न रोचते, किं करोमि? इत्यत्राह, इयमिति। रुचिरार्था हितार्थसम्पन्ना इति रुचिहेतूक्ति:। इयं भारती द्रौपदीवाक्यम् इष्टगुणाय अभिमतगुणाय गुणग्राहिणे इत्यर्थ:। भवते तुभ्यम् अपि। "रुच्यर्थानां प्रीयमाण:" इति सम्प्रदानत्वात् चतुर्थी। रोचतां स्वदताम्। विध्यर्थे लोट्। हितवचने बलादपि इच्छां कुर्यात् औषधवत् इति भाव:। तथापि स्त्रैणे वचसि का श्रद्धा? तत्राह नन्विति। गुणानां गृह्या: गुणपक्षपातिन इत्यर्थ:। "पदास्वैरिबाह्यापक्ष्येषु च" इति गृहे: क्यप्। विपश्चित: विद्वांस:। "विद्वान् विपश्चिद् दोषज्ञ:" इत्यमर:। वचने विषये वक्तृविशेषनि:स्पृहा:, वक्तृविशेषे स्त्रीपुंसादिलक्षणे नि:स्पृहा: ननु निरास्था: खलु। "बालादपि सुभाषितं ग्राह्यम्" इति न्यायादिति भाव:।)

Notes on Malli.—(1) सत्यमेवं.........करोमि—Quite so, but what can I do? it does not taste me well.

(2) हितवचने......श्रद्धा—one should set one's mind even by force on wholesome advice as on a medicine. Yet how words of a woman be relied upon? To this he says.

(3) बालादपि.........ग्राह्यम्—Salutary advice is to be taken even from a boy.

Extracts from other Commentaries—"एवं प्रशंसया प्रियावचनस्य आदरणीयतायां द्योतितायाम् अनाविर्भूततदादरस्य महामतेर्महाराजस्य अभिप्रायमभिव्यङ्क्तुं

तद्वाच आदरणीयतां साक्षादर्थयति—इयमित्यादिना ।......रोचतामिति । रुचिं करोत्वित्यर्थः । "रुदिर् अश्रुविमोचने" "जीव प्राणधारणे" इत्यादिवत् धात्वर्थनिगीर्णकर्मकत्वात् अकर्मकः रुचिधातुः ।......अपिशब्दः समुच्चयार्थः । ......अपिशब्दः समुच्चयद्योतकः साध्य—युधिष्ठिरस्य सम्प्रदानत्वं लोट्-प्रत्ययार्थेन योजयति न भीमादीनाम् ।......शास्त्रसंस्कृता वाग् भारतीति प्रसिद्धा न वाङ्मात्रम् ।......इयमित्यनुभूयमानप्रसादमाधुर्यगाम्भीर्यादिगुणेत्यर्थः । भारतीत्यनुस्तानमुखेन भरतवंशोचितेति द्योत्यते ।......स्त्रीवक्तृके वचसि गुणान्वयोऽपि घुणाक्षराक्षरसम इति स्त्रीवाक्यं सहसा न कृत्यनिर्णायकमिति शङ्कामुत्तरार्धेन परिहरति ।......नन्विति निपातः प्रश्ने निश्चये च वर्तते । उभयमत्र सम्भवति ।......वक्तृविशेषो वक्तृविशेषः व्यक्तिर्व्यावृत्तिर्वा ।......अथवा "यस्य च भावेन भावलक्षणम्" इति वचन इति सप्तमी"—चित्रभानुः ।

Notes—इयम्—Adj. to भारती। This word, as Chitrabhānu says, refers to the clarity, sweetness and depth of Draupadī's speech.

इष्टगुणाय—Adj. to भवते। इष्टः गुणः यस्य (बहुव्रीहि) तस्मै । इष्टः गुणः येन would be wrong because the affix क्त in इष्टः (इष्+क्त कर्मणि) is used in the present tense by the rule "मतिबुद्धिपूजार्थेभ्यश्च" and so येन will be put into यस्य by the rule "क्तस्य च वर्तमाने" ।

रोचताम्—Nom. भारती। रुच्+लोट् ताम् । Malli's comment as विध्यर्थे लोट् is not good. विधि is commanding or directing a sub-ordinate विधिः प्रेरणम् ; भृत्यादेः निकृष्टस्य प्रवर्तनम् । Bhīma cannot command his elder brother to accept the speech of Draupadī. Better प्रार्थने लोट् । According to Chitrabhānu रुच is intransitive in form but transitive in sense. Hence रोचतां=रुचिं करोतु । धात्वर्थेनोपसंग्रहात् अकर्मकः ।

रुचिरार्था—Adj. to भारती । रुचिरः अर्थः यस्याः सा (बहुव्रीहि) ; of salutary advice. रुच्+किरच् (औणादिक) = रुचिरः or रुचिं राति ददाति इति रुचि+रा+क = रुचिरः ।

भवते—चतुर्थी सम्प्रदाने । The सम्प्रदान कारक is by the rule "रुच्यर्थानां प्रीयमाणः" which means in the case of verbs having the significance of the root रुच्, the person or thing that is pleased or satisfied is called सम्प्रदान ।

अपि—The word अपि which is indeclinable denotes समुच्चय । "To you also as it has been to me" (Prof. Kāle).

भारती—The speech. बिभर्तीति भरतः भृ+अतच् (औणादिक)। भरतस्य इयं इति भरत+अण्, स्त्रियाम् ङीप = भारती। Chitrabhānu discovers the hint in this word as 'befitting the family of Bharata'.

ननु—अव्यय। It may denote, as Chitrabhānu remarks, either प्रश्न (question) or निश्चय (conclusion i. e., I think etc.).

वक्तृविशेषनिःस्पृहाः—Adj. to विपश्चितः। निर्गता स्पृहा येषां ते (बहुव्रीहि) = निस्पृहाः or निर्गतस्पृहाः by the Vārttika "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः"। वक्तॄणां विशेषः (षष्ठीतत्)। वक्तृविशेषे निःस्पृहाः (सहसुपा इति समासः)। विशेष is the differentia of the speaker like age, sex etc. स्पृह+अङ् भावे = स्पृहा।

गुणगृह्याः—Adj. to विपश्चितः। गुणैः गृह्यन्ते इति गुणगृह्याः—partisans of merits. ग्रह्+क्यप् (पक्ष्यार्थे) by the rule "पदास्वैरिबाह्यापक्ष्येषु च" which means that the affix क्यप is added to the root ग्रह् in the senses of पद (e. g., प्रगृह्यम्) अस्वैरी (e. g., गृह्यकाः शुकाः: पञ्जरादिबन्धनेन, परतन्त्रीकृता इत्यर्थः) बाह्य (e. g., ग्रामगृह्या सेना। ग्रामबहिर्भूता इत्यर्थः) and पक्ष्य (e. g., आर्यैर्गृह्यते आर्यगृह्यः Raghu II. 28—तत्पक्षाश्रित इत्यर्थः)। Samāsa—गुणानां गृह्याः (षष्ठीतत्) or गुणैः गृह्याः (तृतीयातत्)।

वचने—विषयाधिकरणे सप्तमी or as Chitrabhānu suggests भावे सप्तमी। वचने सतीत्यर्थः।

विपश्चितः—Wise men. प्रकृष्टं निश्चिनोति, चेतति, चिन्तयति वा इति वि-प्र+चित् +क्विप् (पृषोदरादित्वात् साधुः) = विपश्चित्। दोषज्ञः—a synonym of this word means स्वदोषपरदोषवित्।

Ch. of Voice—अनया......रुच्यताम्......रुचिरार्थया भारत्या।......निःस्पृहैः गुणगृह्यैः विपश्चिद्भिः (भूयते)।

Remark—The figure of speech in the first half is काव्यलिङ्ग which is thus defined "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" (साहित्यदर्पणे X. 81)—when the sense of a sentence or of a single word or of several words, is stated as cause, the figure is काव्यलिङ्ग। Here the sense of theword रुचिरार्था has been stated as the cause of being liked by Yudhiṣthira. Hence काव्यलिङ्ग। In the second half the figure is अर्थान्तरन्यास which is thus defined—"सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च

समर्थ्यते ॥ साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः" ॥ (साहित्यदर्पण X. 80). When either through similarity (साधर्म्य) or through dissimilarity (वैधर्म्य) a general proposition is supported by a particular proposition or a particular proposition is supported by a general proposition or the effect or cause is supported by cause or effect respectively, the figure is called अर्थान्तरन्यास । Here the effect (in the first half i.e., the speech should be accepted by you) is supported by the cause (in the second half i. e., wise men are indifferent as to the individuality of the speaker). We have also a संसृष्टि of these two figures.

For similar idea of the second half. Cf :—

(1) "स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम्—Kumāra VI. 12.

(2) "गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः"—Uttararāma-Carita.

(3) "बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः । रवेरविषये किं न प्रदीपस्य प्रकाशनम्" ॥

How does your discriminating mind sink into thoughtlessness ?

चतसृष्वपि ते विवेकिनी
नृप ! विद्यासु निरूढ़िमागता ।
कथमेत्य मतिर्विपर्ययं
करिणी पङ्कमिवावसीदति ? ॥ ६ ॥

Prose—(हे) नृप ! चतसृष्वपि विद्यासु निरूढ़िम् आगता विवेकिनी ते मतिः कथं करिणी पङ्कमिव विपर्ययम् एत्य अवसीदति ।

Beng.—হে মহারাজ! আপনার বুদ্ধি আন্বীক্ষিকী প্রভৃতি চারি বিদ্যায় পারদর্শিনী বলিয়া প্রখ্যাত আছে ; এক্ষণে আপনার সেই বিবেকবতী বুদ্ধি বিপরীত হইয়া পঙ্ক নিপতিত করিণীর ন্যায় কেন অবসন্ন হইতেছে ।

Eng. Equiv.—चतसृषु · four. ते—your. विवेकिनी—discriminating. नृप !—Oh king ! विद्यासु—branches of knowledge. निरूढ़िम्—proficiency. आगता—attained. कथम्—how. विपर्ययम् एत्य—come to be the reverse of itself. मतिः—intellect. करिणी—she-elephant. पङ्कम्—mud. अवसीदति sink low.

Eng.—Oh king ! how indeed does your intellect that attained proficiency in all the four branches of knowledge and became discriminating, now come to be the reverse of itself and sink low like the she-elephant on getting stuck in the mud ?

Expl.—Oh king ! you were once the foremost intellectual of your age. You mastered the fore lores viz , Metaphysics, Vedas, political economy and politics and your mind attained that discriminating faculty and rarified heights of wisdom which are the proud previlege of a genius. But now it is just the reverse. It is most unfortunate that this your rare intellect has embraced a morbid life of inaction and sunk into thoughtlessness ; just as the she elephant when she is stuck in the mud gets beweildered as to the proper line of action to be adopted and remains in that condition for ever.

Malli.—सम्प्रति स्वयम् उपालभते, चतसृष्विति (हे नृप ! चतसृषु अपि विद्यासु आन्वीक्षिक्यादिषु । "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । विद्याह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः" ॥ इति कामन्दकः । निरूढिमागता, प्रसिद्धिं गता, अतएव विवेकिनी सदसद्विवेकवती । यथाह मनुः—"आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ च वार्तायां दण्डनीत्यां नयानयौ" । इति । ते मतिः कथं करिणी पङ्कमिव विपर्ययं वैपरीत्यम् अविवेकरूपम् एत्य अवसीदति नश्यति ? तन्न युक्तमिति भावः ।)

Notes on Malli.—(1) सम्प्रति.........लभते—Now he himself criticises (Yudhisthira).

(2) यथाह मनुः......नयौ—As Manu has said—"Reasoning is found in logic and metaphysics, virtue and vice in the three Vedas, profit and loss in economics, and justice and injustice in politics."

Extracts from other Commentaries—"......न केवलं चतसृषु विद्यासु निरूढिमागता ते मतिः, अन्यास्वपि चतुर्दशसु विद्यासु निरूढिमागता इत्यर्थः ।......"विद्यासु विद्वानिव सोऽभिरेमे पत्नीषु राजा तिसृषूत्तमासु" इति भट्टिकाव्ये वार्ताया दण्डनीतावन्तर्भावमभिप्रेत्य तिस्रो विद्या उक्ता इत्यविरोधः ।......स्थले गर्ते वा पतितः स्वयमुत्थातुं प्रभवति, न पङ्कपतितः । पङ्कपतितोऽपि गौर्मृगो वा बलवता पुरुषेण उत्तार्यते, करिणी तु पङ्कपतिता

केन उत्तारयितुं शक्या इति भाव: ।......पङ्कादुत्तारो बहुतरप्रयत्नसाध्य:, विपर्ययात् उत्तारस्तु मतिप्रसादमात्रसाध्य: इति करिणीपङ्काभ्यां तन्मतिविपर्यययो: व्यतिरेकं द्योतयितुम् उपमा स्वीकृता न रूपकम् ।......पङ्कपतिता करिणी यथा बलवत्तमेन करिणा उत्तार्यते, तथैव विपर्ययपतिता तव मतिस्त्वया स्वायत्तमतिना विपश्चित्तमेन उत्तारयितुं शक्या इति च करिणीदृष्टान्तेन द्योत्यते । प्रामादिकं मतेर्विपर्ययम् अवधूय प्रकृतिं प्राप्नोति तात्पर्यार्थ:"—चित्रभानु: ।

Notes.— चतसृषु — qualifies विद्यासु । The four branches of knowledge are—(1) आन्वीक्षिकी —logic and metaphysics (अनु श्रवणात्तरम् ईक्षणम् अन्वीक्षा, सा प्रयोजनमस्या: इति ठक् ; (2) त्रयी—(The three) Vedas (त्रयीशब्दो वेदसामान्ये विवेद्यां च वर्तते ; यथा द्विजशब्दो ब्राह्मणे विवेद्यां च—Bhānuji) ; (3) वार्ता – the science of political economy (वृत्तिर्लौकिकवृत्तम् ; तदस्त्यास्याम् । "वृत्तेश्च" इति वार्तिकेन ण:—Bhānuji) ; (4) दण्डनीति:—politics (दण्डो नीयते बोध्यते अनया इति दण्डनीति:) । According to others the विद्याs are fourteen in number, such as—"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर: । धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश" ॥ Political economy is sometimes included in politics—as noticed by Chitrabhānu. See Extracts.

विवेकिनी – Adj. to मति: । वि – विच् + घञ् भावे = विवेक: ; power of discrimination सा अस्त्यस्या: इति विवेक + इनि (नित्ययोगे), स्त्रियाम् ङीप् = विवेकिनी । With the abiding quality of discrimination.

नृप —सम्बोधने १मा । नॄन् पाति इति नृ – पा + क (कर्तरि) ।

विद्यासु — विषयाधिकरणे सप्तमी ; branches of knowledge. See चतसृषु ।

निरूढिम्—Obj. to आगता । नि – रुह + क्तिन भावे = निरूढि: ; proficiency.

आगता—Adj. to मति: ; attained आ – गम् + क्त कर्तरि ; स्त्रियाम् ।

कथम्—अव्यय । किम् + थमु ; how.

एत्य—आ – इ + ल्यप् ।

मति:—मन्यते अनया, मननं वा इति मन + क्तिन् । Nom. to the verb अवसीदति ।

विपर्ययम्—Obj. to एत्य । वि – परि + इण + अच् भावे तम् ; change for the worse.

करिणी--Nom. to अवसीदति। करः अस्ति अस्याः इति कर+इनि मत्वर्थे, स्त्रियाम् ङीप्।

पङ्कम्—Obj. to एत्य ; mud.

अवसीदति—Sinks low. मतिपक्षे—becomes dull. करिणीपक्षे—perishes. अव–सद्+लट् ति।

Ch. of Voice—......आगतया विवेकिन्या मत्या करिण्या इव......अवसद्यते।

Remark—In the second half of this verse the figure of speech is उपमा (for def. See St. 3). Here मति is compared to a करिणी and विपर्यय to पङ्क।

The decline of your prowess is really lamentable.

विधुरं किमतः परं परै-
रवगीतां गमिते दशामिमाम्।
अवसीदति यत् सुरैरपि
त्वयि सम्भावितवृत्ति पौरुषम्॥ ७॥

Prose—त्वयि परैः इमाम् अवगीता दशां गमिते (सति) सुरैरपि सम्भावितवृत्ति पौरुषम् यत् अवसीदति, अतःपरं विधुरं किम्।

Beng.—শত্রু হইতে এইরূপ ঘৃণিত অবস্থায় পাতিত হইয়া আপনার সেই দেবশ্লাঘ্য পৌরুষ যে বিলুপ্ত হইতেছে—ইহা অপেক্ষা কষ্টকর আর কি আছে?

Eng. Equiv.—विधुरं किमतः परम्—what is more lamentable than that. परैः—by the enemies. अवगीताम्—deplorable. गमिते—reduced. दशामिमाम्—this plight. अवसीदति—deteriorate. सुरैः अपि—even by gods. त्वयि—your. सम्भावितवृत्ति - praised. पौरुषम्—prowess.

Eng.—What is more lamentable than that your prowess, once praised even by gods, should thus deteriorate when you are reduced to this deplorable plight by your enemies.

Expl.—Gods once valued your prowess and you deserved that singular honour. But now you are reduced to this hateful plight by your enemies. More than this, your prowess has deteriorated ; and

this seems to me to be the most bitter and unfortunate thing in your case. High-spirited men never part with their valour even when they are put in adverse situations.

Malli.—किं नश्छिन्नमिदानीं येन इत्थम् उपालभ्यते इत्यवाह—विधुरमिति। त्वयि परै: शत्रुभि: इमाम् ईदृशीम् अवगीताम् गर्हिताम्। "अवगीतश्च निर्वादे मुहुर्दृष्टे च गर्हिते" इति विश्व:। दशां गमिते प्रापिते सति। मरैरपि सम्भावितवृत्ति बहुकृतप्रसारम् अथवा निश्चितसद्भावम्, पौरुषम् पुरुषकार:। युवादित्वादण्प्रत्यय:। अवसीदति नश्यतीति यत् अत:परम् अतोऽन्यत् अधिकं किं विधुरम्, किं कष्टम्? न किञ्चिदित्यर्थ:। "विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि" इति वैजयन्ती। अस्तीति शेष:। "अस्तिर्भवन्तीपर:, प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ति" इति भाष्यकार:। भवन्तीति लट: पूर्वाचार्याणां संज्ञा। यत् पुरुषकारस्य दर्दशा या च शत्रुकृता, तदुपरि महत् कष्टं, तच्च त्वदुपेक्षया इति उपालभ्यसे इत्यर्थ:।

Notes on Malli.—(1) किं न:......उपालभ्यते—What is lost unto us for which I am being so criticised?

(2) यत् पुरुषकारस्य......उपालभ्यसे—This sad plight of your prowess and that is brought by your enemies—which again is due to your indifference—for this reason you are criticised.

Extracts from other Commentaries—"......अनभिव्यक्तसत्त्वरज: सामान्यरूपम् भाववस्तु अभिदधतां शब्दानां नपुंसकलिङ्गता प्रायेण प्रयोगेषु दृश्यते। विधुरमिति। ......स्वकाले अदर्शनमेव पौरुषस्यावसादो, न सर्वदेति तदुचितं कालमाह—अवगीतां दशां परैर्गमित इति।......इमामनुभूयमानां राज्यभ्रंशवनवासादिरूपां भूशयनादिशोच्यत्वं शब्दहुला-मित्यर्थ:"—चित्रभानु:। Generally used as an adj. but here as a noun

Notes—विधुरम्—विगता धू: कार्यभार: अस्य इति विधुरम्—miserable. The समासान्त अ comes in by the rule "ऋक्-पूर्-अप्-धू: पथामानक्षे"। "वैकल्येऽपि च विश्लेषे विधुरं विकले विधु"—त्रिकाण्डशेष:।

किम्—Adj. to विधुरम्। Verb अस्ति understood acc. to the dictum of भाष्यकार as quoted by Malli. The root अस्ति in present tense is taken to be understood though not mentioned after a third person.

अत:परम्—अत: अस्मात् परम् अधिकम्—The idea is—what is more painful than this?

परै:—अनुक्ते कर्तरि तृतीया ; by the enemies.

अवगीताम्—Adj. to दशाम् ; ill spoken of ; i. e., deplorable. अव – गै + क्त, कर्मणि स्त्रियां टाप् ; ताम् ।

गमिते—Adj. to त्वयि ; verbal adjective : गम् + णिच् + क्त कर्मणि । The process of change is thus :—

Non-causal active = त्वं दशां गतवान् ।

Causal active = परे त्वां दशां गमितवन्त: (त्वां takes २या by the rule "गतिबुद्धि......etc."

Causal passive—परै: त्वं दशां गमित: ।

दशाम्—Obj. to the verb गमिते । दशा means plight. "दशा वर्त्यामवस्थायाम् वस्त्रान्ते भूम्नि पुंस्त्रियो:" इति रभस: ।

अवसीदति—अव – सद् + लट् ति । Nom. पौरुषम् ; deteriorate.

सुरै:—अनुक्ते कर्तरि तृतीया । सुरै: is grammatically connected with the word सम्भावितवृत्ति inseparably. But here the separation has been allowed on the authority of the dictum "सापेक्षत्वेऽपि गमकत्वात् समास:" ।

त्वयि—भावे ७मी by the rule "यस्य च भावेन भावलक्षणम्" ।

सम्भावितवृत्ति—Adj. to पौरुषम् । सम्भाविता वृत्तिर्यस्य । Malli gives two interpretations (1) बहुकृतप्रसारम्—whose display was much appreciated (2) निश्चितसद्भावम्—of undoubted presence.

पौरुषम्—पुरुषस्य भाव: कर्म तेजो वा इति पुरुष + अण् by the rule "हायनान्तयुवादिभ्योऽण्" । The uncompounded पुरुष is included in the युवादि group.

Ch. of Voice—विधुरेण केन अत: परेण (भूयते)......सम्भावितवृत्तिना पौरुषेण अवसद्यते ।

Remark—In परं परै: we have alliteration (अनुप्रास) ।

One should consider carefully the rise and fall of his enemies.

द्विषतामुदय: सुमेधसा
गुरुरस्वन्ततर: सुमर्षण: ।
न महानपि भूतिमिच्छता
फलसम्पत्प्रवण: परिक्षय: ॥ ८ ॥

Prose—भूतिमिच्छता सुमेधसा गुरुः (अपि) अस्तन्ततरः द्विषताम् उदयः सुमर्षणः। महानपि परिक्षयः फलसम्पत्प्रवणः न (सुमर्षणः)।

Beng.—শত্রুর উন্নতি আপাততঃ অধিক পরিমাণে হইলেও উহা যদি ক্ষয়োন্মুখ হয়, তাহা হইলে অভ্যুদয়লাভার্থী সুধী ব্যক্তি উহা উপেক্ষা করিয়া থাকেন ; কিন্তু তাহার অবনতি আপাততঃ একান্ত গুরুতর হইলেও যদি ফলসিদ্ধ্যুন্মুখ হয়, তাহা উপেক্ষা করা উচিত নহে।

Eng. Equiv.—द्विषताम्—of the enemies. उदयः—prosperity. सुमेधसा—wise. गुरुः—great. अस्तन्ततरः—bordering on decay. सुमर्षणः—should endure. महान् परिक्षयः—decline. भूतिमिच्छता—by onewho desires his own good. फलसम्पत्प्रवणः—which is likely to be crowned with success.

Eng.—The wise person who desires his own good, should endure the prosperity of his enemy, though great, if it is bordering on decay ; but he should not tolerate his (enemy's) decline, if it is likely to be crowned with success.

Expl.—The secret of statesmanship is the pursuit of a well-lined policy with wise deliberation. The prosperity of the enemy if it is sure to have its bad end—can be overlooked. In that case the rise of the enemy, though great, is sure to meet its doom. But on the other hand, if the decline of the enemy promises sure prosperity in the end, then one should not close his eyes against it ; and if he tolerates it, he will fall an easy prey in the hand of his powerful enemy.

Malli.—अथ उपेक्षाकालत्वात् इयम् उपेक्षा इत्याशङ्क्य नायमुपेक्षाकाल इति वक्तुं तदेव तावत् श्लोकद्वयेन विविनक्ति—द्विषतामिति। भूतिम् उदयम् इच्छता। शोभना मेधा यस्य तेन सुमेधसा सुधिया "नित्यमसिच् प्रजामेधयोः" इति असिच्-प्रत्ययः। गुरुः महानपि अस्तन्ततरः अत्यन्तदुरन्तः अपायोन्मुख इत्यर्थः। द्विषतामुदयः वृद्धिः सुखेन मृष्यते इति सुमर्षणः सुसहः, उपेक्ष्य इत्यर्थः। स्वनाशे तु दुर्मर्षण इति भावः। "भाषायां शासि—"इत्यादिना खलर्थे युच्-प्रत्ययः। महानपि फलसम्पत्प्रवणः फलसिद्ध्युन्मुखः। "प्रनिरन्तः—" इत्यादिना णत्वम्। परिक्षयो न सुमर्षणः न उपेक्ष्य इत्यर्थः। अन्यथा तु उपेक्ष्य इति भावः।

न हि उदय एव प्रतीकार्यः, न च क्षय एव उपेक्ष्यः, किन्तु स्वन्तत्वासुन्नत्वाभ्याम् उभावपि प्रतीकार्यौ उपेक्ष्यौ च भवत इत्यर्थः ।)

Notes on Malli.—(1) अथ......विविनक्ति –"Now is the time for endurance and hence this toleration"—apprehending this and also to say that this is not the time for toleration he, (Bhīma) proceeds to make his statement in the following two verses—

(2) न हि उदय.........भवत:—Not that rise is to be counteracted and fall is to be neglected, but both rise and fall are to remedied and tolerated according as they are conducive to good and bad ends.

Extracts from other Commentaries—"......उपायापायादितत्त्व-विवेचननिपुणा बुद्धिः मेधाशब्देन उच्यते ।......सुमेधसेत्यनेन तरस्विनेति । तेन नयबलाव-लम्बेन, न विक्रमावलम्बेन इति प्रतीयते ।......परित: सर्वत: क्षय: परिक्षय: । स्वाम्यमात्य-जनपद-दुर्गकोशबलमित्रेषु अवस्थित इत्यर्थः ।......परमतमभ्युपगमैवमुक्तम् । बार्हस्पत्यानाम् आत्मोदय साक्षात् फलं, परज्यानिरानुषङ्गिकम् ; औशनसानां त परज्यानि: साक्षात् फलं, आत्मोदय आनुषङ्गिकम्"—चित्रभानु: ।

Notes—द्विषताम्—द्विष् + शतृ = द्विषत्, षष्ठी बहुवचन । Here the affix शतृ forms a noun by the rule "द्विषोऽमित्रे" ।

उदय:—उक्ते कर्मणि १मा । उत् – इ + अच् भावे = उदय: ; prosperity.

सुमेधसा—अनुक्ते कर्तरि तृतीया । सु शोभना मेधा यस्य स: (बहुव्रीहि) तेन । The affix असिच् is added to the word मेधा (making the base as सुमेधस्) by the rule "नित्यमसिच् प्रजामेधयो:" which means that the समासान्त affix असिच् (अस्) comes invariably after प्रजा and मेधा, final in a बहुव्रीहि when the particles नञ्, दुस् and सु precede them. "अस्वरितत्वादेव अन्यतरस्यांग्रहणानर्नु-वृत्तिसिद्धौ नित्यग्रहणम् अन्यतो विधानार्थम् ; तेन 'अल्पमेधस:' इति सिध्यतीति वृत्तिकारादय:" (तत्त्वबोधिनी) ।

गुरु:—Adj. to उदय: ; great.

अस्वन्ततर:—Adj. to उदय: । सु शोभन: अन्त: यस्य (बहुव्रीहि) = स्वन्त: । न स्वन्त: (नञ्तत्) = अस्वन्त: । अतिशयेन अस्वन्त: = अस्वन्त + तरप् । "तर does not express comparison here but merely indicate excess" (Kāle).

सुमर्षणः—Adj. to उदयः। सुखेन मृष्यते इति सु+मृष्+युच् (अन), कर्मणि by the Vārttika "भाषायां शासि-युधि-दृशि-धृषि-मृषिभ्यो युच् वाच्यः"—which can be easily brooked. Here the affix युच् is used in the sense of खल् and hence its subject सुमेधसा is put in the instrumental, because the genetive is barred by the rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्"।

भूतिम्—Obj. to इच्छता। भू+क्तिन् भावे ; prosperity, good. "भूतिर्भस्मनि सम्पदि"।

इच्छता—Adj. to सुमेधसा। इष्+शतृ, तृतीया १वचन ; desiring.

फलसम्पत्प्रवणः—Adj to परिचयः। फलमेव सम्पत् (कर्मधारय) or फलस्य सम्पत् (षष्ठीतत्) ; तत्र प्रवणः (७मीतत्) ; प्रवण means inclined—"प्रवणः क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे" इत्यमरः। Bhānuji thus derives the word—"प्रवन्ते अनेन अत्र वा। 'प्रुङ्गतौ' ल्युट्" : The dental न of वन is changed into cerebral ण after प्र, निर्, अन्तः, शर, इक्षु, प्लक्ष, आम्र, कार्ष्य, खदिर and पीयूक्षा, even when it does not denote a संज्ञा ; cf : "प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि"।

परिचयः—उक्तं कर्मणि १मा। परि–चि+अच् भावे ; loss in स्वामी, अमात्य etc., as noted by Chitrabhānu—See Extracts.

Ch. of Voice—......उदयेन......गुरुणा अस्खलन्तरेण सुमर्षणेन (भूयते) ..... महतापि फलसम्पत्प्रवणेन परिचयेन (सुमर्षणेन भूयते)।

Remark—For similar idea, cf : "आत्मोदयः परग्लानिर्द्वयं नीतिरितीयती। तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते"॥—माघः।

One can wait only when the fall of the enemy is imminent and his own success sure.

अचिरेण परस्य भूयसीं
विपरीतां विगणय्य चात्मनः।
क्षययुक्तिमुपेक्षते कृती
कुरुते तत् प्रतिकारमन्यथा ॥ ८ ॥

Prose—कृती परस्य क्षययुक्तिम् अचिरेण भूयसीम् आत्मनश्च (क्षययुक्तिम्) विपरीतां विगणय्य उपेक्षते, अन्यथा तत्प्रतिकारं कुरुते।

Beng.—শত্রুর অবনতি আশুভাবিনী ও পরিণামে শোচনীয় হইবে এবং আপনার অবনতি বহুবিলম্বে ঘটিবে ও স্বল্প হইবে, যদি এইরূপ বোধ হয় তাহা হইলে কৃতী পুরুষ তদ্বিষয়ে উপেক্ষা করেন। কিন্তু ইহার বিপরীত হইলে তৎক্ষণাৎ প্রতিকার করিয়া থাকেন।

Eng. Equiv.—अचिरेण—immediate. परस्य—of the enemy. भूयसीम्—of serious consequence. विपरीतां—just the reverse. विगणय्य—considering. आत्मन:—for his own. चययुक्तिम्—decline. उपेक्षते—remains silent. कृती—wise man. कुरुते—takes immediate steps. तत्प्रतिकारम्—to counteract the same. अन्यथा—otherwise.

Eng.—The wise man, considering that the decline of the enemy is immediate and of serious consequence, and that for his own just the reverse, remains silent; but, if otherwise, he takes immediate steps to counteract the same.

Expl.—Time is no doubt the essential factor in politics. Yet it all depends on the wise calculation whether a particular time is fit for action or silence. Taking our case, the prospect of the enemy's decline is not very bright, whereas we are in a deplorable state of misery and inaction. One can remain inactive, if the destruction of the enemy is sure to happen and on a large scale, while his own case is just the reverse of that. But if contrary is the case, no time should be lost in adopting proper measure for its remedy,—and ours is just the same case.

Malli.—अथ उभयोरपि मध्ये एकतरस्य उदयचययो: गतिमुक्त्वा इदानीं युगपत् परिचयागमे गतिमाह, अचिरेणेति। कृतमनेन इति कृती कुशल इत्यर्थः। "इष्टादिभ्यश्च" इति इनिप्रत्यय:। परस्य शत्रो: चययुक्तिं चयर्योगम् अचिरेण आशुभाविनीं भूयसीं दुरन्तां च तथा आत्मन: चययुक्तिं विपरीतां चिरभाविनीम् अल्पीयसीं च विगणय्य विचार्य। "ल्यपि लघुपूर्वात्" इत्ययादेश:। उपेक्षते। अन्यथा, उक्तवैपरीत्ये—परस्य चययुक्तौ अल्पीयस्यां स्वस्य भूयस्यां च सत्याम् इत्यर्थ:। तत्प्रतिकारम् तस्या: चययुक्ते: प्रतिकारम् अचिरेण आशु कुरुते। एवं सति यदा शत्रो: अभ्युदय: स्वस्य च अतिपरिचयो यथा अस्माकम् तदा किं वक्तव्यम्? सद्य: प्रतिकुरुते इत्यर्थात् सिद्धम् अनुसन्धेयम्।

Notes on Malli—(1) अथ......गतिमाह—Having stated the course of action to be followed in each case of the rise and fall of the contending parties, he now explains the path of action to be followed in the case of simultaneous decline of the two parties.

(2) एवं सति.........अनुसन्धेयम्—This being the case, when the enemy is in the rise and he is in the decline, as we are,—then what remains to be said ?—It is apparent that he takes immediate steps to counteract it.

Extracts from other Commentaries—"ननु धार्तराष्ट्रस्य उदययुक्तस्यापि अधर्महेतुकेन सूक्ष्ममतिगम्येन क्षयेण योगोऽस्त्येव। अस्माकं तु पराक्रमशक्तिवैकल्यकरः परिक्षयः स्फुट एव इति परात्मक्षययोगनिरूपणं सम्प्रति उपेक्षैव कर्तव्यतया प्रतिभाति, न पराक्रम इति शङ्कायामाह—अचिरेणेत्यादि।......एतदुक्तं भवति—अधर्महेतुकः सुयोधनस्य क्षयः कालान्तरे देहान्तरे वा भवेत्, क्षितिरक्षणादिभिः प्रायश्चित्तैरल्पीयान् वा भविष्यति। अस्माकं तु क्षयो वर्तमानो क्षितिरक्षणादिस्वधर्महान्या बन्धुमित्राद्युपेक्षया च महत्तरश्च भविष्यतीति परोदयात्मक्षयय पुष्कलतायाः प्रागेवास्माभिः पराक्रमः कर्तव्य एव इति।

Notes—अचिरेण—अव्यय। Adj. to क्षययुक्तिम् acc. to Malli.—immediate. Malli also construes the word with कुरुते, where the word is an adverb. न चिरेण (नञ्तत्)।

परस्य—of the enemy ; शेषे षष्ठी।

भूयसीम्—Adj. to क्षययुक्तिम् ; of serious consequence (दुरन्ताम्)। अतिशयेन बहु इति बहु+ईयसुन् स्त्रियाम् भूयसी। बहु is replaced by भू by the Sūtra—"बहोर्लोपो भू च बहोः"। "Here also ईयस् has no comparative force but indicates degree of intensity."—(Kāle).

विपरीताम्—Adj. to क्षययुक्तिम्—the reverse i. e., चिरभाविनीं and अल्पीयसीम् वि-परि-इ+क्त, स्त्रियाम्। विपरीताम् may also mean 'rise'—the opposite of क्षययुक्ति (fall). This seems to be a better explanation. But Malli's explanation is against it. He says "युगपत् परिक्षयागमे गतिमाह"। Chitrabhānu also follows Malli. Malli's explanation is contradictory to the saying—"जातमात्रं न यः शत्रुं रोगञ्च प्रशमं नयेत्। महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते"॥

विगणय्य—वि – गण + णिच् + ल्यप् ; considering. Here अय् replaces णिच् which comes after a short vowel by the rule "ल्यपि लघुपूर्वात्" ।

अययुक्तिम्—Obj. of विगणय्य । अयेन युक्तिः (तृतीयातत्) ताम् । इ + अच् = अयः । युज + क्तिन् = युक्तिः ।

उपेक्षते—उप – ईक्ष् + लट् ते । Nom. कृती ; remains silent. Here used intransitively.

कृती—In अमरकोष, कृती is a synonym for 'learned man', also 'expert man'. Bhānuji derives it in two ways :—प्रशस्तं कृतं कर्मास्य इति कृत + इनि (प्रशंसायाम्), or (2) कृतमनेन इति कृत + इनि by the rule "इष्टादिभ्यश्च" ।

कुरुते—कृ + लट् ते । Nom. कृती । Here the result of the action accrues to the agent hence the आत्मनेपद is by the rule "स्वरितञितः कर्त्रभिप्राये क्रियाफले" ।

तत्-प्रतिकारम्—Obj. to कुरुते । तस्याः (अययुक्तेः) प्रतिकारः (षष्ठीतत्) तम् । प्रति – कृ + घञ । Alt. form प्रतीकारः by the rule "उपसर्गस्य घञ्यमनुष्ये बहुलम्" ।

अन्यथा—अव्यय । अन्य + थाल् (प्रकारार्थे), when the case is contrary.

Ch. of Voice—कृतिना उपेक्ष्यते.........तत्प्रतिकारः क्रियते ।

Fortune forsakes the king who neglects the increasing power of his enemies.

अनुपालयतामुदेष्यतीं
प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां
जननिर्वादभयादिव श्रियः १० ॥

Prose – उदेष्यतीं द्विषतां प्रभुशक्तिम् अनीहया अनुपालयतां महीभुजां श्रियः जननिर्वाद-भयात् इव अचिरात् अपयान्ति ।

Beng.—যে নৃপতি উৎসাহশূন্য হইয়া শত্রুর বৃদ্ধিশীল প্রতাপ উপেক্ষা করেন, তাঁহার রাজশ্রী লোকাপবাদভয়ে ভীত হইয়াই যেন অবিলম্বে তাঁহাকে পরিত্যাগ করিয়া থাকেন ।

Eng. Equiv.—अनुपालयतां—overlook. उदेष्यतीं—increasing. प्रभु-शक्तिं—power (consisting of treasures and armies). द्विषतां—of their

enemies. अनीहया—through indolence. अपयान्ति—leaves. अचिरात्—soon. महीभुजां—kings. जननिर्वादभयात्—from fear of public censure. श्रियः—Fortune.

Eng. Fortune soon leaves those kings who overlook, through indolence, the increasing power of their enemies, as if from fear of public censure.

Expl.—Fickle is the nature of Fortune and it is difficult even for kings to maintain her stability. Fortune never remains with a weak and forgiving king, specially if he neglects the rising power of his enemy. The wealth and army of the king speak of his great power and they should be carefully watched. He who neglects them through indolence, is deserted by Fortune who leaves him as if from fear of public scandal arising out of her attachment to a feeble king.

Malli.—तथापि उपेक्षायाम् अनिष्टम् आचष्टे, अनुपालयतामिति—उदीय्यतीं वर्धिष्यमाणाम्। "आच्छीनद्योर्नुम्" इति विकल्पात् नुमभावः। द्विषतां प्रभुशक्तिं कोषदण्डजं तेजः। "स प्रभावः प्रतापश्च यत्तेजः कोषदण्डजम्" इत्यमरः। अनीहया अनुत्साहेन अनुपालयताम्। उपेक्षमाणानां महीभुजां श्रियः सम्पदः जननिर्वादभयात् निकृष्टपुरुषानुरागोत्थलोकापवादभयात् इव इति हेतूत्प्रेक्षा। अचिरात् अपयान्ति अपसरन्ति। यथाह कामन्दकः—"स्त्रीभिः षण्ड इव श्रीभिरलसः परिभूयते" इति। (अतः पराक्रमितव्यमिति भावः।)

Notes on Malli.—(1) यथाह कामन्दकः.........भावः—As Kāmandaka says—'The idle are forsaken by Fortune as eunuchs are by women'. Hence valour is to be shown—This is the idea. Cf. "यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला। यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः" ॥—Manu II. 158.

Extracts from other Commentaries—"अधर्महेतुको भावी सुयोधनस्य क्षयः कामं रक्षणादिभिर्धर्मविशेषैरल्पीयान् भवेद् नैव वा भवेत्। अस्माकं तु सैन्यममूहनसाधनस्य धनस्य क्षय एवोपलभ्यते, न तु प्रभुशक्तिक्षयो मित्रादिक्षयो वा। तस्मात् प्रभुशक्तियुक्तैः सुहृत्सहायैः अस्माभिः समयावसाने विक्रमो विधातुं शक्य इति युधिष्ठिरस्य शङ्कायामाह

अनुपालयतामित्यादिना ।......द्विषत्प्रभुत्वभङ्गाय उद्यममकुर्वतां अनिच्छतां च राज्ञां नैका ह्लाघ्यादिसन्निहेतुः श्रीरपयाति, गुणवन्विक्रमधर्मादिसन्निहितव: अन्या अपि श्रियोऽपयान्ति इति श्रिय इति बहुवचनेन द्योत्यते । उदेष्यतीमिति । नोदितामुद्यतीं वा । स्वल्पयैव प्रज्ञया निवार्यामित्यर्थः"—चित्रभानुः ।

Notes—अनुपालयताम्—Adj. to महीभुजाम् । अनु – पा + णिच् + शतृ, षष्ठी बहुवचन ; overlooking.

—उदेष्यतीम्—Adj. to प्रभुशक्तिम् । उद् – इ + लृटः स्थाने शतृ by the rule "लृटः सद् वा" । स्त्रियाम् ङीप् by the rule "उगितश्च" । Alt. form उदेष्यन्तीम् by the rule "आच्छीनद्योर्नुम्"—which means that when the affix शतृ comes after a verbal stem ending in अ or आ, it may optionally take the augment case-ending औ and before the feminine affix long ई। "उदेष्यतीं means 'which will rise and not 'risen or 'already rising' i. e., which can be checked by the slightest effort"—Chitrabhānu.

प्रभुशक्तिम्—Obj. to अनुपालयताम् । प्रभोः शक्तिः (षष्ठीतत्) ताम् । प्रभुशक्ति is one of the three powers of a king consisting in wealth and army. The other two are मन्त्र and उत्साह । "सः प्रतापः प्रभावश्च यत्तेजः कोषदण्डजम्"—Amara. शक् + क्तिन् भावे = शक्तिः ।

द्विषताम्—द्विष + शतृ by the rule "द्विषोऽमित्रे" ; षष्ठी बहुवचन ।

अनीहया—प्रकृत्यादित्वात् or हेतौ तृतीया । न ईहा (चेष्टा) (नञ्तत्) तया ; by inactivity ; through indolence, ईह् + अ स्त्रियाम् आप् = ईहा ।

अपयान्ति—Nom. श्रियः । अप – या + लट् अन्ति ; leaves.

अचिरात्—अव्यय । न चिरात् (नञ्तत्) । Adv. to अपयान्ति ।

महीभुजाम्—शेषे षष्ठी । महीं भुनक्ति पालयति इति उपपदसमासे मही - भुज् + क्विप् कर्तरि ; तेषाम् ।

जननिर्वादभयात्—हेतौ पञ्चमी । जनानां निर्वादः (षष्ठीतत्) ; तस्मात् भयम् (पञ्चमीतत्) तस्मात् । निर् – वद् + घञ् भावे = निर्वादः, scandal. भी + अच् – भयम् । The infamy which may arise out of her attachment to a feeble king. See Malli.

श्रियः—१मा बहुवचन। श्रि + क्विप् = श्री। Fortune. For the significance of the plural number in श्रियः, see Extracts from (Chitrabhānu).

Ch of Voice—श्रीभिः.... .अपयायते।

Remark—The figure of speech in this verse in उत्प्रेक्षा which is defined as—"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना" (साहित्यदर्पणे X. 57) i. e., when a thing under description (प्रकृत or उपमेय) is imagined to be identical with a thing which is not under description (अप्रकृत or उपमान) but similar to it, the figure is उत्प्रेक्षा। The term सम्भावना (which is different from सन्देह and निश्चय) is explained as 'उत्कटैककोटिकः संशयः' i. e., a conception which does not amount to certainty. Here the उत्प्रेक्षा is वाच्य because the word इव has been used. Cf :—मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः" ॥ (काव्यादर्श II. 234). Here also the उत्प्रेक्षा is हेतूत्प्रेक्षा as the cause of Fortune's departure has been imagined to be such (i. e., from the fear of public scandal). It is to be noted that in उत्प्रेक्षा the अध्यवसाय (i. e., विषय engulfed by विषयिन्) is आहार्य and साध्य।

People respect the rising king though devoid of former glory.

क्षययुक्तमपि स्वभावजं
दधतं धाम शिवं समृद्धये।
प्रणमन्त्यनपायमुत्थितं
प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

Prose—क्षययुक्तमपि स्वभावजं शिवं धाम दधतं, समृद्धये उत्थितम् अनपायं नृपं प्रजाः प्रतिपच्चन्द्रमिव प्रणमन्ति।

Beng.—(কিন্তু) যে রাজা ক্ষীণভাবাপন্ন হইয়াও সকলের আহ্লাদকর নৈসর্গিক তেজ ধারণপূর্ব্বক বৃদ্ধির নিমিত্ত উদ্যুক্ত হন, প্রজাগণ প্রতিপদের চন্দ্রের ন্যায় বৃদ্ধিশীল সেই রাজাকে প্রণাম করে।

Eng. Equiv.—क्षययुक्तमपि—though divested of former glory. स्वभावजं—natural. दधतं—bearing. धाम—lustre. शिवं—delightful. समृद्धये -for advancement. प्रणमन्ति—worship. अनपायम्—rising. उत्थितं—ready. प्रतिपच्चन्द्रम्—new-born moon. प्रजाः—subject. नृपम्—king.

Eng.—The subjects worship the rising king as they do the new-born moon, bearing natural and delightful lustre, though divested of former glory, and ready for advancement.

Expl.—The enterprising king is always an object of worship to the people. People never regard an idle king though full of glory. On the contrary, they bow down to that king who, though grown weak in power, makes constant effort to regain his lost glory. They show respect to that king who bears his natural and beneficial majesty, just as they do to the new-born moon. Since, just as the moon, in the beginning of the bright lunar fortnight, is bound to wax gradually, a king, though shorn of glory but showing prowess, is sure to come to sucess in due course—slowly but surely. Hence though you are in bad plight now, you may command the respect of the people if you be enterprising.

Malli.—ननु परिक्षीणः कथं प्रबलेन अभियुज्यते ? इत्यत्राह—क्षयेति । क्षययुक्तमपि तथा क्षीणमपि सन्तं, स्वभावजं सहजं शिवं सर्वलोकाह्लादकं धाम चारु तेजः प्रकाशञ्च दधतं समृद्धये वृद्ध्यर्थम्, उत्थितम् उद्युक्तम् वर्द्धिष्णुम् उत्सहमानमिति यावत् । अन्यत्र उत्थितम् उदितम् अत एव अनपायम् अविनाशिनम् वर्द्धिष्यमाणमित्यर्थः । नृपं प्रजाः प्रतिपच्चन्द्रमिव द्वितीयाचन्द्रमिवेत्यर्थः । प्रतिपच्छब्देन द्वितीयाग्रहणम्, प्रतिपदि तस्य अदृश्यत्वादिति भावः । प्रणमन्ति प्रह्वीभावेन वर्तन्ते इति भावः । चन्द्रं तु नमस्कुर्वन्ति । क्षीणस्यापि उत्साहः कार्यसिद्धेः निदानमित्यर्थः । "श्रियं हि सततोत्साही दुर्बलोऽपि समश्नुते" इति कामन्दकः ।

Notes on Malli.—(1) ननु परिक्षीणः.........आह—How can a weak man cope with the strong ? To this he replies—

(2) क्षीणस्यापि.........कामन्दकः—The perseverance even of a weak man is conducive to success. As Kāmandaka has said—'A man though weak, enjoys fortune, if he is energetic'.

Extracts from other commentaries.—"......क्षययोग-प्रजावन्द्यत्वयोरेकाश्रयत्वे विरोधमपिशब्दो द्योतयति ।......प्रतिपच्चन्द्रः प्रतिपदि दृश्यमान इत्यर्थात् सिध्यति । अस्यां तिथौ चन्द्रः पूर्वावस्थाप्रतिकूलामवस्थाम् आपद्यते इत्यर्थयोगेन प्रतिपच्छब्देन

पश्चादिस्थितिरुच्यते ।......प्रतिपदि हि प्रतीच्यां चन्द्रो दृश्यते न प्राच्याम् । अनपायमुत्थितमिति, चन्द्रस्य अपाये निरोधे हेतवो मेघा अपायशब्देन विवक्ष्यन्ते । विमुक्तमेघादिनिरोधं दिवि दीप्यमानमित्यर्थः । तेन चन्द्रस्य शारदत्वं द्योत्यते ।.........आह्लादकत्वादयः अनुरागहेतवः गुणाश्चन्द्रे प्राचुर्येण दृश्यन्ते न तु भयहेतवः प्रतापादयः । समुदितास्ते इयेऽपि नृपे निरीक्ष्यन्त इति नृपस्य चन्द्रात् व्यतिरेकं द्योतयितुं चन्द्रसादृश्यमुक्तं न तु तद्भावरूपणं कृतम । शास्त्रचक्षुष एव चन्द्रं प्राच्यामुदेष्यन्तमुद्यन्तमुदितं च पश्यन्ति न मांसचक्षुषः । मांसचक्षुषस्तु मनुष्या विमुक्तमेघादिनिरोधं स्फुटतराकृतिं प्रतीच्यां पश्चात् चन्द्रं पुरो निरीक्ष्यैव तस्योदयं प्रतियन्ति । एवं सूक्ष्मदर्शिनो मुनय एव सूक्ष्मं तदोदयं पश्यन्ति, न स्थूलदर्शिनो मनुष्याः"—चित्रभानुः ।

Notes—क्षययुक्तम्—Adj. to नृपम् and प्रतिपच्चन्द्रम् । क्षयेण युक्तः (तृतीयातत्) तम् । क्षि + अच् भावे = क्षयः । युज् + क्त = युक्तः ।

अपि—अव्यय । अपि here indicates विरोध as Chitrabhānu says. (See Extracts).

स्वभावजम्—Adj. to धाम । स्वः भावः (कर्मधा) or स्वस्य भावः (षष्ठीतत्), तस्मात् जायते इति उपपदसमासे स्वभाव – जन् + ड कर्तरि ; natural.

दधतम्—Present participial adj to नृपम and प्रतिपच्चन्द्रम् । धा + शतृ = दधत् ; धा an अभ्यस्त root does not take नुम् by the rule "नाभ्यस्ताच्छतुः" ।

धाम—Obj. to दधतम् । (1) नृपपक्षे—The valour of a Kṣattriya. (2) चन्द्रपक्षे—lustre.

शिवम्—Adj. to धाम ; auspicious.

समृद्धये—४र्थी by the rule "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" । समृद्धिं लक्ष्मीं । सम्—ऋध + क्तिन् ; fortune. (1) नृपपक्षे—for increasing his power ; (2) चन्द्रपक्षे—for waxing.

प्रणमन्ति—Worship ; प्र – नम् + लट् अन्ति ।

अनपायम्—Adj. to नृपम् and चन्द्रम् । अप – अय् + घञ् भावे = अपायः । न विद्यते अपायः यस्य सः (बहुव्रीहि) तम् । Alt. form अविद्यमानापायम् by the Vārttikā—"नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" ।

उत्थितम्—Adj. to नृपम् and चन्द्रम् । उत् – स्था + क्त कर्तरि । (1) नृपपक्षे—making efforts ; (2) चन्द्रपक्षे—rising.

प्रतिपच्चन्द्रम्—प्रतिपदः चन्द्रः (षष्ठीतत्) तम्। प्रतिपद्यते उपक्रम्यते अनया मासादिः इति प्रति-पद्+क्विप्=प्रतिपद्। Malli says that as the moon is not visible on the प्रतिपद्, we should take प्रतिपद् to mean the first day after new moon when the moon becomes visible (i. e , द्वितीया). Chitrabhānu has, however, taken much pains to establish his imaginary conclusion that only sages of super-subtle vision see the moon on the first day of the bright lunar fortnight, and not ordinary men. He maintains that acc. to Śāstras the moon is visible on प्रतिपद् which, however, is invisible to the normal human eye. (See Extracts). Cf. "प्रतिपदि चन्द्रदर्शनकारणं यथा। 'अमावस्याघटी शोध्या षष्ट्याहर्मानसंयुता। सूर्यराहुघटीभ्यश्चेदधिका दृश्यते शशी' ॥—इति ज्योतिषम्' (शब्दकल्पद्रुमः, p. 713). But, after all, here the ordinary beings are taken into account by the Poet (cf : the exp. प्रजाः) and not sages having a divine vision or vision in the form of scriptures (शास्त्रदृष्टि). Hence Malli's interpretation holds all right.

प्रजाः—Nom. to प्रणमन्ति ; subjects. प्र-जन्+उ कर्तरि स्त्रियाम्।

नृपम्—Obj. to प्रणमन्ति। नॄन् पाति इति उपपदसमासे नृ-पा+क कर्तरि।

Ch. of Voice—द्वययुक्तः......दधत्......अनपायः उत्थितः प्रतिपच्चन्द्र इव प्रजाभिः नृपः प्रणम्यते।

Remark—The figure of speech in this verse is उपमा (for def. see St. 3). Here the king is compared to the new moon, The उपमा is enriched by श्लेष, as all the epithets qualify moon and the king. The श्लेष (for def. St. 3) is here the subordinate figure (अङ्ग). Here, the श्लेष is अर्थश्लेषः। In द्वययुक्तमपि we have the figure विरोध which is thus defined—"जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः। क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः। विरुद्धमेव भासेत विरोधोऽसौ दशाकृतिः" ॥ (साहित्यदर्पण X. 89). Here the विरोध is between a द्रव्य (king) and क्रिया (worshipping).

Policy, coupled with energy, is the real source of treasures and armies.

प्रभवः खलु कोशदण्डयोः
कृतपञ्चाङ्गविनिर्णयो नयः।
स विधेयपदेषु दक्षतां
नियतिं लोक इवानुरुध्यते ॥ १२ ॥

Prose—कृतपञ्चाङ्गविनिर्णयः नयः कोशदण्डयोः प्रभवः खलु, स विधेयपदेषु लोकः नियतिमिव दक्षताम् अनुरुध्यते ।

Beng.—যিনি সহায়াদি পাঁচটি অঙ্গ বিবেচনা করিয়া নীতিপ্রয়োগ করেন, তিনি প্রভুশক্তি-লাভে সমর্থ হন ; কিন্তু কৃষিকার্য্য-প্রবৃত্ত পুরুষ যেমন দৈবের মুখাপেক্ষা করে, সেইরূপ নীতিও প্রয়োগবিষয়ে প্রযোক্তার উৎসাহ অপেক্ষা করে।

Eng. Equiv.—प्रभवः—source. खलु—really. कोशदण्डयोः—of treasures and armies. कृतपञ्चाङ्गविनिर्णयः—based on the ascertainment of its five constituents. नयः—policy. विधेयपदेषु—in matters to be executed. दक्षता—unflinching energy. नियति—Providence. लोकः—husbandry. अनुरुध्यते—depends (for success).

Eng.—Policy, based on the ascertainment of its five constituents, is really the true source of treasures and armies. This policy, however, depends (for success) on unflinching energy in matters to be executed, as does husbandry on Providence.

Expl.—Policy, if well understood, is the source of power, Thus a king, desiring success, should study the five constituent parts of polity. He should first of all secure means to commence his planned operations ; then he should secure an efficient army and vast wealth without which all his enterprise will go in vain. Next he should consider the time and place of his own action favourable to him. He should remove all obstacles in his path of progress and make good provision to meet any kind of emergency. All this done, he is sure to succeed. But intellectual conviction of political science is useless, unless it is coupled with will and energy. Just as people, engaged in agriculture, depend for success on Providence, so policy depends on prompt and energetic action for sure success.

Malli.—ननु प्रभुशक्तिमूलस्य उत्साहः कुत्र उपयुज्यते ? इत्यत्राह—प्रभव इति। कृतपञ्चाङ्गविनिर्णयः, कर्मणाम् आरम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपात-प्रतीकारः, कार्यसिद्धिश्च इति पञ्चाङ्गानि। यथाह कामन्दकः—"सहायाः साधनोपाया विभागो देशकालयोः। विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते" ॥ इति पञ्चानाम् अङ्गानां विनिर्णयः।

"तद्धितार्थ—" इत्यादिना उत्तरपदसमासः। कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः नयः नीतिः मन्त्र इति यावत्। कोषोऽर्थराशिः। "कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः। दण्डश्चतुरङ्गसैन्यम्। "दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे। यानाज्ञायां सैन्यभेदे" इति वैजयन्ती। तयोः कोषदण्डयोः प्रभुशक्तेरित्यर्थः। प्रभवति अस्मादिति प्रभवः कारणम् खलु। "ऋदोरप्"। स नयः नीतिशास्त्रं विधेयपदेषु कार्यवस्तुषु। "पदं व्यवसित-त्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः। दक्षतां चिप्रकारित्वम् उत्साहमित्यर्थः। लोकः कृष्यादि-प्रवृत्तो जनः नियतिं दैवम् इव। "नियतिर्नियमे दैवे" इति विश्वः। अनुरुध्यते अनुसरति। रुधेर्दैवादिकात् कर्तरि लट्। मन्त्रस्यापि मूलमुत्साहः, तन्मूलायाः प्रभुशक्तेः मूलमिति किमु वक्तव्यम्? अतः स एव आश्रयणीयः, यतः नक्तन्दिवं मन्त्रयतः तस्यापि प्रभोः निरुत्साहस्य न किञ्चित् सिध्यतीति।)

Notes on Malli.—(1) ननु......इत्यत्राह—What is the utility of energy in the case of a powerless king? To this he replies –

(2) मन्त्रस्यापि.........सिध्यन्ति—Energy, is the root (cause) of counsel what to speak of king's power (प्रभुशक्ति) which originates from counsel? Hence that (enterprise) is to be resorted to; because that king never succeeds, who, though engaged in counsel day and night is without any enterprise

Extracts from other Commentaries.—"......नयशास्त्रं नयशास्त्रो पस्कृता मतिर्वा नयशब्देन विवक्ष्यते......कदाचित् नयो दक्षतामनुवर्तते कदाचित् दक्षता नय इत्यनियमं दृष्टान्तेन निराकरोति, नियतिं लोक इवेति।......कदाचिदपि दैवम् अनाश्रितपौरुषं न फलति। प्रतिकूलेन दैवेन पौरुषमेव प्रतिहन्यते, न पौरुषेण दैवम्। तथा पराक्रमम् अनाश्रित्य नयो न फलति, प्रबलेन पराक्रमेण नयः प्रतिहन्यते"—चित्रभानुः।

Notes—प्रभवः—Predicate to नयः। प्रभवत्यस्मात् इति प्र–भू+अप् by the rule "ऋदोरप्"; source.

कोशदण्डयोः—कोशश्च दण्डश्च (द्वन्द्व) तयोः। कोशः=treasure, दण्डः=army कोशदण्ड is प्रभुशक्ति; cf. "सः प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्"।

कृतपञ्चाङ्गविनिर्णयः—Adj. to नयः। पञ्चानाम् अङ्गानां समाहारः (समाहारद्विगुः) = पञ्चाङ्गम्। The neuter is by the Vārttika "पात्राद्यन्तस्य न" (पात्रादेराकृतिगणत्वात्)। पञ्चाङ्गस्य विनिर्णयः (षष्ठीतत्)। Or पञ्चसंख्याकानि अङ्गानि (शाकपार्थिवादि

वदुत्तरपदलोपो कर्मधा)=पञ्चाङ्गानि; तेषां विनिर्णयः (षष्ठीतत्)। अतः पञ्चाङ्गविनिर्णयः यस्य येन वा सः (बहुव्रीहि)। Malli, however, expounds it as पञ्चानाम् अङ्गानां विनिर्णयः making it a उत्तरपदतत्पुरुष (द्विगु)। But this is against Bhaṭṭoji and his followers who say that an उत्तरपदसमास (the rule is "तद्धितार्थोत्तरपदसमाहारे च") is permissible only in the case of द्वन्द्व and बहुव्रीहि and not in the case of तत्पुरुष। Thus they openly reject a त्रिपदतत्पुरुष; cf. "कथं तर्हि 'त्रिलोकनाथः पितृसद्मगोचरः" इति कालिदासः, त्रिलोकशब्दस्य असंज्ञात्वात्। न च समाहारे द्विगुः, "द्विगोः" इति ङीप् प्रसङ्गात्। न च पात्रादित्वं कल्प्यम्। 'यदि त्रिलोकीगणनापरा स्यात्' इत्यादिप्रयोगाणाम् असंगत्यापत्तेः। न च 'उत्तरपदे' इति समासः। त्रिपदतत्पुरुषस्य इह दुर्लभत्वात्। अत्राहुः—लोकशब्दोऽत्र लोकसमुदायपरः। त्रावयवो लोकस्त्रिलोकः। शाकपार्थिवादित्वात् उत्तरपदलोपः।"—(तत्त्वबोधिनी)। We, therefore, do not prefer Malli who commits the same error in Raghu XIII. 20—त्रिमार्गगा।

The five constituent parts of polity are—(1) कर्मणाम् आरम्भोपायः—i. e., means for the commencement of operations; (2) पुरुषद्रव्यसम्पत्—support of men and money; (3) देशकालविभागः—considerations of of time and place; (4) विनिपातप्रतीकारः—removal of obstacles; (5) कार्यसिद्धिः—actual accomplishment of the final object. See also Kāmandaka, as quoted by Malli. वि—निर्—नी+अच् भावे = विनिर्णयः।

नयः—The science of politics. For derivation, see St. 3.

सः—Refers to नयः।

विधेयपदेषु—विषयाधिकरणे ७मी; in matters to be executed. विधेयानि पदानि (कर्मधारय), तेषु।

दक्षताम्—Obj. to अनुरुध्यते। दक्षस्य भावः इति दक्ष+तल् भावे स्त्रियाम् = दक्षता dexterity.

नियतिम्—Obj. to अनुरुध्यते; Providence. नियम्यते अनया इति नि—यम्+क्तिन् भावे स्त्रियाम्।

लोकः—Nom. to अनुरुध्यते। Malli takes it to mean the 'tiller of the soil'—i. e., husbandry.

अनुरुध्यते—Depends. अनु—रुध् (दिवादि)+लट् ते।

Ch. of Voice—प्रभवेन......—विनिर्णयेन नयेन (भूयते)। तेन.. ...दक्षता लोकेन नियतिः...... ।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here is नय compared with नौका and दक्षता with नियति। In विनिर्णयी नयः, we have अनुप्रास (alliteration) which is defined as—"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्" (साहित्यदर्पण X. 5) i. e., alliteration consists in the same consonants being repeated, even though the vowels may be different.

For similar idea, compare—"विहाय पौरुषं यो हि दैवमेवावलम्बते। प्रासाद-सिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसाः"॥ "सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्। सौगतानामिवात्मान्यो नास्ति मन्त्रो महाभृताम्॥"—quoted by Chitrabhānu.

Personal valour is the chief support of a man possessed of self-respect.

अभिमानवतो मनस्विनः
प्रियमुच्चैः पदमारुरुक्षतः।
विनिपातनिवर्तनक्षमं
मतमालम्बनमात्मपौरुषम्॥ १२॥ ५८

Prose—अभिमानवतः प्रियम् उच्चैः पदम् आरुरुक्षतः मनस्विनः आत्मपौरुषं विनिपातनिवर्तनक्षमम् आलम्बनं मतम्।

Beng.—বাঞ্ছিত উচ্চ পদবী লাভে ইচ্ছুক অভিমানসম্পন্ন মনস্বী ব্যক্তির স্বীয় পৌরুষই অনিষ্ট নিবারণের যোগ্য অবলম্বন।

Eng. Equiv.—अभिमानवतः—possessed of self-respect. मनस्विनः—high-minded. प्रियम्—much cherished. उच्चैः—elevated. पदम्—position. आरुरुक्षतः—wishing to attain. विनिपातनिवर्तनक्षमं—capable of removing all obstructions. मतम्—considered. आलम्बनम्—support. आत्मपौरुषम्—personal valour.

Eng.—In the case of a high-minded man, possessed of self-respect and wishing to attain his much cherished elevated position, personal valour is considered to be the (main) support which is capable of removing all obstructions.

Expl.—The weak only seek allies; but the strong are guarded by

their own valour. If you think that a man, without an ally, is helpless—even if he be enterprising—then you are wrong. A man of self-respect and courage never craves for other's support—which is humiliating in his eyes. His personal valour is deemed to be the mainstay which is capable of averting obstacles. Hence high-minded men who wish to attain their cherished lofty position, dispense with all others and rely on their own prowess alone.

Malli.—ननु सोत्साहस्य असहायस्य कथम् अर्थसिद्धिः ?—इत्यत्राह—अभिममानवत इति । अभिमानवतः मानधनस्य प्रियम् इष्टम् उच्चैः उन्नतं पदं स्थानं राज्यादिकम् आरुरुक्षतः आरोढुमिच्छतः प्राप्तुकामस्य मनस्विनः धीरस्य आत्मपौरुषम् स्वपुरुषकार एव विनिपातनिवर्तनक्षमम् अनर्थप्रतीकारसमर्थम् आलम्बनं सहकारि मतम् इष्टम् । यथा कस्यचित् तुरङ्गमारोहतः किञ्चित् पतनप्रतिबन्धकानुचरहस्तादिकम् आलम्बनं तद्वदिति ध्वनिः । किं पौरुषादन्यैः सहायैः शूराणाम् ?—इति भावः ।

Notes on Malli.—(1) ननु......अर्थसिद्धिः ?—How the accomplishment is possible for one who is helpless, though enterprising ?

(2) यथा कस्यचित्.........शूराणाम्—The suggestion is—just as hands of attendants etc., which prevent falling, is the support of one who is mounting a horse, so (is the valour for one who wish to attain his cherished high position). What, to the brave, is the need of any external help other than their own valour ?

Extracts from other Commentaries.—"......अभिमानवत इति । आत्मीयत्वेन वा सर्वस्मिन् आभिमुख्येन मननम् अभिमानः । सर्वावस्थासु परान् प्रति अप्रह्वताहेतुश्चित्तगुणोऽभिमान इति केचित् । सर्वानात्मीयतया अभिमन्यमानस्य स्वाधिकस्य अन्यस्य अदर्शनात् परान् प्रत्यप्रह्वता भवत्येवेति तत्रार्थान्तरम्"—चित्रभानुः ।

Notes—अभिमानवतः—Adj. to मनस्विनः । अभि सर्वतो मानः इति अभिमानः अभि – मन् + घञ् भावे । अभिमान + मतुप्, तस्य = अभिमानवतः । The म of मतुप् is changed into वकार by the rule "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" । अभिमान, as Chitrabhānu explains, is that high-spiritedness which regards all objects as referring to one's own self. (See Extracts).

मनस्विनः—षष्ठी by the rule "क्तस्य च वर्तमाने"। The affix क्त has been used in the present tense in मतम्। प्रशस्तं मनः अस्ति अस्य इति मनस्+विनि (प्राशस्त्ये) by the rule "अस्-माया-मेधास्रजो विनिः"। The affixes मतुप्, इन्, विन्, etc., are used in the following senses—"भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः"॥

प्रियम्—Adj. to पदम्; cherished. प्रीणातीति प्री+क कर्तरि।

उच्चैः—अव्यय; adj to पदम्। उच्चैः is often used as an adjective cf. 'उच्चैः कुलम्'—Śāk. IV. 17. 'यशः समुच्चैः'—Raghu II.

पदम्—Obj. to आरुरुक्षतः। "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः। Position.

आरुरुक्षतः—कृदन्त विण to मनस्विनः। आ–रुह्+सन्+शतृ, षष्ठी एकवचन; wishing to rise.

विनिपातनिवर्तनक्षमम्—Adj. to आलम्बनम्। विनिपातस्य निवर्तनम् (षष्ठीतत्); तत्र क्षमम् (सुप्सुपेति)। वि–नि–पत्+घञ् भावे = विनिपातः। नि–वृत्+ल्युट् भावे = निवर्तनम्। क्षमते इति क्षम्+अच् (पचाद्यच्) = क्षमः।

मतम्—मन्+क्त वर्तमाने by the rule "मतिबुद्धिपूजार्थेभ्यश्च"; considered. Nom. मनस्विनः which is placed in the sixth case-ending by the rule "क्तस्य च वर्तमाने"।

आलम्बनम्—Support, stay. आ–लम्ब्+ल्युट् कर्मणि, by the rule "कृत्यल्युटो बहुलम्"। विधेय to आत्मपौरुषम्—being in apposition.

आत्मपौरुषम्—उक्ते कर्मणि १मा। आत्मनः पौरुषम् (षष्ठीतत्); personal valour. पुरुषस्य भावः कर्म तेजो वा इति पुरुष+अण् by the rule—"हायनान्तयुवादिभ्योऽण्"।

Ch. of Voice—......—पौरुषेण—क्षमेण आलम्बनेन मतेन (भूयते)।

Remark—The figure of speech is this verse is समासोक्ति which is suggested. समासोक्ति is thus defined—"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः"॥ (साहित्यदर्पणे—X. 74)—when owing to some properties, common to both प्रकृत (the object meant to be described) and अप्रकृत (the object nct meant to be described), अप्रकृत

is suggested from प्रकृत, the figure is समासोक्ति. Here the adjectives are साधारण। Thus from the force of the expression उच्चैः पदमारुरुक्षतः and विनिपातनिवर्तनक्षमं, a parallel instance of a man, mounting a horse, supported by the hands of the attendants—is suggested. See Notes on Malli.

For similar idea, compare—"सदाभिमानैकधना हि मानिनः"—Sisu.

A feeble man has no future, respect or fortune.

विपदोऽभिभवन्त्यविक्रमं
रहयत्यापदुपेतमायतिः।
नियता लघुता निरायते-
रगरीयान् न पदं नृपश्रियः॥ १४॥

Prose—अविक्रमं विपदः अभिभवन्ति; आपदुपेतम् आयतिः रहयति। निरायतेः लघुता नियता। अगरीयान् नृपश्रियः पदं न।

Beng.—পৌরুষহীন ব্যক্তিকে বিপদ্ আক্রমণ করে, বিপন্নের অভ্যুদয়াশা থাকে না, ও আসন্নক্ষয় ব্যক্তির অগৌরব অবশ্যম্ভাবী, এবং অনাদৃত ব্যক্তিকে রাজশ্রী কখনই আশ্রয় করেন না।

Eng. Equiv.—विपदः—calamities. अभिभवन्ति—overwhelm. अविक्रमम्—feeble. रहयति—forsakes. आपदुपेतम्—smitten by calamities. आयतिः—future. नियता—certain. लघुता—degradation. निरायतेः—who has no hopes of rising. अगरीयान्—who is slighted. नृपश्रियः—of Royal Fortune.

Eng.—Calamities overwhelm a feeble man; future forsakes a man smitten by calamities; degradation is the certain lot of him who has has no hopes of rising, and Royal Fortune never smiles upon upon him who is slighted (Lit., he who is slighted is not the resort of Royal Fortune.)

Expl.—Active energy is the root of all success espcially for a king. An idle king, void of prowess, is constantly beset with difficulties and he fails every time to ward them off, and there is no bright future for him so beset; because the man is the architecht of his own future. People do not respect him who has no hopes of

rising, because the prospective leader alone is the favourite of the mass; and fortune forsakes the dishonoured. So resort to your personal valour and fight against such possible odds.

Malli.—पौरुषानङ्गीकारे दोषमाह—विपद इति। अविक्रमं पौरुषहीनं विपदोऽभिभवन्ति तिरस्कुर्वन्ति। आपदुपेतं विपन्नम्, आयतिः उत्तरकालः। "उत्तरः काल आयतिः" इत्यमरः। रहयति त्यजति। निरायतेः आसन्नक्षयस्य इत्यर्थः। लघुता अगौरवं नियता अवश्यम्भाविनी, न कश्चिदेनमाद्रियते इत्यर्थः। अगरीयान् लघीयान् नृपश्रियः राजलक्ष्म्याः पदम् आस्पदम् न भवति। पदा नृपेति पदच्छेदः। तस्मात् पौरुषं कर्तव्यमेव इत्यर्थः। अत्र पूर्वपूर्वस्य अविक्रमत्वादेरुत्तरोत्तरविपदादिकं प्रति कारणत्वात् कारणमालाख्योऽलङ्कारः। तथा च सूत्रम्—"पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाला" इति।

Extracts from other Commentaries—"......यद्यपि विपदापच्छब्दयोः पर्यायतया प्रयोगस्तथापि धातुजत्वादनयोरुपसर्गभिन्नयोः अवयवार्थम् औचित्यं च जानतां विपश्चिताम् अर्थभेदः स्फुरत्येव इत्यर्थभेदे सति विपच्छब्देन उपक्रमे तस्य तच्छब्दस्य वा प्रतिनिर्देशो न कृत इति प्रक्रमभङ्गदोषो नाशङ्कनीयः।......अगरीयानित्यत्र नञा गुरुत्वातिशयस्य प्रत्ययार्थस्य पर्युदासः क्रियते, न गुरुत्वस्य प्रकृत्यर्थस्य। पर्युदासे ह्यगुरुरित्येव प्रयोगो युक्तः। ......साम्राज्यमम्बुधिलक्षणा नृपश्रीस्तु गरीयसैव धारयितुं शक्या न गुरुणापीति द्योतयितुं नृपेति श्रियो विशेषणं कृतम्। अत्रापि लघुगरीयःशब्दयोरर्थभेदात् न प्रक्रमभङ्गदोषः"—चित्रभानुः।

Notes—विपदः—Nom. to अभिभवन्ति। वि-पद+क्विप् भावे; calamites.

अभिभवन्ति—अभि-भू+लट् अन्ति; overwhelm, overcome. Cf. "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते"। Nom. विपदः।

अविक्रमम्—Obj. to अभिभवन्ति। अविद्यमानः विक्रमः यस्य सः (नञ्गर्भ-बहुव्रीहि); devoid of valour, i. e., feeble. Alt. form अविद्यमानविक्रमम्। वि-क्रम्+घञ् भावे=विक्रमः।

रहयति—Nom. आयतिः। रह्+णिच् (स्वार्थे)+लट् ति; forsakes.

आपदुपेतम्—Obj. to रहयति। आपदम् उपेतः (द्वितीयातत्) or आपदा उपेतः (तृतीयातत्)। In the last case the क्त is in the passive. उप-इ+क्त (कर्तरि or कर्मणि)=उपेतः; beset with calamities.

आयति:—Bright future (उत्तर: काल:)। आ – यम् + क्तिन् भावे ।

नियता—Adj. to लघुता ; certain. नि – यम् + क्त, स्त्रियाम् टाप् ।

लघुता—Levity. लघो: भाव: इति लघु + तल् स्त्रियाम् = लघुता ।

निरायते:—निर्गता आयति: यस्य (प्रादिगर्भ बहुव्रीहि) तस्य । Alt. form निर्गतायते: by the Vārttika—"प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोप:" ।

अगरीयान्—न गरीयान् (नञ्तत्) । अतिशयेन गुरु: इति गुरु + ईयसुन् गरीयस् । See St. 1.

पदम्—Resort. Predicate to अगरीयान् । विधेयप्राधान्यात् क्लीबलिङ्गनिर्देश: ।

नृपश्रिय:—Of Royal Fortune. नृपस्य श्री: (षष्ठीतत्) तस्या: । षष्ठी एकवचन । The significance of the word नृप, as Chitrabhānu observes, is that Royal Fortune can only be enjoyed by the very high only, and not by the average high even. (See Extracts). If नृप is taken in the vocative (सम्बोधन)—that will not suit the context, because he has not been thus addressed anywhere in the previous stanzas.

Ch. of Voice.—विपद्भि: अविक्रम: अभिभूयते । आपदुपेत: आयत्या रह्यते ।...... लघुतया नियतया (भूयते) । अगरीयसा......पदेन न (भूयते) ।

Remark—The figure of speech in this verse is कारणमाला which is thus defined –"परं परं प्रति यदा पूर्वपूर्वस्य हेतुता । तदा कारणमाला स्यात्" (साहित्यदर्पण X. 99). When among a number of things mentioned, each preceding one is represented as the cause of each succeeding one, the figure is कारणमाला । Here अविक्रमत्व is the cause of विपन्नत्व, विपन्नत्व of आयतिहीनत्व and so on. Acc. to जगन्नाथ, this figure also occurs when each preceding object is represented as the effect of each succeeding object—"तत्र पूर्वं पूर्वं कारणं परं परं कार्यमित्येका । पूर्वं पूर्वं कार्यं परं परं कारणमित्यपरा" (रसगङ्गाधरे) । In मालादीपक, each preceding thing enhances the charm of each succeeding thing and there lies its difference from एकावली where each succeeding thing adds to the beauty of each preceding things. In कारणमाला, each preceding one is represented as the cause of each succeeding one.

Mammaṭa, the author of the Kāvyaprakāśa (acc. to some the book is of double authorship), has cited this stanza as an instance of the rhetorical blemish named भग्नप्रक्रम (of broken uniformity). In the first case, the uniformity of preposition (उपसर्ग) has been violated ; since the word विपत् has been repeated as आपद्, and the prepositions वि and आ are different ; hence the fault. In the second case, the uniformity of synonymity has been violated ; because the word अगरीयान् has been used for लघुता. Mammaṭa then suggests a more correct reading as "......तदभिभव: कुरुते निरायतिम्। लघुतां भजते निरायतिर्लघुतावान्न पदं नृपश्रिय:" ॥ But here, again, the metre (सुन्दरी or वियोगिनी) is violated ; hence Govinda the author of the Pradīpa observes—"इति पाठो युक्तो यदि न छन्दोभङ्ग:"—thereby he means that if the metre is सुन्दरी (which is अक्षरच्छन्द) then Mammaṭa's suggested reading is faulty ; if, however, the metre is taken to be वैतालीय (which is a मात्राच्छन्द), then Mammaṭa is correct. Cf : "वस्तुतस्तु वृत्तिकृत्पाठे छन्दोभङ्गो नास्त्येव, द्वितीयचरणपाठस्य तच्छन्दघटितस्यैव वृत्तिकृता कल्पितत्वेन वैतालीयस्य छन्दस: सत्वात्" (Jhalakikar).

According to Chitrabhānu there is no rhetorical fault in this verse ; because the words विपत् and आपत्, लघुता and अगरीयान् have been used significantly with a slight difference in meaning (See Extracts).

But we cannot side with Chitrabhānu, because Jagannātha while discussing the figure कारणमाला clearly says that in this figure the repetition should be done in the same form in which it was originally used. The use of its synonym will not do, because in that case the comprehension will be delayed owing to the delay in its recognition. Compare—"सर्वथैव य: शब्द: कार्यकारणतोपस्थापक आदौ प्रयुक्त: स एव निर्वाह्य:। एवंक्रमेण निबन्धनम् आकाङ्क्षानुरूपत्वात् रमणीयम्। अन्यथा तु भग्नप्रक्रमं स्यात्।......प्रत्युत पदान्तरेण तस्यार्थस्य उक्तौ रूपान्तरेण स्थितस्य नटस्येव प्रत्यभिज्ञाप्रतिरोधकत्वात् विवक्षितार्थसिद्धे: अकुण्ठितत्वविरहात् दोष: स्यात्। शब्दादुपस्थिते अर्थे प्रवृत्तिनिमित्तमिव शब्दोऽपि विशेषणतया भासते। तथा चोक्तम्—"न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते" (रसगङ्गाधर—p. 620-21).

Fortune favours the brave.

तदलं प्रतिपक्षमुन्नते-
रवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया
न विषादेन समं समृद्धयः ॥ १५ ॥

Prose—तत् (तस्मात्) उन्नतेः प्रतिपक्षं व्यवसायवन्ध्यताम् अवलम्ब्य अलम् ; पराक्रमाश्रयाः समृद्धयः विषादेन समं न निवसन्ति ।

Beng.—অতএব উন্নতির প্রতিবোধক উদ্যোগশূন্যতাকে পোষণ করিবার আর আবশ্যকতা নাই। পরাক্রমলভ্য সম্পদ্ অনুৎসাহের সহিত কখনই একত্র অবস্থান করে না।

Eng. Equiv.—तत्—therefore. अलं—enough. प्रतिपक्षम्—obstruction. उन्नतेः—to elevation, अवलम्ब्य—having recourse to. व्यवसायवन्ध्यताम्—inactivity. निवसन्ति—lives with. पराक्रमाश्रयाः—that follows valour. विषादेन—langour. समं—with. समृद्धयः—fortune.

Eng.—Enough, therefore, of having recourse to inactivity which is an obstruction to elevation. Fortune that follows valour, never lives with laugour.

Expl.—Fortune favours the brave. She does not live with the weak inactive man who is dead to the call of ambition. The right possessor of fortune is he who can win her even at the cost of his life But you are leading this unbearable life of inaction—remaining cheerful and contented under such affronts. Cast off this callousness ; rise up and obtain that glory which is the proud heritage of the brave.

Malli.—फलितमाह—तदिति । तत् तस्मात् उपेक्षायां दोषसम्भवात् इत्यर्थः । उन्नतेः अभ्युदयस्य प्रतिपक्षम् अन्तरायं व्यवसायवन्ध्यताम् उद्योगशून्यताम् अवलम्ब्य अलम् । उद्योगशून्यतावलम्बनेन अलम् इत्यर्थः । "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वाप्रत्ययः । तस्य ल्यबादेशः । तथाहि—पराक्रमाश्रयाः पराक्रमः आश्रयः कारणं यासां ताः तथोक्ताः

समृद्धय: सम्पदो विषादेन समं अनुत्साहेन सह न निवसन्ति। पौरुषसाध्याः सम्पदो न अनुत्साहसाध्याः, उभयोः सहावस्थानविरोधादित्यर्थः। वैधर्म्येण कार्यकारणसमर्थनरूपः अर्थान्तरन्यासोऽलङ्कारः।

Notes on Malli.—पौरुषसाध्या......विरोधात्—Fortune can be obtained only by valour and not by inactivity, and the two (fortune and inactivity) never dwell together.

Extracts from other Commentaries.—"........प्रतिपक्षशब्दस्य पुंलिङ्गतानियमात् न विशेष्यलिङ्गानुगमः।......वृकोदरवचनं पूर्वपक्षीकुर्वतो युधिष्ठिरस्य "न तितिक्षासममस्ति साधनम्" इत्यन्यथा वन्ध्यताविषादशब्दाभ्यां क्षमैव विवक्षितेति गम्यते। क्षमासमृद्धीनां सहानवस्थानरूपेण विरोधेन क्षमावता समृद्धयो दुर्लभा एवेति द्योत्यते। समृद्धीनां क्षमया सह स्थितिरेव निषिद्धेति समृद्धीनामाश्रयः क्षमेति पक्षो निरस्तः।. ....अनुकूलेन नायकेन रममाणा नायिका यथा प्रतिकूलादुद्विजति तथा पराक्रमान्विताः समृद्धयो विषादात् इत्ययं चार्थो विषादपराक्रमशब्दयोः पुंलिङ्गतया समृद्धिशब्दस्य स्त्रीलिङ्गतया च द्योत्यते"—चित्रभानुः।

Notes—तत्—अव्यय ; therefore, तस्मात् इत्यर्थः।

अलं—अव्यय—Denotes here 'prohibition'. Cf: "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इत्यमरः।

प्रतिपक्षम्—Adj. to व्यवसायवन्ध्यताम्। प्रत्यर्थी पक्षः प्रतिपक्षः (प्रादि), तम्—hindrance. The word प्रतिपक्ष, though an adjective (of व्यवसायवन्ध्यताम्), does not take the gender of the noun, as it never changes its masculine gender (अजहत्पुंलिङ्गशब्दः)। See Chitrabhānu.

उन्नतेः—शेषे षष्ठी। उत्—नम्+क्तिन् भावे = उन्नतिः ; prosperity, elevation.

अवलम्ब्य—अव—लम्ब्+ल्यप् (in place of क्त्वा, by the rule "समासेऽनञ्पूर्वे क्त्वो ल्यप्") in connection with the word अलं which denotes prohibition. The rule is "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा"—which means that according to the eastern grammarians, the affix क्त्वा is added to a root, when the prohibitive particles अलं and खलु are in combination with it.

व्यवसायवन्ध्यताम्—Obj. to अवलम्ब्य। व्यवसाये वन्ध्याः (सुपसुपेति) ; तस्य भावः, ताम् ; state of inaction, inactivity. Or, व्यवसायस्य वन्ध्यता (षष्ठीतत्)ताम्। वि—अव—सो+घञ् भावे = व्यवसायः। वन्ध्ये साधुः इति वन्ध्य+यत् = वन्ध्यः, तस्य भावः = वन्ध्य+तल् स्त्रियाम् = वन्ध्यता, barrenness.

निवसन्ति—Nom. समृद्धय:। नि – वस् + लट् अन्ति।

पराक्रमाश्रया:—Adj. to समृद्धय:। पराक्रम: आश्रय: (कारणम्) यासां ता: (बहुव्रीहि)। परा – क्रम + घञ् भावे = पराक्रम: valour. आ – श्रि + अच् भावे = आश्रय: cause ; that follows valour.

विषादेन—तृतीया in connection with the word सम by the rule—"सहयुक्तेऽप्रधाने"। वि – सद् + घञ् भावे = विषाद:। The dental सकार of सद् is changed into cerebral षकार by the rule "सदिरप्रते:"।

समृद्धय:—Fortune. सम् – ऋध् + क्तिन् भावे ; १मा बहुवचन। Nom. to निवसन्ति।

Ch. of Voice—"पराक्रमाश्रयाभि: समृद्धिभि:......नुाष्यते।

Remark—The figure of speech in this verse is अर्थान्तरन्यास (for def., see St. 5). Here the effect (in the first half) is supported by the cause (in the second half) through dissimilarity (वैधर्म्य), because the cause is stated in the negative form.

For similar idea of the second half, compare :—"उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्। शूरं कृतज्ञं दृढसौहृदं च लक्ष्मी: स्वयं याति निवासहेतो:" ॥ पञ्चतन्त्रे। Also "गुणिनं जनमालोक्य निजबन्धनशङ्कया। राजलक्ष्मी: कुरङ्गीव दूरं दूरं पलायते" ॥

If you wait for the expiry of the term of 13 years, then you are befooled.

अथ चेदवधि: प्रतीक्ष्यते
कथमाविष्कृतजिह्मवृत्तिना।
धृतराष्ट्रसुतेन सुत्यजा·
श्चिरमास्वाद्य नरेन्द्रसम्पद: ॥ १६ ॥

Prose—अथ अवधि: प्रतीक्ष्यते चेत्, आविष्कृतजिह्मवृत्तिना धृतराष्ट्रसुतेन चिरम् आस्वाद्य नरेन्द्रसम्पद: (अथवा हे नरेन्द्र ! सम्पद:) कथं सुत्यजा: ?

Beng.—অথবা আপনি যদি সময়ের প্রতীক্ষা করেন, তাহা হইলে সেই কপটাচারী দুর্য্যোধন দীর্ঘকাল রাজ্যসম্পদ্ ভোগ করিয়া কি প্রকারে তাহা অনায়াসে পরিত্যাগ করিবে ?

Eng. Equiv.—अथ—and. चेत्—if. अवधि:—expiry (of the term of 13 years). प्रतीक्ष्यते—wait. कथम्—how. आविष्कृतजिह्मवृत्तिना—who has manifested his wicked conduct. धृतराष्ट्रसुतेन—by Duryodhana. सुत्यजा:—easily give up. चिरम्—for a long time. आस्वाद्य—having enjoyed. नरेन्द्रसम्पद:—Royal Fortune.

Eng.—And if you wait for the expiry (of the term of 13 years), how can the son of Dhṛtarāṣṭra (i. e., Duryodhana) who has manifested his wicked conduct, easily give up the Royal Fortune, after having enjoyed it for a long time ?

Expl.—No doubt kings should abide by agreements. But in the present case your waiting will be in vain. Surely you are unwise if you have not yet discovered the wicked motive of Duryodhana. Duryodhana has enjoyed so long the comforts of Royal Fortune ; and enjoyment only sharpens the desire. Moreover, in his numerous wicked acts he has displayed his fraudulent nature. So, how can you expect that Duryodhana will give back your kingdom after thirteen years, after he has enjoyed it for a long time ? So it is the time for war and not for peace.

Malli.—ननु समय: प्रतीक्ष्यते, किं वेगेन ?—इत्यवाह—अथेति। अथ अवधि: काल: प्रतीक्ष्यते चेत्। "अवधिस्त्ववधाने स्यात् सीम्नि काले बिलेऽपि च" इति विश्व:। आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्योधनेन नरेन्द्रसम्पद: राज्यसम्पद:। नरेन्द्रेति गपदच्छेद:। चिरं चतुर्दशवर्षाणि आस्वाद्य अनुभूय कथं सुत्यजा: ? ज्ञातास्वादेन तेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यन्ते एव इति अवधिप्रतीक्षणं व्यर्थमित्यर्थ:।

Notes on Malli.—(1) ननु.........वेगेन—Why hurry ? I am waiting the stipulated time.

(2) ज्ञातास्वादेन......व्यर्थम्—Even your waiting (till the expiry of the) the stipulated time is in vain ; because he who has (formerly) tasted will not give back the kingdom so easily without the trouble of war.

Extracts from other Commentaries—"......अथशब्देन प्रकृतार्थादर्थान्तरं द्योत्यते......वनवासाज्ञातवासयो: कल्पितस्य कालस्य अवसानम् अवधिशब्देनेह

विवक्ष्यते ।......अपर्यन्तपराध्यभोगतया श्लाघ्यतरतया विशिष्टोन्नतिविधायितया च दुरितानुबन्धेनापि स्वसम्पादनस्पृहां सर्वेषां जनयन्त्याः सम्राट्-समृद्धयः परस्मै स्वार्पणेच्छां कथं कस्य कुर्युरिति नरेन्द्रेति विशेषणेन व्यज्यते । अनपत्यस्य विचित्रवीर्यस्य दिष्टान्तेन विनष्टं कुरुराज्यं ज्यायसस्तस्य चेत्रजस्य जन्मना पूर्वं धृतमित्याभिक्षेयस्य धृतराष्ट्र इति नाम कृतम् । तेन जात्यन्धोऽपि धृतराष्ट्रः कुरुराष्ट्रम् आत्मीयमेवाभ्यमन्यत । ततः तत्सुतस्य अविकलाङ्गस्य सुयोधनस्य तदाधिपत्ये तदधिकोऽभिमान इत्ययमर्थो धृतराष्ट्रसुतशब्देन द्योत्यते ।......क्षणिकमप्यास्वादनम् आस्वादस्य दुस्त्यजतां जनयति, किं पुनः दीर्घकालव्यापीत्यभिप्रायः"—चित्रभानुः ।

Notes—अथ—अव्यय । "प्रकृतादर्थादर्थान्तरम्"—चित्रभानुः ।

चेत्—अव्यय ; if.

अवधिः—उक्ते कर्मणि १मा । अवधीयते अनेन इति अव-धा+कि by the rule "उपसर्गे घोः किः"—the expiry of the period of 13 years. (12 years in the forest and 1 year incognito).

प्रतीक्ष्यते—प्रति-ईक्ष+लट् ते कर्मणि ।

कथम्—अव्यय ; how. केन प्रकारेण इति किम्+थमु ।

आविष्कृतजिह्मवृत्तिना—Adj. to धृतराष्ट्रसुतेन । जिह्मा चासौ वृत्तिश्च (कर्मधारय)= जिह्मवृत्तिः ; the पुंवद्भाव is by the rule "पुंवत् कर्मधारयजातीयदेशीयेषु" । आविष्कृता जिह्मवृत्तिः येन (बहुव्रीहि) तेन । आविस्-कृ+क्त, स्त्रियाम्=आविष्कृता । जहाति सरलमार्गम् इति हा+मन् (कर्तरि)=जिह्मः ; crooked, fraudulent. वृत्+क्तिन्= वृत्तिः ।

धृतराष्ट्रसुतेन—अनुक्ते कर्तरि तृतीया । Refers to दुर्योधन । धृतराष्ट्रस्य सुतः (षष्ठीतत्) तेन । The significance of this word, says Chitrabhānu, is that Dhṛtarāṣṭra, though blind, thought of the kingdom of Kuru as his own, such was his greedy inner nature. What to speak of Duryodhana his son who has no deformity ? See Extracts. Here धृतराष्ट्रसुतेन cannot take षष्ठी, because of the prohibitory rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्" ।

सुत्यजाः—Adj. to सम्पदः । सुखेन त्यज्यन्ते इति सु-त्यज्+खल् कर्मणि ; can be easily given up.

चिरम्—अव्यय ; for a long period of time. Malli. says 14 years,

perhaps taking into account the year preceding their exile—when he was plotting against their lives.

आस्वाद्य—Having tasted. आ – स्वद् + णिच् + ल्यप् ।

नरेन्द्रसम्पदः—Nom. to भवेयुः understood. नराणाम् इन्द्रः (षष्ठीतत्) (इन्द्र = इन्द्र इव) नरेन्द्रः । नरेन्द्राणां सम्पदः (षष्ठीतत्) = नरेन्द्रसम्पदः—Royal Fortune. Malli also takes नरेन्द्र singly in the vocative—which is not very good. Chitrabhānu, however, rightly remarks that the word नरेन्द्र indicates the vastness, rarity etc., of the wealth which make it very difficult to be easily relinquished. See Extracts.

Ch. of Voice—.. ...अवधिं प्रतीक्षसे......सुत्यजाभिः सम्पद्भिः (भूयेत) ।

If you get back your kingdom as a gift from the enemy, then what is the use of the arms of your brothers ?

द्विषता विहितं त्वयाथवा
यदि लब्धा पुनरात्मनः पदम् ।
जननाथ ! तवानुजन्मनां
कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥

Prose—अथवा द्विषता विहितं पुनः आत्मनः पदं यदि लब्धा, जननाथ ! तव अनुजन्मनाम् आविष्कृतपौरुषैः भुजैः कृतम् ।

Beng.—আর বিপক্ষ দুর্য্যোধন স্বেচ্ছায় আপনাকে রাজ্য প্রত্যর্পণ করিলে যদি আপ'ন পুনরায় তাহাই গ্রহণ করেন, তাহা হইলে হে জননাথ ! আপনার অনুজদিগের প্রকটিত-পরাক্রম বাহু ব্যর্থ হইল ।

Eng. Equiv.—द्विषता—by the enemy. विहितं—being returned. त्वया—you. अथवा—or. यदि—if. लब्धा—get back. आत्मनः—your. पदम्—kingdom. जननाथ—O Lord of men ! तव—your. अनुजन्मनां—of younger brothers. कृतम्—what is the use of. आविष्कृतपौरुषैः—of well-known prowess.

Eng.—Or if you get back your kingdom on its being returned to you by your enemy (Duryodhana), what then, O Lord of men ! is the use of the arms of your brothers of well-known prowess ? (Lit., the use...... is nil

Expl.—See, next verse.

Malli.—(अथ यदि दैवात् स्वयमेव दुर्योधनः सम्पदो दास्यति तथापि तत् कथं रोचयेमहि इत्याह—द्विषतेति। अथवा द्विषता दुर्योधनेन विहितं समर्पितमित्यर्थः। आत्मनः पदं राज्यं पुनः अपि त्वया लब्धा लप्स्यते यदि, लभेः कर्मणि लुट्। हे जननाथ! तव अनुजन्मनाम् अनुजानाम् आविष्कृतपौरुषैः प्रकटितपराक्रमैः भुजैः कृतम् अलं व्यर्थमिति यावत्। अस्मद्भुजैर्न किञ्चित् साध्यमित्यर्थः। राज्यदानादानयोर्द्विषतामेव स्वातन्त्र्ये अस्मद्भुजनैष्फल्यात्। "क्षत्रियस्य विजितव्यम्" इति शास्त्रात् क्षात्रेणैव राज्यं ग्राह्यमित्यर्थः। कृतमिति प्रतिषेधार्थमव्ययं स्वादिषु पठ्यते। "कृतमिति निवारणनिषेधयोः" इति गणव्याख्याने। भुजैरिति गम्यमान-साधनक्रियापेक्षया करणत्वात् तृतीया। उक्तञ्च न्यासोद्द्योते—"न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्य अपि तु गम्यमानापि" इति।)

Notes on Malli—(1) अथ यदि.........रोचयेमहि—If accidentally Duryodhana himself gives back your fortune—even then, how can that taste well to us ?

(2) राज्यदानादानयोः......ग्राह्यम्—If the enemies are the the sole judges in the gift and taking away of the kingdom, then vain are our arms. Moreover, from the injunction of the Śāstras that "a Kṣattriya should conquer", a kingdom is to be taken only by valour.

Extracts from other commentaries.—"...विशेषद्योतकः पुनःशब्दः स्वविक्रमहेतुकात् स्वपदलाभात् सपत्नप्रसादाधीनस्य स्वपदलाभस्य भेदं द्योतयति।......अथवा विहितमित्यस्य कृतमित्यर्थः। विपूर्वो दधातिर्नियोगे करणे च वर्तते। पूर्वसिद्धमर्यादापर्युदासेन कृत्रिमसङ्केतविधानेन च अन्यथाकृतमिति विहितमित्यनेन विवक्ष्यते।......(भुजैरिति) अवयविनां पौरुषम् अवयवेषु भुजेषु उपचर्य एवम् उक्तम्।......पर्याप्त्यर्थं कृतमित्यव्ययं विरुद्धलक्षणया वैफल्ये पर्यवस्यति। यथा—"अलं महीपाल! तव श्रमेण" इति। भुजानां पर्याप्तिहेतुत्वारोपेण "हेतौ" इति तृतीया। महाफलतया प्रथिता विटपिनां विटपा इव अस्माकम् इमे भुजास्त्वदोपेक्षया फलकाले निष्फलाः शोच्याः स्युरिति भावः।"—चित्रभानुः।

Notes—द्विषता—अनुक्ते कर्तरि तृतीया। द्विष्+शतृ by the rule "द्विषोऽमित्रे" =द्विषत्।

विहितम् -Adj. to पदम्। वि-धा+क्त कर्मणि। Here it is used in the

sense of "given". Chitrabhānu suggests another explanation as "made otherwise". कृतम् (अन्यथा कृतम्). See Extracts.

त्वया—अनुक्ते कर्तरि तृतीया ।

अथवा—अव्यय ; otherwise.

लभ्या—Nom. त्वया । लभ्+लुट्, ता कर्मणि (future passive).

पुनः—अव्यय । This particle, as Chitrabhānu remarks, indicates the distinction between a kingdom gained by valour and a kingdom obtained by gift. See Extracts.

पदम्—उक्ते कर्मणि १मा ; kingdom.

जननाथ—सम्बोधने १मा ; the Lord of men. जनानां नाथः (षष्ठीतत्), सम्बोधने । "By this he appeals to his heart. As lord of men you ought to get the kingdom by conquest" (Kāle).

अनुजन्मनाम्—शेषे षष्ठी । अनु पश्चात् जन्म येषाम् (बहुव्रीहि) तेषाम् । Usually with जन्म, सम्भव etc., as the second member, we get व्यधिकरणबहुव्रीहि—Cf. "अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः"—वामन ; of younger brothers.

कृतम्—अव्यय in the sense of 'negation'. Malli quotes गणव्याख्यान to show that कृतम् is used in the sense of prohibition and negation. Chitrabhānu's explanation as—"पर्याप्तार्थं कृतमित्यव्ययं विरुद्धलक्षणया वैफल्ये पर्यवस्यति"—seems to be better.

आविष्कृतपौरुषैः—Adj. to भुजैः । आविष्कृतं पौरुषं यैः ते (बहुव्रीहि) तैः । आविस्—कृ+क्त=आविष्कृत । पुरुषस्य भावः कर्म तेजो वा इति पुरुष+अण्=पौरुषम् ।

भुजैः—करणे तृतीया in connection with the verb साध्यते which is understood. Not only verbs which are directly mentioned, but also those which are understood, govern case-endings. Cf: "गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका । अलं श्रमेण । श्रमेण साध्यं नास्तीत्यर्थः । इह साधनक्रियां प्रति श्रमः करणम्"—Bhaṭṭoji. Chitrabhānu parses the word as हेतौ तृतीया । See Extracts.

Ch of Voice—......त्वं लभ्यासे ।

A spirited man gains prosperity by his own might and does not seek it as a favour.

मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्तयते स्वयं हतैः ।
लघयन् खलु तेजसा जग-
न्न महानिच्छति भूतिमन्यतः ॥ १८ ॥

Prose—मृगाधिपः स्वयं हतैः मदसिक्तमुखैः करिभिः वर्तयते । तेजसा जगत् लघयन् महान् अन्यतः भूतिं न इच्छति खलु ।

Beng.—পশুরাজ সিংহ মদস্রাবী হস্তীকে স্বয়ংই বিনাশ করিয়া জীবনযাত্রা নির্ব্বাহ করিয়া থাকে। স্বীয় প্রভাবের দ্বারা জগৎকে নিষ্প্রভ করিয়া তেজস্বী ব্যক্তি অন্য পুরুষের নিকট হইতে বৃদ্ধি ইচ্ছা করে না।

Eng. Equiv.—मदसिक्तमुखैः—in rut. मृगाधिपः—lion (lord of beasts). करिभिः—elephants. वर्तयते—lives upon. स्वयं—by himself. हतैः—killed. लघयन्—defying. खलु—indeed. तेजसा—(on the strength of his) valour. जगत्—world. महान्—the valiant person. इच्छति—wish. भूतिम्—eminence. अन्यतः—at the hand of other persons.

Eng.—The lion (lord of beasts) lives upon elephants in rut, killed by himself. The valiant person who defies the world on the strength of his valour, does not indeed wish to attain eminence at the hand of other persons

Expl.—Verily freedom as a gift is worse than slavery. They are weak and devoid of manliness, who seek fortune as a favour from others. These persons are always looked down upon by the people who lose confidence in them. The brave only deserve the fair. If you get back your kingdom by the enemy's favour, then vain are the arms of your younger brothers, which have already displayed valour. The weak only deserves favour and not the strong. The brave parts with his life but not with his valour. The valiant delights in self-earned fortune. The lion lives upon elephants killed by himself. So rise up and attain eminence by your own might. (N. B. Students ! Ponder well over the so-called *gift* of complete independence to the Indian people by the British.)

Malli.—(ननु साम्नैव कार्यसिद्धौ किं शौर्येण ? यथाह मनुः—"साम्ना दानेन भेदेन समस्तैरथवा पृथक्। विजेतुं प्रयतेतारीन् न युद्धेन कदाचन" ॥ इति। तत् किम् आग्रहेण ? इत्याशङ्क्याह—मदेति। मृगाधिपः सिंहः मदसिक्तमुखैः मदवर्षिभिरित्यर्थः। स्वयं स्वेनैव हतैः करिभिः वर्तयते, वृत्तिं करोति, तैरेव जीवतीत्यर्थः। चौरादिकात् वृतेर्लट्, भौवादिकस्य तु "अणावकर्मकाच्चित्तवत्कर्तृकात्" इति परस्मैपदनियमादिति। तथाहि तेजसा प्रभावेन, "तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि" इति वैजयन्ती। जगत् लघयन् लघूकुर्वन् महान् तेजस्वी अन्यतः अन्यस्मात् पुरुषात् भूतिं वृद्धिं न इच्छति खलु। न हि तेजस्विनः पराधीनवृत्तित्वं युक्तम्। मनुवचनं तु अशूरविषयम् इति भावः। विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः।)

Notes on Malli.—(1) ननु साम्नैव......इत्याशङ्क्याह—Now what is the need of valour when the object is achieved by peace ? As Manu has said—"One should try to conquer his enemy by conciliation, gifts and dissension, jointly or singly, but never by war" (मनुसंहिता—VII. 198). So why this eagerness ?—apprehending this he replies.

N. B. Manu gives reason why one should try to avoid war "अनित्यो विजयो यस्मात् दृश्यते युध्यमानयोः। पराजयश्च सङ्ग्रामे तस्मात् युद्धं विवर्जयेत्" ॥ (मनुसंहिता—VII 199).

(2) न हि तेजस्विनः......विषयम्—It is not desirable that the brave should depend on others for his subsistence. Manu's law relates only to the weak.

Extracts from other Commentaries—"......मांसभक्षणविक्रयाद्यर्थिभिः मृगयुभिः अन्वहं मृग्यमाणानां मृगाणां स्वसन्निधानेन अनादुष्करम् अधिकं रक्षणं करोति इत्यमुमर्थम् अवगमयति योगेन सिंहे वर्तमानो मृगाधिपशब्दः। तेन उन्नतमनोवृत्तिः सिंहो बलिन एव जिघत्सति जिघांसति वा, दुर्बलांस्तु प्रत्युत पालयति इति तस्याभिमानातिशयो द्योत्यते। ......बलाविनाभूतमदोदयद्योतकं करिणां मुखमेव मृगाधिपो नखैर्भिनत्ति, नान्यत् पार्श्वपृष्ठादीति तस्य तेजस्वितातिशयं द्योतयितुं मदसिक्तमुखैरित्युक्तं न स्रुतभूरिमदैरित्यादि।......ननु हिंस्राणां श्वापदानां कथा विपश्चिता विवेकनिर्णये हेतुर्न स्यादिति तत्राह लघयन्निति।......न स्वसम्बन्धिफलाभिसन्धिना महती जगल्लघूकरणं, तेजःप्रसरणेन अनभिसन्धिपूर्वकं तस्य तद्

भवतीति लघयन्निति परस्मैपदेन द्योत्यते । लघुशब्दात् "तत् करोति" इति णिचि "णाविष्ठवत् प्रातिपदिकस्य" इतीष्ठवद्भावेन टिलोपे लट्शत्रादिषु कृतेषु लघयन्निति रूपम्"—चित्रभानुः ।

Notes—मदसिक्तमुखैः—Adj. to करिभिः । मदेन सिक्तं (तृतीयातत्)=मदसिक्तम् । मदसिक्तं मुखं येषां ते (बहुव्रीहि) तैः । The use of the word मुख indicates the lion's unusual strength. The lion never pierces the sides or the back of the elephant, but the face which is the main seat of strength (Chitrabhānu). सिच्+क्त=सिक्त । N. B. The elephants exude ichor during their state of sexual excitement. The fragrance is said to be similar to that of cardamons (एलागन्धिनि—कादम्बरी) or the flowers of the Saptaparṇa tree (vide Canto I. 16). (करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदस्रुतिः) ।

मृगाधिपः Nom. to वर्तयते । मृगाणाम् अधिपः (षष्ठीतत्) । The lion is called the lord of beasts because he protects by his very presence other animals from the fowlers. (See Chitrabhānu). अधिपातीति अधि–पा+क कर्तरि=अधिपः ।

करिभिः—करणे तृतीया । करः (trunk) अस्ति अस्य इति कर+इनि=करिन् । तैः ।

वर्तयते—Nom मृगाधिपः; lives upon. वृत (चुरादि)+लट् ते । The आत्मनेपद is by the rule "णिचश्च"; because the fruit of the action here accrues to the agent (कर्त्रभिप्राये क्रियाफले) । If, however, we take the root वृत् of the भ्वादि group and then add णिच् the form will be वर्तयति by the rule "अणावकर्मकात् चित्तवत्कर्तृकात्" which means—intransitive verbs having a sentient being as an agent take परस्मैपद in the causative forms, even when the fruit of the action accrues to the agent. So says Malli.

स्वयम्—अव्यय in the sense of आत्मना ।

हतैः—Adj to करिभिः । हन्+क्त कर्मणि ; killed.

लघयन्—Present participial adj. to महान्; belittle. लघु करोति इति लघु+णिच् (तत्करोति तदाचष्टे इत्यादिना)+शतृ=लघयन् ("णाविष्ठवत् प्रातिपदिकस्य" इतीष्ठवद्भावेन टिलोपः). लघयन् is नामधातु (सकर्मक) governing the object जगत ।

तेजसा—करणे तृतीया।

जगत्—Obj. to लघयन्। गच्छतीति जगत् formed irregularly, by the Uṇādi Sūtra "वृषद्-वृहत्-महत्-जगत्—" etc. ; or गम्+क्विप्।

इच्छति—Nom. महान्। इष्+लट् ति।

भूतिम्—Obj. to इच्छति। भू+क्तिन् (भावे) "भूतिर्भस्मनि सम्पदि"।

अन्यतः—अपादाने पञ्चमी। अन्य+तस् (पञ्चम्यर्थे)।

Ch. of Voice—......मृगाधिपेन वर्तते......लघयता .....महता भूतिः इष्यते।

Remark—The figure of speech in this verse is अर्थान्तरन्यास (for def., see St. 5). Here a general statement (in the second half) is supported by a particular statement (in the first half).

For similar idea, compare : "सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु। प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः"॥

To the ambitious wealth is only a secondary object.

अभिमानधनस्य गत्वरै-
रसुभिः स्थास्नु यशश्चिचीषतः।
अचिरांशुविलासचञ्चला
ननु लक्ष्मीः फलमानुषङ्गिकम्॥ १९॥

Prose—अभिमानधनस्य (अत एव) गत्वरैः असुभिः स्थास्नु यशः चिचीषतः अचिरांशु-विलासचञ्चला लक्ष्मीः आनुषङ्गिकं फलं ननु।

Beng.—শত্রু দমন করা যাঁহার উদ্দেশ্য যিনি প্রাণবায়েও অবিনাশী যশ সঞ্চয় করিবার বাসনা করেন, বিদ্যুতের ন্যায় চঞ্চল সম্পদ্ তাঁহার নিকট আনুষঙ্গিক লাভ বলিয়া পরিগণিত হয়।

Eng. Equiv.—अभिमानधनस्य—who is proud of his Kṣattriya blood. Lit., of one to whom his selfesteem is wealth. गत्वरैः—perishable. असुभिः—life. स्थास्नु—immortal. यशः—fame. चिचीषतः—desiring to gain. अचिरांशुविलासचञ्चला—transient like a flash of lightning. ननु—only. लक्ष्मीः—wealth. फलम्—object. आनुषङ्गिकम्—secondary.

Eng.—Wealth, which is transient like a flash of lightning, is only a secondary object to him, whose wealth is his self-prestige (pride), and who desires to gain immortal fame at the cost of perishable life.

Expl.—To the ambitious wealth is only a secondary thing which is attainable without efforts. Wealth is always fickle in her nature and never remains at one place for a long time Moreover, it is perishable. But to the valiant, self-prestige is the wealth. The brave live in deeds and not in years. They buy undecaying fame as it were at the sacrifice of their ephemeral life. They slight fortune which is a secondary thing to them ; and what sensible man of self-prestige shall prefer fortune to fame ?

Malli.—ननु युद्धात् पाक्षिको लक्ष्मीलाभः, उपायान्तरैस्तु न तथा इत्याशङ्क्याह—अभिमानेति । अभिमानधनस्य वैरिनिर्यातनमात्रनिष्ठस्य अत एव गत्वरैः गमनशीलैः अस्थिरैः । "गत्वरश्च" इति क्वरबन्तो निपातः । असुभिः प्राणैः करणैः । "पुंसि भूम्न्यसवः प्राणाः" इत्यमरः । स्थास्नु स्थिरम् । "ग्लाजिस्थश्च ग्स्नुः" इति ग्स्नुप्रत्ययः । यशश्चिचीषतः चेतुं संग्रहीतुम् इच्छतः । चिनोतेः सन्नन्तात् शतृप्रत्ययः । अचिरांशुविलासचञ्चला अचिरम् अंशवो यस्याः सा अचिरांशुर्विद्युत् तस्या विलासः स्फुरणं तद्वत् चञ्चला, क्षणिका इत्यर्थः । लक्ष्मीः सम्पत् अनुषङ्गादागतम् आनुषङ्गिकम् अन्वाचयशिष्टमल्पं फलम्, मानधनानां यश एव मुख्यं फलम्, अभ्युच्चयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यमित्यर्थः । अत्र अस्थिरप्राणत्यागेन स्थिरयशःस्वीकाराभिधानात् न्यूनाधिकविनिमयाख्यः परिवृत्त्यलङ्कारः । उक्तञ्च काव्यप्रकाशे—"परिवृत्तिर्विनिमयो योऽर्थानां स्यात समासमैः" इति ।

Notes on Malli.—(1) ननु .....आह—Well, in war the gaining of wealth is only an alternative, but it is not so when (fortune) is acquired by other means - apprehending this he says.

(2) अन्वाचयशिष्टम्—अन्वाचय is the statement of a secondary rite or action after the mention of a primary one. (मुख्यसिद्धौ अप्रधानसिद्धिसम्भावना अन्वाचयः)

Extracts from other Commentaries—"......सर्वसमृद्धियोनिविशिष्टक्रियाशक्त्यभिव्यक्तिहेतुः सत्त्वशाली मनोविकासोऽभिमानः, स धनं यस्य ।......प्रधानप्रयोजनमुद्दिश्य

प्रवर्तमानस्य कर्तृरवर्जनीयफलान्तरजनकः अवान्तरव्यापारः अनुषङ्गः। यथा गुण्यतृषस्य केदारं सिञ्चतः स्नानपानादिपर्याप्तकुल्यावर्त्मना पयसः प्रवर्तनम्।......द्विविधा लक्ष्मीः व्यस्ता समस्ता च। माण्डलिकाश्रया व्यस्ता, महाराजाश्रया समस्ता।. .. महाराजलक्ष्मीविकृतिर्व्यस्ता लक्ष्मीरिह लक्ष्मीशब्देनोच्यते, तड़िद्‌विकृतेश्चटुलतरस्य तद्विलाससोपमानत्वात्।.....यशः प्रकृष्टक्रियागुणकृतां स्वर्गस्थितिहेतुं स्तुतिरूपां ख्यातिमित्यर्थः।......चाविनश्वस्य यशःसदृशम् ईप्सिततमं नास्ति, यस्मात् ईप्सिततराः सर्वशरीरिणः प्राणाः यशोग्रहणे करणमित्याह असुभिरिति"—चित्रभानुः।

Notes—अभिमानधनस्य—Adj. to जनस्य understood. अभिमानः धनं यस्य (बहुव्रीहि) तस्य। अभि – मन् + घञ् = अभिमानः। Chitrabhānu defines it as that high sentiment of the mind caused by सत्त्व and is the root of prosperity and action. (See Extracts—also compare Chitrabhānu, St. 13).

गत्वरैः—Adj. to असुभिः; fleeting. गम् + क्वरप् = गत्वरः। The अनुनासिक मकार of गम् is dropped irregularly by the Sūtra "गत्वरश्च"।

असुभिः—करणे तृतीया। अस् + उ = असु। The base is masculine and plural like प्राण। "पुंसि भूम्न्यसवः प्राणाश्चैवम्" इत्यमरः।

स्थास्नु—Adj. to यशः; permanent. immortal. स्था + ग्स्नु कर्तरि by the rule "ग्लाजिस्थश्च ग्स्नुः"। Thus ग्लास्नु, जिष्णु।

यशः—अश्नुते व्याप्नोति इति अश् + असुन (औणादिक)।

चिचीषतः—Adj. to जनस्य understood चेतुमिच्छति इति चि + सन् + शतृ, षष्ठी १वचन; desiring to gain. Alt. form चिकीषतः by the Sūtra "विभाषा चेः" (अभ्यासात् परस्य चिञः कुत्वं वा स्यात् सनि लिटि च)।

अचिरांशुविलासचञ्चला—Adj. to लक्ष्मीः। न चिरम् (नञ्तत्) = अचिरम् (अव्यय)। अचिरम् अंशवः यस्य सः (बहुव्रीहि) = अचिरांशुः। तस्य विलासः (षष्ठीतत्)। अचिरांशुविलास इव चञ्चला (उपमानकर्मधारय) by the rule "उपमानानि सामान्यवचनैः"। In a उपमान कर्मधारय the उपमान and the सामान्यधर्म (common attribute) are mentioned. In a उपमित कर्मधारय the common attribute is suppressed, but उपमेय and उपमान are mentioned. In a रूपक कर्मधारय (मयूरव्यंसकादि) there is complete identity between उपमेय and उपमान। For the proverbial fickleness of fortune, compare—"चाञ्चल्यमुच्चैःश्रवसस्तुरङ्गात् कौटिल्यमिन्दोर्विषतो विमोहः। इति श्रियाशिक्षि सहोदरेभ्यो न वेद्मि कस्मात् गुणवद्विरोधः"॥ Also "शैलूषप्रसरेव वेश्यवनिता दुःखोपचर्या भृशम्"।

ननु—अव्यय। Surely.

लक्ष्मीः—Nom. to भवति understood. Fortune. "लक्षयति पश्यति नीतिज्ञम्। 'लक्षदर्शनाङ्कनयोः' "लक्षेर्मुट् च" इति ईप्रत्ययः, तस्य च मुट्" (Bhānuji). In nominative singular the base is always with विसर्ग।

फलम्—Predicate to लक्ष्मीः; result. The general rule is that both subject and predicate should be put in the same number and gender. But here—विधेयस्य अजहल्लिङ्गत्वात् उद्देश्येन सह लिङ्गानैक्यम्।

आनुषङ्गिकम्—Adj. to फलम्; secondary (अवान्तर). अनु-सञ्ज+घञ्=अनुषङ्गः। अनुषङ्गादागतम् इति अनुषङ्ग+ठक (इक)=आनुषङ्गिकम्।

Ch. of Voice—.........अचिरांशुविलासचञ्चलया लक्ष्म्या आनुषङ्गिकेन फलेन (भूयते)।

Remark—The figure of speech in this verse is परिवृत्ति which is thus defined—"परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्" (साहित्यदर्पण X. 105). When there is an exchange of things—the equal with the equal, the inferior with the superior and the superior with the inferior, the figure is परिवृत्ति। In this verse an inferior thing (i. e., fleeting life) is exchanged for a superior one (i. e., immortal fame). It is to be noted that in this figure the exchange must not be real, but only such as can be fancied by poets—"एषु दानादानव्यवहारः कविकल्पित एव, न तु वास्तवः, यत्र वास्तवस्तत्र नालङ्कारः" (रसगङ्गाधरे)। Again, there is a conflict of opinion as to whether there should be two parties for mutual giving and taking or only one party to give up something and receive something in its stead. Mammaṭa, Vidyādhara and Jagannātha favour the former view, while Ruyyaka and Vāmana the latter one.

Men of self-respect part with their lives, but not with their spirit.

ज्वलितं न हिरण्यरेतसं
चयमास्कन्दति भस्मनां जनः।
अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः॥ २०॥

Prose—जन: भस्मनां चयम् आक्रामति, ज्वलितं हिरण्यरेतसं न ; अत: मानिन: अभिभूतिभयात् असून् (एव) सुखम् उज्झन्ति, धाम न ।

Beng.—লোকে ভস্মরাশিকেই পদদলিত করে, কিন্তু প্রজ্বলিত অগ্নিকে কেহই আক্রমণ করে না। এই কারণে মানী ব্যক্তি পরাভবের ভয়ে অক্লেশে স্বীয় জীবনও বিসর্জ্জন দিতে পারেন, কিন্তু তেজ পরিত্যাগ করিতে পারেন না।

Eng. Equiv.—ज्वलितं—blazing हिरण्यरेतसम्—fire. भस्मनां चयम्—heap of ashes. आक्रामति—trample. जन:—people. अभिभूतिभयात्—from fear of insult. असून्—lives. अत:—hence. सुखम्—easily. उज्झन्ति—give up. धाम—inherent lustre. मानिन:—men of self-respect.

Eng.—People trample upon a heap of ashes, but (dare) not (touch) the blazing fire. Hence, men of self-respect, from fear of insult, easily give up their lives, but never (their) inherent lustre.

Expl.—People respect spirited men and not the weak. They trample upon heap of ashes, but dare not touch the blazing fire. And to men of self-respect the natural lustre is the high spirit. It is the only abiding thing in them, which they maintain and protect even at the cost of their dear lives. They can brook troubles, but cannot pocket insults. They part with their lives, but not with their spirit—and it is their inborn nature. So give up this weakness and resume your inherent spirit.

Malli.—ननु अल्पस्य मानस्य हेतो: कथं प्राणत्याग: शक्यते कर्तुम् ? यत: "जीवन् नरो भद्रशतानि पश्येत" इत्याशङ्क्याह—ज्वलितमिति । जन: भस्मनां चयं पुञ्जम् आक्रामति पादादिना आक्रामति अदाहकत्वादिति भाव: । ज्वलितं ज्वलन्तम् । कर्तरि क्त: । "मतिबुद्धि—" इत्यादिसूत्रे चकाराद्वर्तमानार्थत्वम् । हिरण्यं रेतो यस्य तं हिरण्यरेतसम् अग्निम् न आक्रामति, दाहकत्वादिति भाव: । अत: हेतो: मानिन: अभिभूतिभयात् प्राणलाभेन तेजस्त्यागे परिभवो भविष्यतीति भयात् असून् एव सुखम् अक्लिष्टम् उज्झन्ति त्यजन्ति, धाम तेजस्तु न उज्झन्ति । मानहानिकरात् जीवनात् स्वतेजसा मरणमेव वरम् इत्यर्थ: । पूर्वतरश्लोकवत् अर्थान्तरन्यासोऽलङ्कार: ।

Notes on Malli.—(1) ननु.........पश्येत्, इत्याशङ्क्याह—How can life

be sacrificed for the sake of a trifle—self-respect ? Because a man, if he lives, may experience hundreds of items of welfare—apprehending this he says. N. B. Malli seems to quote the words of Kālidāsa. "अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्" (Raghu II. 47).

(2) मानम्लानिकरात्......वरम्—Better a glorious death than an ignoble life.

Extracts from other Commentaries—"......भस्मनामिति बहुवचनेन कारणभेदकृतः कार्यभेदो द्योत्यते । तेन निःसारकिंशुकादिभस्मवत् गुरुसारखदिरादिभस्माप्या-स्कन्दनीयमिति गम्यते ।......असंहतभस्मवत् संहतभस्माप्यास्कन्दनीयमिति चयशब्देन द्योत्यते । ......भस्मनामिति बहुवचनेन हिरण्यरेतसमित्येकवचनेन च निरूप्याणी बहवः संहता अपि परिभाव्या एव, उत्पन्नानेकोऽपि दुराधर्ष एवेति द्योत्यते ।......मन्वग्निवाचके कस्मिंश्चिदपि शब्दे श्रुते तदर्थाविनाभूतं सर्वप्रत्यक्षं दाहकत्वं स्फुरत्येव । तेन जनो हिरण्यरेतसं नास्कन्दतीत्यत्र कुत इति जिज्ञासा नास्त्येव । तत् किमुच्यते अभिभूतिभयादिति । अत्रोच्यते । हेत्वन्तर-व्यावर्तनार्थम अभिभूतिभयादित्युक्तम्, नाज्ञातज्ञापनार्थम् । पदास्कन्दितोऽग्निः सद्यो दहतीति भयमेव जनस्य तदनास्कन्दने हेतुः । न दैवतात्वकृतम् समृद्धिदायकत्वहेतुकं वा गौरवम्, न चाधर्मभयमिति भावः ।......अग्निरिव निर्वाप्यते । अप्रतापशक्तेः मार्दवमेव दौर्बल्यमावहति न मार्दवमात्रम् । प्रतापशक्तियुक्तस्य तु मार्दवं भूषणमित्ययं चार्थो वाक्यशक्त्या व्यज्यते । सवितुस्तिग्मतैव प्रकृतिः, मार्दवं तु देशविप्रकर्षोपाधिकृतम् । राज्ञस्तु जनानुरागनिदानं नैसर्गिकं मार्दवं, तिग्मत्वम् औपाधिकम् इत्युपमानोपमेययोः भेदं द्योतयितुम् उपमा स्वीकृता न रूपकम्"—चित्रभानुः ।

Notes—ज्वलितम्—Adj. to हिरण्यरेतसम् । ज्वल + क्त, कर्तरि, वर्तमाने by the rule "मतिबुद्धिपूजार्थेभ्यश्च" । The word च in this Sūtra provides for the inclusion of such roots as are not mentioned in it.—"चकारोऽनुक्त-समुच्चयार्थः"—Bhaṭṭoji. Blazing.

हिरण्यरेतसम्—Obj. to आस्कन्दति ; fire. हिरण्यं रेतः यस्य सः (बहुव्रीहि) तम् ; delcined like वेधस् । Cf : "अग्नेरपत्यं प्रथमं सुवर्णम्" ।

चयम् - Heap ; obj. to आस्कन्दति । चि + अच् भावे = चयः ।

आस्कन्दति—आ – स्कन्द् + लट् ति । Nom. जनः ; tramples.

भस्मनाम्—शेषे षष्ठी : of ashes.

अभिभूतिभयात्—हेतौ पञ्चमी। अभिभूतेः भयम् (पञ्चमीतत्) तस्मात्; for fear of insult. अभि – भू + क्तिन् भावे = अभिभूतिः। भी + अच् भावे = भयम्—"अज्विधौ भयादीनामुपसंख्यानम्" (Vārttika).

असून्—Obj. to उज्झन्ति; lives. For derivation, see St. 19.

अतः—अव्यय। एतद् + तसिल् (पञ्चम्यर्थे)।

✓ सुखम्—Adv., qualifying the verb उज्झन्ति।

उज्झन्ति—Give up. Nom. मानिनः। उज्झ् + लट् अन्ति।

✓ धाम—Obj. to उज्झन्ति; inherent lustre. दधाति, धीयते वा इति धा + मनिन् = धामन्। like कर्मन्

मानिनः—Nom. to उज्झन्ति। मानः अस्ति एषाम् इति मान + इनि (मत्वर्थे) = मानिनः men of self-respect. मन् + घञ् = मानः। For definition of मानः see Chitrabhānu, St. 13, 19.

Ch. of Voice—ज्वलितः... ..हिरण्यरेताः, भस्मनां चयः आस्कन्द्यते जनेन...... असवः उज्झ्यन्ते......धाम (उज्झ्यते) मानिभिः।

Remark—The figure of speech in this verse is अर्थान्तरन्यास (for def., see St. 5). Here a general statement (in the second half) is supported by a particular statement (in the first half).

For similar idea of this verse, compare—"बलवानपि निस्तेजाः कस्य नाभिभवास्पदम्। निःशङ्कं दीयते लोकैः पश्य भस्मचये पदम्" ॥ (सुभाषितरत्नभाण्डागार—III. 492). "सदाभिमानैकधना हि मानिनः"—Śiśupālavadha I. 67. "सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते"—Gītā, II. 34.

The mighty never brooks the superiority of another.

किमपेक्ष्य फलं पयोधरान्
ध्वनतः प्रार्थयते मृगाधिपः ? ।
प्रकृतिः खलु सा महीयसः
सहते नान्यसमुन्नतिं यया ॥ २१ ॥

Prose—मृगाधिपः किं फलम् अपेक्ष्य ध्वनतः पयोधरान् प्रार्थयते ? महीयसः सा प्रकृतिः खलु यया अन्यसमुन्नतिं न सहते।

Beng.—সিংহ কি অভিপ্রায়ে গর্জ্জনকারী মেঘসমূহকে লক্ষ্য করিয়া আস্ফালন করে ? (অথবা, সিংহ কি কোন ফলাকাঙ্ক্ষায়......) মহৎ লোকের স্বভাবই এই যে, তাঁহারা অন্যের উন্নতি সহ্য করিতে পারেন না।

Eng. Equiv.—किम्—what. अपेक्ष्य—in view. फलम्—object. पयोधरान्—clouds. ध्वनतः—thundering. प्रार्थयते—roar at. मृगाधिपः—lion. प्रकृतिः—nature. खलु—verily. सा—the. महीयसः—of the mighty. सहते न—never allows to put up with. अन्यसमुन्नतिं—superiority of another.

Eng.—With what object in view does the lion roar at the thundering clouds ? (Or, Is it with any object in view that the lion roars. ....) Verily. it is the nature of the mighty that never allows them to put up with the superiority of another.

Expl.—The mighty cannot brook other's eminence ; and surely it is no sin on their part. It is their inherent nature ; since they are always ambitious and try to sway their supremacy over others. By heart and soul they always try to outshine their rivals out of fear for their own defeat. They part with their dear lives, but not with their spirit. To them nobody is unassailable ; and so they try first to emulate and then surpass the virtues of their strongest adversary. Look to the animal-world and there you will find the lord of beasts roaring at the thundering clouds. The lion thinks the rumbling of the cloud to be the roar of another lion and so cannot endure it. Remember the story in Hitopadeśa how a lion plunged himself into a well, hearing the echo of his own voice. And you, being a Kṣattriya king, are calmly enduring your enemy's rise. Rise up and justify your title as a king.

Malli.—(अथवा किमत्र प्रयोजनं चिन्तया ? (प्रयोजनचिन्तया ?) किन्तु तेजस्विनामयं स्वभाव एव यं ज्जिगीषुत्वम् इत्याशयेनाह—किमिति । मृगाधिपः सिंहः किं फलं प्रयोजनम् अपेक्ष्य ध्वनतः गर्जतः, धरन्तीति धराः, पचाद्यच् । पयसां धराः तान् पयोधरान् मेघान् प्रार्थयते, अभियाति ? "याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः" इति केशवः ।) अथवा प्रार्थयते अवरुणद्धि

इत्यर्थः। प्रा अर्थयते। "प्रा स्यात् याच्ञावरोधयोः" इत्यभिधानात् प्रा अवरोधेन। प्रा इति तृतीयान्तम्। आकारान्तस्य प्रा-शब्दस्य योगविभागात् "आतो धातोः" इत्यालोपः। तथाहि— महीयसः महत्तरस्य सा प्रकृतिः खलु स्वभावः यया प्रकृत्या अन्यसमुन्नतिं परवृद्धिं न सहते। महतः परभञ्जनमेव पुरुषार्थं इत्यर्थः। पूर्ववत् अलङ्कारः।

Notes on Malli.—(1) अथवा...... इत्याशयेनाह—What is the use of deliberation here? But it is the nature of the mighty that they desire to win over others—with this intention he says.

(2) महतः.........इत्यर्थः—The meaning is—To the valiant subjugation of the enemies is the sole object of life.

Notes—किम्—Adj. to फलम्, what (object); or, is it that.

अपेक्ष्य—अप-ईक्ष्+ल्यप्; desiring, waiting for.

फलम्—Obj. to अपेक्ष्य। फलम् means प्रयोजनम्, result, object.

पयोधरान्—Obj. to प्रार्थयते; clouds. धरन्तीति धराः (पचाद्यच्); पयसां धराः (षष्ठीतत्) ताम्।

ध्वनतः—Adj. to पयोधरान्। ध्वन्+शतृ, २या बहुवचन; thundering; making a reverberating sound.

प्रार्थयते—Nom. मृगाधिपः। प्र-अर्थ (चुरादि)+लट् ते। Attacks, challenges. प्रार्थना means 'challenge' and 'supplication'. Malli also splits the word as प्रा अर्थयते। प्रा is a तृतीयान्त word meaning अवरोध। अवरोधेन अर्थयते i. e., अवरुणद्धि। See Com.

मृगाधिपः—The lion. See, St. 18.

प्रकृतिः—Nom. to भवति understood. प्र-कृ+क्तिन् भावे = प्रकृतिः, nature.

महीयसः—शेषे षष्ठी। अतिशयेन महान् इति महत्+ईयसुन् = महीयान्, तस्य; of the mighty.

सहते—Nom. सः understood. सह+लट् ते। Brooks.

अन्यसमुन्नतिम्—Obj. to सहते। अन्येषां समुन्नतिः (षष्ठीतत्) ताम्। सम्-उद्-नम्+क्तिन् भावे = समुन्नतिः।

यया—Means प्रकृत्या। हेतौ तृतीया।

Ch. of Voice—पयोधराः ध्वनन्तः प्रार्थ्यन्ते मृगाधिपेन ।......प्रकृत्या तया (भूयते), अन्यसमुन्नतिः सह्यते ।

Remark—The figure of speech in this verse is अर्थान्तरन्यास (for def., see St. 5). Here a general statement (in the second half) is supported by a particular statement (in the first half).

For similar idea of this stanza, compare—"न तेजस्तेजस्वी प्रसृतमपरेषां विषहते, स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः । मयूखैरश्रान्तं तपति यदि देवो दिनकरः किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति" ॥—उत्तररामचरिते—VI. 14.

"परवृद्धिमत्सरि मनो हि मानिनाम्"—शिशुपालवधे—XV. 1.

"नान्यस्य गन्धमपि मानभृतः सहन्ते"— Do V. 42.

So rise up and manifest your valour. The destruction of your enemy is delayed by your inaction.

कुरु तन्मतिमेव विक्रमे
नृप ! निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां
त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

Prose—(हे) नृप ! तत् प्रमादजं तमः निर्धूय विक्रमे एव मतिं कुरु । विद्विषां विपत्तयः त्वदनुत्साहहताः—एतद् ध्रुवम् अवेहि ।

Beng.—অতএব মহারাজ ! আপনি প্রমাদ-জনিত মোহ পরিত্যাগপূর্ব্বক পৌরুষ প্রদর্শনের সঙ্কল্প করুন। আপনি ইহা নিশ্চয় জানিবেন যে শত্রুবর্গের বিপদ্ আপনার অনুৎসাহের দ্বারা প্রতিবদ্ধ হইয়া আছে।

Eng. Equiv.—कुरु मतिम्—resolve. तत्—therefore. विक्रमे—to manifest your valour. नृप !—O king ! निर्धूय—abandon. तमः—apathy. प्रमादजम्—generated by misapprehension. ध्रुवम् एतद् अवेहि—rest assured. विद्विषां—of your enemies. त्वदनुत्साहहताः—delayed by your inaction. विपत्तयः - destruction

Eng.—Abandon your apathy therefore, O king ! generated by misapprehension and resolve to manifest your valour. Rest

assured that the destruction of your enemies is delayed only by your inaction.

Expl.—So you have embraced this life of inaction out of your lack of foresight and wisdom. Cast away this apathy born of misapprehension and resolve to manifest your Kṣattriya valour. So long as you are inactive, your enemies will enjoy your fortune and thus rise gradually so that they will oust you completely in the end. Guard yourself against this sure possibility which will ultimately come. Rest assured that the destruction of your enemies is delayed only by your inaction.

Malli.—(उक्तं प्रयोजनं निगमयति—कुरु तदिति । हे नृप ! तत् तस्मात् उक्तरीत्या पराक्रमावसरत्वात् हेतोः । "यत्तद्यतस्ततो हेतौ" इत्यमरः । प्रमादजं तमः मोहं निर्धूय निरस्य विक्रमे पौरुषे एव मतिं कुरु, विक्रममेव अङ्गीकुरु, न तु उपायान्तरमित्यर्थः । न च विक्रमवैफल्यशङ्का कार्या इत्याह—ध्रुवमिति । विद्विषां विपत्तयः त्वदनुत्साहहताः, तव अनुत्साहेन अव्यवसायेन हताः प्रतिबद्धाः । अन्यथा प्रागेव विपद्येरन्निति भावः । इति एतत् ध्रुवम् निश्चितम् अवेहि विद्धि । "ध्रुवं नित्ये निश्चिते च" इति शाश्वतः ।)

Notes on Malli.—(1) उक्तं.........निगमयति—In conclusion he summarizes his own arguments. (उक्तार्थोपसंहरणं निगम उच्यते) ।

Notes—कुरु--कृ + लोट् हि । Nom. त्वम् understood.

तत्—अव्यय means तस्मात् हेतोः । Therefore.

मतिम्—Obj. to कुरु । मन + क्तिन् = मतिः, ताम् । मतिं कुरु = make up your mind.

एव—अव्यय । अन्ययोगव्यवच्छेदार्थम् । Resolve to manifest your valour and nothing else.

विक्रमे—अधिकरणे ७मी । वि - क्रम + घञ् भावे = विक्रमः ; valour.

नृप—सम्बोधने १मा । नॄन् पाति इति उपपदसमासे नृ - पा + क कर्तरि ।

निर्धूय—निर् - धू + ल्यप् ; casting off, abandoning. The root धू is conjugated in the भ्वादि, स्वादि, क्र्यादि and तुदादि groups cf. "धूनोति चम्पक-

वनानि धुनीत्यशोकम्, चूतं धुनाति धुवति स्फुटितातिमुक्तम्। वायुर्विधूनयति चम्पकपुष्परेणून्, यत् कानने धवति चन्दनमञ्जरीञ्च" ॥ (हलायुधः)।

तमः—Obj. to निर्धूय। Apathy, dulness. तम्+असुन्=तमः। "तमो ध्वान्ते गुणे शोके क्लीवं, वा ना विधुन्तुदे" इति मेदिनी।

प्रमादजम्—Adj. to तमः। प्र–मद+घञ् भावे=प्रमादः; carelessness, misapprehension. "प्रमादोऽनवधानता" इत्यमरः। प्रमादात् जायते इति उपपदसमासे प्रमाद–जन+ड प्रमादजम्।

ध्रुवम्—Adv. qualifying the verb अवेहि। Certaily.

एतत्—Obj. to अवेहि। Refers to the following sentence विद्विषां etc.

अवेहि—Nom. त्वम् understood. इ+लोट् हि=एहि। अव+एहि=अवेहि (पररूप एकादेश) by the rule "ओमाङोश्च"। Here the वृद्धिसूत्र "एत्येधत्यूठसु" is not valid against this Sūtra, though it is valid against "एङि पररूपम्"—by the परिभाषा "पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्"। (अव एहीति एकारे आङ्त्वमाश्रित्य प्राप्तम् "ओमाङोश्च" इति पररूपम्)।

विद्विषाम्—शेषे षष्ठी। वि–द्विष्+क्विप् कर्तरि, षष्ठी बहुवचन।

त्वदनुत्साहहताः—Adj. to विपत्तयः। न उत्साहः (नञ्तत्)=अनुत्साहः want of exertion. तव अनुत्साहः (षष्ठीतत्)=त्वदनुत्साहः। त्वदनुत्साहेन हताः (तृतीयातत्)। उत्–सह+घञ् भावे=उत्साहः।

विपत्तयः—Nom. to भवन्ति understood. वि–पद+क्तिन् भावे=विपत्तिः; calamity.

Ch. of Voice—क्रियतां......मतिः.........अवेयतां (त्वया)........विपत्तिभिः त्वदनुत्साहहताभिः (भूयते)।

Who of your enemies will be bold enough to brave your four brothers?

द्विरदानिव दिग्विभाविता-
ञ्चतुरस्तोयनिधीनिवायतः।
प्रसहेत रणे तवानुजान्
द्विषतां कः शतमन्युतेजसः ? ॥ २३ ॥

Prose—दिग्विभावितान् आयतः चतुरः द्विरदान् इव (तथा चतुरः) तोयनिधीन् इव रणे दिग्विभावितान् शतमन्युतेजसः चतुरः तव अनुजान् द्विषतां कः प्रसहेत ?

Beng.—দিগন্ত-প্রথিত চারিটি দিগ্‌গজ ও সাগর-চতুষ্টয়ের ন্যায় ইন্দ্রতুল্য-পরাক্রম ও দিগন্ত-প্রথিত আপনার অনুজগণ যখন সমরাঙ্গণে প্রবেশ করবে, তখন শত্রুগণের মধ্যে কে ইহাদিগকে সহ্য করিতে পারে ?

Eng. Equiv.—द्विरदान्—elephants. दिग्विभावितान्—(1) well-known, (2) renowned in all the quarters. चतुरः—four तोयनिधीन्—oceans. आयतः—rushing forward. प्रसहेत—will be able to withstand. रणे—in battle. तव—your. अनुजान्—brothers. द्विषतां—of your enemies. कः—who. शतमन्युतेजसः—having the might of Indra.

Eng.—Who of your enemies will be able to withstand in battle your four brothers, renowned in all the quarters, and having the might of Indra, rushing forward like the four well-known elephants or like the four oceans ?

Malli.—न च नः पराजयशङ्का कार्येत्याह – द्विरदानिति । दिग्विभावितान् दिक्षु प्रसिद्धान् तान् आयतः आगच्छतः । आङ्पूर्वादिणधातोः शतृ-प्रत्ययः । चतुरः द्विरदान् दिग्गजान् इव तथोक्तविशेषणान् चतुरः तोयनिधीन् इव रणे आयतः दिग्विभावितान् शतमन्युतेजसः इन्द्रविक्रमान् चतुरः तव अनुजान् द्विषतां मध्ये कः प्रसहेत ? सोढुं शक्नुयादित्यर्थः । "शकि लिङ् च" इति शक्यार्थे लिङ् । अतो निःशङ्कं प्रवर्तस्व इति भावः ।

Notes on Malli—(1) न च.........कार्या—Nor should our defeat be apprehended.

(2) अतः......... प्रवर्तस्व—So march on fearlessly.

Notes—द्विरदान्—उपमान of अनुजान् । द्वौ रदौ (teeth) येषां ते (बहुव्रीहि) = द्विरदाः, तान् ; elephants.

दिग्विभावितान् –Adj. to अनुजान्, द्विरदान् and तोयनिधीन् । दिक्षु विभाविताः (सुपसुपेति) तान् । वि - भू + णिच + क्त कर्मणि । (1) अनुजपक्षे—renowned in the quarters ; (2) अन्यत्र—well-known.

चतुरः—Adj. to अनुजान्, द्विरदान् and तोयनिधीन् । The eight elephants who guard the cardinal points, with their respective females, are—(1) ऐरावतः (अभ्रमु) ; (2) पुण्डरीकः (कपिला) ; (3) वामनः (पिङ्गला) ; (4) कुमुदः (अनुपमा) ; (5) अञ्जनः (ताम्रकर्णी) ; (6) पुष्पदन्तः (शुभ्रदन्ती) ; (7) सार्वभौमः (अङ्गना) ; (8) सुप्रतीकः (अञ्जनावती)—Amarakoṣa. The oceans

are seven in number—"लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः."—encircling seven islands comprising the entire globe.

तोयनिधीन् - उपमान of अनुजान्। तोयानां निधयः (षष्ठीतत्)। नि - धा + कि, अधिकरणे = निधिः (masculine) oceans.

आयतः—Adj. to अनुजान्, द्विरदान् and तोयनिधीन्। आ - इण + शतृ, २या बहुवचन ; rushing forward.

प्रसहेत—Nom. कः। प्र - सह् + लिङ् ईत। By the rule "शकि लिङ् च" which means that लिङ् as well as the कृत्य affixes are added to a verb, when the sense is that of capability.—Can withstand, overpower.

रणे—अधिकरणे ७मी। In the battle.

द्विषतां—षष्ठी निर्धारणे। For derivation, see St. 8.

शतमन्युतेजसः—Adj. to अनुजान्। शतमन्यु is an epithet of Indra. An instance of अविग्रह नित्यसमास may be dissolved as—शतं मन्यवो (यज्ञाः) यस्य सः (बहुव्रीहि)। शतमन्योः तेजः (षष्ठीतत्) = शतमन्युतेजः। शतमन्युतेजः इव तेजः येषां ते (उपमानगर्भ उत्तरपदलोपी बहुव्रीहि) तान्। The first तेजः is dropped by the Vārttika—"सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः"।

Ch. of Voice—द्विरदाः दिग्विभाविताः......चत्वारः तोयनिधयः.........आयन्तः अनुजाः केन प्रसह्येरन्?

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here the four brothers are compared with the elephants and oceans. In the common adjectives दिग्विभावितान् and आयतः we have श्लेषः (see St. 3) which is subordinate to the main figure उपमा। Thus we get a सङ्करः।

May the fire of your anger be extinguished by the tears of the wives of your enemies.

ज्वलतस्तव जातवेदसः
सततं वैरिकृतस्य चेतसि।
विदधातु शमं शिवेतरा
रिपुनारीनयनाम्बुसन्ततिः॥ २४॥

Prose—तव चेतसि सततं ज्वलतः वैरिकृतस्य जातवेदसः शिवेतरा रिपुनारीनयनाम्बु-सन्ततिः शमं विदधातु।

Beng.—শত্রুরমণীগণের অশুভজনক অশ্রুধারা আপনার অন্তরে নিরন্তর প্রজ্বলিত শত্রুকৃত ক্রোধাগ্নি নির্ব্বাপিত করুক।

Eng. Equiv.—ज्वलत:—blazing. तव—your. जातवेदस:—fire of anger. सततं—ever. वैरिकृतस्य—kindled by your enemies. चेतसि—mind. विदधातु शमं—extinguish. शिवेतरा—inauspicious. रिपुनारीनयनाम्बुसन्तति:—flood of tears from the eyes of the wives of your enemies.

Eng.—May the ever blazing fire (of anger) in your mind which is kindled by your enemies, be extinguished by the inauspicious flood of tears from the eyes of the wives of your enemies.

Malli.—(आशीर्वादव्याजेन फलितमाह—ज्वलत इति। तव चेतसि सततं ज्वलतो वैरिकृतस्य जातवेदस: क्रोधाग्ने: इत्यर्थ:। शिवेतरा अशिवा अमङ्गला, वैधव्यदु:खजनकत्वादिति भाव:। रिपुनारीनयनाम्बुसन्तति: वैरिवनिताश्रुप्रवाह: शमं विदधातु। वैरिकृतस्य क्रोधस्य वैरिवधम् अन्तरेण शान्त्यसम्भवात् अवश्यं तद्वधस्त्वया कर्तव्य इत्यर्थ:। क्रोधस्य विषयस्य निगरणेन विषयिणो जातवेदस एव उपनिबन्धनात् अतिशयोक्तिरलङ्कार:। तदुक्तम्—"विषयस्यानुपादानात् विषय्युपनिबध्यते। यत्र सातिशयोक्ति: स्यात् कवे: प्रौढोक्तिजीविता"॥ इति। तत्रापि क्रोधस्य जातवेदसो भेदेऽपि अभेदाध्यवसायाद् भेदेऽभेदरूपा, तत एव अम्बुनिर्वाप्यत्वोक्तिश्च घटते। तथा च, यथा अम्बुसेकेन अग्नि: सम्यक् शाम्यति तथा शत्रुवधेन क्रोध इति औपम्यं गम्यते।)

Notes on Malli.—आशीर्वाद.........आह—Now he concludes under the pretext (व्याज) of a pious wish.

Notes—ज्वलत:—Adj. to जातवेदस:। ज्वल्+शतृ, षष्ठी १वचन। Blazing. जातवेदस: अपि षष्ठी। जात-विद्+असुन् (औणादिक)=जातवेदा:; fire. This word is variously derived—(1) जातं वेद: (धनम्) यस्मात्; "धनमिच्छेद्धुताशनात्" इत्यादिश्रुते:। (2) जाते जाते विद्यते। (3) जातं वेत्ति वेदयते वा। (4) जातानि एनं विदु:। (5) जातानि वेद। (6) जातवेदा: जातविद्य: इत्यर्थ:। Compare, Yāska's Nirukta.

सततम्—Adv. qualifying the verb ज्वलत:; अव्यय। सम्-तन्+क्त। Alt. form सन्ततम् by the rule "समो वा हिततत्तयो:" which means that the म of सम् is optionally droped before हित and तत। Thus सहित, संहित।

वैरिकृतस्य—Adj. to जातवेदसः। Kindled by your enemies. वीरस्य कर्म भावो वा इति वीर+अण् [युवादित्वात् or—"वैरमैथुनिकयोः" (IV. 3-125) इति निर्देशात्]=वैरम्। तदस्यास्तीति वैर+इनि (मत्वर्थे)=वैरिन्। तैः कृतः (तृतीयातत्) तस्य।

चेतसि—अधिकरणे ७मी।

विदधातु—वि-धा+लोट् तु (आशिषि)। Nom. रिपुनारीनयनाम्बुसन्ततिः।

शमम्—Obj. to विदधातु। शम्+घञ् भावे। "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति वृद्ध्यभावः।

शिवेतरा—Adj. to रिपुनारीनयनाम्बुसन्ततिः; inauspicious. शिवात् इतरा (५मीतत्)। Here the compound is a pronoun (उत्तरपदप्रधानत्वात् तत्पुरुषस्य)। But if the compound is a बहुव्रीहि (शिवः इतरः यस्याः सा:) which is अन्यपदार्थप्रधान, the independence of the pronoun (इतर) is not retained by the rule "न बहुव्रीहौ"। A third analysis is possible e. g., शिवम् इतरयति इति शिव+इतर+णिच्+अच्=शिवेतर, स्त्रियाम्। Here the compound is also a noun. See Canto I. St. 14 (परेतरान्)। Inauspicious, because it causes widowhood. (Malli).

रिपुनारीनयनाम्बुसन्ततिः—Nom. to विदधातु। रिपूणां नार्यः (षष्ठीतत्)=रिपुनार्यः। रिपुनारीणां नयनानि (षष्ठीतत्); रिपुनारीनयनानाम् अम्बूनि (षष्ठीतत्), तेषां सन्ततिः (षष्ठीतत्)। Flood of tears from the eyes of the wives of the enemies सम्-तन्+क्तिन्=सन्ततिः।

Ch. of Voice—......शिवेतरया रिपुनारीनयनाम्बुसन्तत्या शमः विधीयताम्।

Remark—The figure of speech in this verse is अतिशयोक्ति which is thus defined "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते" (साहित्यदर्पण X. 64). The guiding factor of an Hyperbole is that the विषय (उपमेय) is altogether swallowed up by विषयी (उपमान). Here for example, the wrath (विषय) has been spoken of as fire (विषयी), but the comparison has not been stated; or in other words, the difference between the wrath and fire has been completely ignored. Hence this is the first variety of अतिशयोक्ति which has five varieties, viz., (1) भेदे अभेदः—

when things really different are described as non-different ; (2) अभेदे भेदः—when things really not different are described as quite different ; (3) सम्बन्धे असम्बन्धः—when non connection is put forth between objects where there is connection ; (4) असम्बन्धे सम्बन्धः—when connection is described between objects where there is no connection ; (5) कार्य-कारणयोः पौर्वापर्यविपर्ययः—when the sequence of cause and effect is reversed.

Again, as Malli observes, we have उपमा here as the suggested figure. The suggestion is—just as fire is extinguished by water, so your wrath will be appeased by the killing of your enemies.

Yudhisthira then tried to pacify angry Bhīma.

इति दर्शितविक्रियं सुतं
मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुं महीपति-
र्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

Prose—इति दर्शितविक्रियं कोपपरीतमानसं मरुतः सुतं महीपतिः दुष्टं द्विरदम् इव उपसान्त्वयितुम् उपचक्रमे ।

Beng.—বায়ুপুত্র ভীম দুষ্ট হস্তীর ন্যায় এইরূপে বিকৃতচিত্ত ও ক্রোধাক্রান্ত হইয়া উঠিলে মহীপাল যুধিষ্ঠির তাঁহাকে অনুনয় করিতে প্রবৃত্ত হইলেন।

Eng. Equiv.—इति—thus. दर्शितविक्रियं—who had manifested his excitement. मरुतः सुतं—the son of Marut (Bhīma). कोपपरीतमानसम्—whose mind was overpowered with anger. उपसान्त्वयितुम्—to appease. महीपतिः—the monarch (Yudhisthira). द्विरदं—elephant. दुष्टम्—wild. उपचक्रमे—began.

Eng.—The monarch began to appease the son of Marut (Bhīma) as one would do a wild elephant, whose mind was overpowered by anger and who had thus manifested his excitement.

Malli.—इतीति । इति उक्तरीत्या दर्शितविक्रियं दर्शिता विक्रिया विकारो वागारम्भात्मको येन तं, कोपपरीतमानसम् कोपाक्रान्तचित्तम् । इदं विशेषणद्वयं द्विरदेऽपि योज्यम् । मरुतः

सुतं भीमं महीपतिः युधिष्ठिरः दुष्टं द्विरदमिव । एतेन अस्य शौर्यमेव न बुद्धिरस्तीति गम्यते । उपसान्त्वयितुम् अनुनेतुम् उपचक्रमे प्रवृत्तः । "प्रोपाभ्यां समर्थाभ्याम्" इत्यात्मनेपदम् । राज्ञा तावत् भाव्युपकारविशेषापेक्षया कथंचित् अवशो जनः शनैः शनैः द्विरदवत् वशीकरणीयः, न तु त्याज्य एव इति भावः ।)

Notes on Malli.—(1) राज्ञा......एव—A king, in anticipation of some particular benefit in future, should try gradually to bring under control an uncontrollable person like an elephant, but should never quit him altogether.

Notes.—इति—अव्यय । इत्थम् । Thus.

दर्शितविक्रियम्—Adj. to सुतम् । दर्शिता विक्रिया येन सः (बहुव्रीहि) तम् । वि–कृ + श भावे स्त्रियाम् = विक्रिया । दृश् + णिच् + क्त कर्मणि, स्त्रियाम् = दर्शिता ।

सुतम्—Obj. to उपसान्त्वयितुम् । Son. सूयते स्म = सू + क्त कर्मणि = सुतः ।

मरुतः—शेषे षष्ठी । Of the Wind god.

कोपपरीतमानसम्—Adj. to सुतम । कोपेन परीतम् (तृतीयातत्); कोपपरीतं मानसं यस्य सः (बहुव्रीहि) तम् । कुप + घञ् भावे = कोप. । परि – इ (२) + क्त कर्मणि = परीतम् ; lit., surrounded by wrath.

उपसान्त्वयितुम्—उप – सान्त्व (चुरादि) + तुमुन् ; to appease.

महीपतिः—मह्याः पतिः (षष्ठीतत्); refers to Yudhiṣṭhira. The base is declined like मुनि by the rule "पतिः समास एव" ।

द्विरदम—उपमान of सुतम् । For derivation see, St. 23.

दुष्टम्—Adj. to द्विरदम् । दुष् + क्त = दुष्टः । Wild, excited.

उपचक्रमे – Nom. महीपतिः । उप – क्रम + लिट् ए । The आत्मनेपद is by the rule "प्रोपाभ्यां समर्थाभ्याम्" which means that क्रम् takes आत्मनेपद preceded by प्र and उप, both conveying the same sense (i. e, beginning an action. प्रारम्भे अनयोस्तुल्यार्थता) ।

Ch. of Voice—......महीपतिना......... ।

Remark—The figure of speech in this verse is उपमा (for def, see St. 5). Here Bhīma is compared with a wild elephant.

Your speech reflects your clear mind.

अपवर्जितविप्लवे शुचौ
हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां
मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

Prose—अपवर्जितविप्लवे शुचौ (अतएव) हृदयग्राहिणि मङ्गलास्पदे तव गिरां विस्तरे मतिः आदर्शे इव विमला अभिदृश्यते ।

Beng.—নির্ম্মল, বিশুদ্ধ, মনোরম ও শ্রেয়স্কর দর্পণের ন্যায় প্রামাণিক, শব্দ-সৌষ্ঠবযুক্ত, হৃদয়গ্রাহী এবং হিতকর তোমার এই বাক্য-প্রপঞ্চে তোমার নির্ম্মল বুদ্ধি পরিলক্ষিত হইয়েছে ।

Eng. Equiv.—अपवर्जितविप्लवे—(1) free from dust ; (2) free from questionable arguments (sophistry). शुचौ—(1) transparent ; (2) lucid. हृदयग्राहिणि (1) charming to the mind ; (2) attractive to the heart. मङ्गलास्पदे—(1) auspicious ; (2) salutary. विमला - clear. तव—your. विस्तरे गिरां—extent of speech. मतिः—mind. आदर्शे इव—as in a mirror. अभिदृश्यते—is reflected.

Eng.—As in a mirror, which is free from dust, transparent, charming to the mind and auspicious, so in the extent of your speech, that is free from questionable arguments, lucid, attractive to the heart and salutary, your clear mind is reflected.

Expl.—No doubt your words speak of your honest intention. Your arguments are not contrary to reasoning and proof and your style is lucid. As your speech is full of wholesome advice, it naturally captivates the mind of all. You have touched nothing unnessary and missed no important point. Your delivery was simply unique. As in a mirror, which is clear, free from the coating of dust, made of excellent glass and hence transparent, and auspicious, so in this your speech your honest wisdom is clearly reflected.

Malli.—प्रथमं तावत् स्तुत्यादिभिः प्रसादयति—अपवर्जितेति । विप्लवः प्रमाणबाधः

अन्यत्र बाह्यमलसंक्रमः। सोऽपवर्जितो यस्य तस्मिन् अपवर्जितविप्लवे। शुचौ, शुचित्वं सौशब्द्यं लौहशुद्धिश्च, तद्वति। अत एव हृदयग्राहिणि मनोरमे। मङ्गलास्पदे, एकत्र हितार्थप्रतिपादकत्वात्, अन्यत्र मङ्गलवस्तुत्वात् च श्रेयस्करे। "रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम्। गुरुमग्निं तथा सूर्यं प्रातः पश्येत् सदा बुधः"॥ इति पुराणवचनात्। तत्र गिरां विस्तरे वाक्यप्रपञ्चे। "प्रथने वावशब्दे" इति घञ्प्रतिषेधात्, "ऋदोरप्" इत्यप्। अत एव "विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः" इत्यमरः। मतिः तद्बुद्धिः आदर्शे दर्पण इव। "दर्पणे मुकुरादर्शौ" इत्यमरः। विमला विशदा अभिदृश्यते। वाग्वैशद्यादेव मतिवैशद्यमनुमीयते। तत्पूर्वकत्वात् तस्येत्यर्थः।

Notes on Malli—(1) प्रथमं.........प्रसादयति—First, he pleases him with eulogy, etc.

(2) वाग्वैशद्यात्......त्यर्थः—The honesty of your intention is guessed from the clarity of your expression which surely precedes the other.

Notes—अपवर्जितविप्लवे—Adj. to गिरां विस्तरे and आदर्शे। अपवर्जितः विप्लवः यस्य सः (बहुव्रीहि) तस्मिन्। (1) वाक्यपक्षे—विप्लवः means absence or negation of reasoning. (2) आदर्शपक्षे—विप्लवः means - outer coating of dust—बाह्यमलसंक्रमः। अप – वृज् + णिच् + क्त कर्मणि = अपवर्जितः। वि – प्लु + अप् भावे = विप्लवः।

शुचौ—Adj. to गिरां विस्तरे and आदर्शे। (1) वाक्यपक्षे—of beautiful words i. e., lucid; (2) आदर्शपक्षे—(made of excellent glass) hence transparent.

हृदयग्राहिणि—Adj to गिरां विस्तरे and आदर्शे। हृदयं गृह्णातीति (उपपदसमासे) हृदय + ग्रह + णिनि कर्तरि, attractive to the heart and mind.

मङ्गलास्पदे—Adj. to गिरां विस्तरे and आदर्शे। मङ्गलस्य आस्पदम् (षष्ठीतत्)। तस्मिन्। (1) वाक्यपक्षे--salutary, because it is full of wholesome advice. (2) आदर्शपक्षे—auspicious, because it is said in the Purāṇas that "in the morning the wise man should look at the yellow pigment, sandal, gold, drum, mirror, gem, preceptors, fire and the sun." (See Malli.) आपद्यते अस्मिन् इति आ – पद + घ—the स् comes irregularly by the rule "आस्पदं प्रतिष्ठायाम्"।

विमला—Adj. to मतिः। विगतं मलं यस्याः सा (बहुव्रीहि)। मलः, मलं—both masc., and neuter. Alt. form विगतमला by the Vārttika—"प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः"—clear.

विस्तरे—अधिकरणे सप्तमी ; expansion (of words only). वि—स्तृ+अप् by the rule "ऋदोरप्" = विस्तरः। Here घञ is prohibited by the rule "प्रथने वावशब्दे" which means that the root स्तृ preceded by वि will not take घञ् when used in the sense of 'expansion of a speech'. But घञ is used after वि-स्तृ to denote the expansion of material object, e. g., पटस्य विस्तारः (वि—स्तृ+घञ्)—the expansion of cloth. वि—स्तृ+अप् also yields another form विष्टरः which is formed irregularly by the rule—"वृक्षासनयोर्विष्टरः"। विष्टरः means a tree or a seat.

गिराम्—शेषे षष्ठी। Speech.

आदर्शे—उपमान of गिरां विस्तरे। In a mirror. आदृश्यते रूपमत्र इति आ—दृश्+घञ् अधिकरणे। "दर्पणे मुकुरादर्शौ" इत्यमरः।

अभिदृश्यते—Nom. मतिः। अभि—दृश+लट् ते, कर्मणि ; is seen, reflected.

Ch. of Voice—.....विमलां मतिं......अभिपश्यामि।

Remark—The figure of speech in this verse is a सङ्कर of उपमा and श्लेष (for def., see St. 3). Here Bhīma's speech is compared with a mirror. Here उपमा is the main (अङ्गी) figure and श्लेष is subordinate to it. Hence सङ्करः (नीरक्षीरन्यायेन)। In all the adjectives qualifying both the speech and the mirror we have अर्थश्लेष, as all the adjectives can be replaced by their synonyms.

Your words have all the requisites of a good speech.

स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां
न च सामर्थ्यमपोहितं क्वचित्॥ २७॥

Prose—पदैः स्फुटता न अपाकृता, अर्थगौरवं न स्वीकृतम् (इति) न च, गिरां पृथगर्थता रचिता, क्वचित् (अपि गिराम्) सामर्थ्यं न न अपोहितम्।

Beng.—তোমার প্রযুক্ত পদগুলিতে স্পষ্টার্থতা অপনীত হয় নাই ; ইহাতে অর্থগৌরব রক্ষিত ও পুনরুক্তিদোষ দূরীকৃত হইয়াছে এবং কোনও স্থলে বাক্যের সাকাঙ্ক্ষত্ব বর্জ্জন করা হয় নাই।

Eng. Equiv.—स्फुटता - perspicuity. पदैः—words. न च न—nor wanting. अर्थगौरवम्—depth of meaning. रचिता पृथगर्थता—there is no repetition. सामर्थ्यम्—syntax. अपोहितं—neglected.

Eng.—Your words are perspicuous, nor are they wanting in the depth of meaning. There is no repetition of words, nor is syntax neglected anywhere [Lit : (In your speech) perspecuity has not been forsaken by words, nor has depth of meaning been unattended to ; synonyms of words have been used......]

Expl.—Your speech is simply wonderful. You have used unambiguous words of clear import. You have not therefore allowed perspicuity to be forsaken by the words You have not spoken like ordinary men whose words only echo the sense they express. But your words are suggestive and have depth of meaning. You have said a little but have suggested a world of ideas. You have used in your speech the significant synonyms of the same word and thereby you have avoided repetition of words and ideas ; nor have you neglected the mutual interdependence of words and sentences and thereby you have given a complete and perfect shape to your thought. In a word, your speech has attained a unique perfection.

Malli.—अथ युग्मेनाह—स्फुटतेति। पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता न अपाकृता न त्यक्ता। अर्थगौरवम् अर्थभूयस्त्वं वा न च न स्वीकृतम्। स्वीकृतमेवेत्यर्थः। वैशद्यप्रसक्तार्थगौरवाभावनिवर्तनार्थं नञ्द्वयम्, "सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ" इति वामनः। गिरां पदानाम् अवान्तरवाक्यानां च पृथगर्थता भिन्नार्थता, अपुनरुक्तार्थतेति यावत्, रचिता कृता। तथा क्वचित् अपि सामर्थ्यम् गिराम् अन्योन्यसाकाङ्क्षत्वं न च अपोहितं न वर्जितम्। अन्यथा दशदाडिमादिशब्दवत् एकवाक्यता न स्यात्। यथाहुः—"अर्थैकत्वादेकवाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति। ननु अर्थगौरवमित्यत्र कथं षष्ठीसमासः; "पूरणगुण..." इत्यादिना प्रतिषेधात्? नैष दोषः। ये शुक्लादयः शब्दा गुणे गुणिनि च वर्तन्ते, यथा—'पटस्य शौक्ल्यम्' 'शुक्लः पटः' इति च, तेषामेवात्र निषेधात्, ये पुनः स्वतो गुणमात्रवचनाः—यथा गौरवं प्राधान्यं रसो गन्धः

स्पर्श इत्येवमादय: तेषामनिषेधात्। तथा "तत्स्थैश्च गुणै: षष्ठी समस्यते" इति वचनात् बहुलमभियुक्तप्रयोगदर्शनाच्च। बलाकाया: शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमास:। अत-एवाह वामन:—"पत्रपीतिमादिषु गुणवचनसमासो बालिश्यात्" इति।

Notes—स्फुटता—उक्ते कर्मणि १मा। स्फुट+तल् भावे स्त्रियाम्; perspicuity.

पदै:—अनुक्ते कर्तरि तृतीया। Inflected words. Cf. "सुप्तिङन्तं पदम्" (Pāṇini).

अपाकृता—Verbal adj. to स्फुटता। अप–आ–कृ+क्त कर्मणि, स्त्रियाम्; discarded.

न न—Here the two negatives bar the possibility of the absence of the depth of meaning which may result from perspicuity. Cf. "सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ" (वामन, काव्यालङ्कारसूत्र I. 9). "Two negatives are used to bar a possible negation."

स्वीकृतम्—न स्वम् अस्वम्, अस्वं स्वं सम्पद्यमानं कृतम् इति गतिसमासे स्व+च्वि अभूत-तद्भावार्थे+कृ+क्त कर्मणि।

अर्थगौरवम्—उक्ते कर्मणि १मा। अर्थस्य गौरवम् (षष्ठीतत्); depth of meaning, गुरो: भाव: गुरु+अण् = गौरवम्। A षष्ठी समास is barred with a word expressing quality (गुणवाचक शब्द e. g., गौरवम्) by the rule "पूरणगुण-सुहितार्थसदव्ययतव्यसमानाधिकरणेन"। So, how the genetive compound in अर्थगौरवम् is valid? Malli following कैयट thus solves the problem. The genetive is not compounded with words like शुक्ल which are used as adjective and also as nouns (गुण and गुणी). There are some words which express both abstract quality and concrete objects; there are other words which express quality only (e. g, गौरवम्, प्राधान्यम, रस:, गन्ध:, स्पर्श etc.). Compound is prohibited with the former class and not with the latter. We can say both शुक्ल: पट: and पटस्य शुक्लम्। In the former case शुक्ल is adjective denoting the concrete object (गुणी), while in the latter case शुक्ल is noun expressing the abstract quality (गुण). Here we can have no compound. But the word गौरव expresses an independent (स्वप्रधान) abstract quality; hence अर्थगौरवम् is a valid compound, according to the dictum "तत्स्थैश्च (i. e.,

स्वप्रधानैः) गुणैः षष्ठी समस्यते न तु तद्विशेषगुणैः"। Cf. "सूत्रे गुणार्थं इत्यनेन केवलगुणस्य गुणोपसर्जनद्रव्यस्य च प्रतिपादको गृह्यते व्याप्तिन्यायात्। काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्ला इति द्वेधा भाष्ये उदाहरणाच्च। चन्दन-गन्ध इत्यादौ तु निषेधे प्राप्ते तत्स्थैश्च गुणैः इति वचनेन समासः प्रतिप्रसूयते। गन्धत्वेन प्रतीयमानो हि गन्धः न कदापि गुणिसमानाधिकरणः किन्तु स्वप्रधानः। इदमेव तात्स्थ्यम्"। -प्रौढमनोरमा also "गुणिवचनात् उत्पन्नष्यञा शुक्लादिगुणस्यैवाभिधानात् तद्वाचकपदानां शौक्ल्यादीनां गुणिसामानाधिकरण्यासत्त्वात् न दोषः। तथा च प्राधान्येन अप्राधान्येन वा द्रव्याप्रतिपादकत्वे सति गुणप्रतिपादकत्वं तत्स्थगुणवाचित्वम्" —तत्त्वबोधिनी। But बलाकायाः शौक्ल्यम् etc. are left uncompounded on the authority of भाष्यकार। (शुक्लशब्दस्य अतत्स्थत्वात्)। So Vāmana has said "पत्रपीतिमादिषु गुणवचनेन" V. 2, 18 (the quotation in Malli's com. is evidently a scribe's mistake). Cf. "पत्रपीतिमा पत्रालीपिङ्गलिमा इत्यादिषु षष्ठीसमास-प्रतिषेधो गुणवचनेन प्राप्तो बालिश्यात् तु न कृतः" (वृत्ति) also "वर्तमानसामीप्यमिति ज्ञापकात् पत्रपीतिमादयः सिध्यन्ति इति केचित्। येषां तु मतं गुणः सम्बन्धित्वात् गुणिनमाक्षिपति तेन गुणेन गुणिनः षष्ठीसमासनिषेधः। न च वर्तमानः सामीप्ये गुणी। भूतभविष्यतोरेव तद्गुणित्वादिति। तेषां मते उत्तरपदार्थप्राधान्ये इति ज्ञापकादनित्यः षष्ठीसमासप्रतिषेध इति केचित्" (कामधेनु)।

Nāgeśa in his लघुशब्देन्दुशेखर has analyzed अर्थगौरवम् as अर्थगतं गौरवम् (मध्यपदलोपी)।

Easier and better is to follow Bhaṭṭoji and say that the prohibition of षष्ठीतत् is not obligatory, since Pāṇini has violated his self-made Sūtra in "तदशिष्यं संज्ञाप्रमाणत्वात्"—Cf. "अनित्योऽयं गुणेन निषेधः। 'तदशिष्यं संज्ञाप्रमाणत्वात्' इत्यादिनिर्देशात्। तेन अर्थगौरवं बुद्धिमान्द्यमित्यादि सिद्धम्" (सिद्धान्तकौमुदी); for further details, see A. Śāstrī, Bhaṭṭi, I. 6.

रचिता—Verbal adj. to पृथगर्थता। रच + णिच् + क्त कर्मणि स्त्रियाम्।

पृथगर्थता—उक्ते कर्मणि १मा। पृथक् अर्थः येषां तानि पृथगर्थानि (बहु) तेषां भावः = पृथगर्थ + तल् भावे, स्त्रियाम् पृथगर्थता ; absence of repetition of words and ideas

गिराम्—शेषे षष्ठी।

न च—And not also, अव्यय ।

सामर्थ्यम्—उक्त कर्मणि १मा। समर्थानां भावः इति समर्थ + ष्यञ् = सामर्थ्यम् । Mutual interdependence of words for obtaining a complete sense. It is also known as आकाङ्क्षा one of the three conditions of a वाक्य. The other two being योग्यता and सन्निधि (or आसत्ति) । Cf. "आकाङ्क्षा प्रतीतिपर्यवसानविरहः । स च श्रोतुर्जिज्ञासारूपः । निराकाङ्क्षस्य वाक्यत्वे गौरश्वः पुरुषो हस्तीत्यादीनामपि (Malli's example is दशदाडिमादीनां) वाक्यत्वं स्यात्"—साहित्यदर्पण: II. 6. Also "योग्यता पदार्थानां परस्परसम्बन्धे बाधाभावः । पदोच्चयस्य एतदभावेऽपि वाक्यत्वे वह्निना सिञ्चतीत्यपि वाक्यं स्यात् ।...आसत्तिः बुद्ध्यविच्छेदः । बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चरितेन गच्छतीति पदेन सङ्गतिः स्यात्" (Ibid). Cf. "आनुपूर्वीविशेषकारणत्वज्ञानरूपा आकाङ्क्षा"—उद्योत ।

अपोहितम्—Verbal adj to सामर्थ्यम् ; neglected. अप – ऊह (वितर्के) + क्त, कर्मणि । Note that अस् (to throw) and ऊह (to reason) optionally take आत्मनेपद when preceded by an उपसर्ग । So अपोहति, अपोहते । The Vārttika is "उपसर्गादस्यत्यूह्योर्वेति वाच्यम्" ।

क्वचित्—अव्यय ; anywhere.

Ch of Voice—स्फुटतां पदानि अपाकृतवन्ति ।......स्वीकृतवान् (त्वम्)......रचितवान् पृथगर्थताम् (त्वम्)......अपोहितवान् (त्वम्) ।

Remark—In this and in the next verse the requisites of a perfect speech have been mentioned. They are—(1) perspicuity ; (2) depth of sense ; (3) variety or absence of repetition ; (4) interdependence of sentences ; (5) reasoning ; (6) inference in conformity with the Śāstras.

उपपत्तिरुदाहृता बलात्
अनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः
प्रसभं वक्तुमुपक्रमेत कः ? ॥ २८ ॥

None is able to make such a spirited and extempore speech.

Prose—(किं च) बलात् उपपत्तिः उदाहृता—अनुमानेन च आगमः न हतः । ईदृक् इदम् (वचनम) अनीदृगाशयः कः प्रसभं वक्तुम् उपक्रमेत ।

Beng.—তুমি আপনার পরাক্রম-পক্ষ আশ্রয়পূর্ব্বক যুক্তি প্রদর্শন করিয়াছ এবং তোমার যুক্তি শাস্ত্রের বিরোধীও হয় নাই। ফলতঃ যাহার অভিপ্রায় তোমার অনুরূপ নহে, সহসা ঈদৃশ বাক্যপ্রয়োগ করা তাহার পক্ষে নিতান্ত দুষ্কর।

Eng. Equiv.—उपपत्तिः—Arguments (in favour of war). उदाहृता —put forth. बलात्—ably. अनुमानेन—logical inferences. आगमः—teaching of śāstras. हतः—were in conflict with. इदम्—such. ईदृक् —as this (spirited). अनीदृगाशयः कः—who that has not such high motives. प्रसभं—extempore. वक्तुमुपक्रमेत—make speech.

Eng.—Arguments (in favour of war) were ably put forth ; logical inferences were not in conflict with the (teaching of) Śāstras. Who that has not such high motives in him, would make such a spirited and extempore speech ?

Expl.—Advocating the cause of war you have fully justified your stand. You have ably put forth all the arguments in favour of war. Your speech will convince any one that war is the crying need of the moment. And you have not argued badly, since your inferences are not hostile to the teaching of śāstras. You have realized the truth that human wisdom is worthless without the aid of śāstras. Who that has no such war like spirit in him, would make such a speech as this on the spur of the moment ? Surely it requires the courage of conviction and far-sightedness to advocate the cause of war so strongly.

Malli.—उपपत्तिरिति—किञ्च बलात् स्वबलमाश्रित्य । कर्मणि ल्यब्लोपे पञ्चमी वक्तव्या । उपपत्तिः युक्तिः उदाहृता । पराक्रमपक्ष एव श्रेयानिति युक्तिः उक्ता इत्यर्थः । उचितं चैतत् महावीरस्य इति भावः । तथा अनुमानेन युक्त्या आगमः शास्त्रं च न हतः न हतः । किन्तु आगमाविरुद्धमेव उक्तम् ; अन्यथा तद्विरोधात् अनुमानस्यैव प्रामाण्यभङ्गप्रसङ्गादिति भावः । ईदृक् इत्थं भावयुक्तम् इदं वचनम्, अविद्यमान ईदृगाशय इत्थं भावयुक्ताभिप्रायो यस्य सः अनीदृगाशयः । "अभिप्रायश्छन्द आशयः" इत्यमरः । कः प्रसभं हठात् वक्तुमुपक्रमेत ? न

कोऽपीत्यर्थः। इत्थं वक्तुमुपक्रमितैव नास्ति, वक्ता तु दूरापास्त एवेति भावः। केचिदेतत् श्लोकत्रयं निन्दापरत्वेनापि योजयन्ति, तदसत। हितोपदेशमात्रतत्परस्य भ्रातिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विषये सर्वानर्थमूलभूत-निन्दातात्पर्यकल्पनानौचित्यादिति।)

Notes on Malli—(1) किन्तु आगमा.........प्रसङ्गादिति भावः—The idea is—what you have said, is in conformity with the teaching of Śāstras, otherwise your inference would cease to be valid if it was hostile to the Śāstras. Cf. "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" ॥ (मनुसंहिता XII. 106).

(2) इत्थं....... दूरापास्त एव—Rare is the man who attempts to speak thus, the speaker is far off indeed.

(3) केचित्.........नौचित्यादिति—Some, however, interpret the three verses as containing (hidden) censure—their explanation is surely bad. Because, the king here is bent on giving salutary advice to his mighty younger brother whom he loves and whose guardian he is; it will therefore be improper to discover in his speech any hidden censure which is the root of all troubles.

Notes—उपपत्तिः—उक्ते कर्मणि १मा। उप–पद्+क्तिन् भावे—उपपत्तिः argument; also see St. I.

उदाहृता—Verbal adj. to उपपत्तिः। उत्–आ–हृ+क्त कर्मणि, स्त्रियाम्। Put forth, cited.

बलात्—पञ्चमी by the Vārttika "ल्यब्लोपे कर्मण्यधिकरणे च"। बलमाश्रित्य—ably or forcibly, or from a hero's stand-point (Kāle).

अनुमानेन—अनुक्ते कर्तरि तृतीया। अनु–मा+ल्युट्=अनुमानम्। Inference—one of the four means of getting correct knowledge according to the Naiyāyikas. Cf. "व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्। अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि"। भाषापरिच्छेद (6 67. Acc. to the Mahābhāṣya, however. ("कोऽसावनुमानः......"). अनुमानः is always masc.—अनु–मन्+घञ्।

आगमः—उक्ते कर्मणि १मा। आ–गम्+अप्=आगमः—the Veda—or the eternal word of unquestionable authority. This is also considered as one of the four grounds of knowledge. Cf. "यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्" (वेदान्तपरिभाषा IV. 1).

घतः—Verbal adj. to आगमः। घण (हिंसायाम्) + क्त कर्मणि ; destroyed. Cf. "पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः" ॥ (महाभारत)।

इदम्—Refers to वचनम् understood. Obj. to वक्तुम्।

ईदृक्—Adj. to इदम् thus spirited. अयमिव दृश्यते इति इदम् + दृश् + क्विन् (कर्मकर्तरि) by the Sūtra "त्यदादिषु दृशोऽनालोचने कञ् च" = ईदृक्। इदम् is changed into ई by the rule "इदं किमोरीश्की"—which means that ई and की are substituted for इदम् and किम् respectively, when दृक, दृश or the affix वत follows. Also note that इदम् + दृश + कञ (कर्मकर्तरि) = ईदृशः, with क्स – ईदृक्ष. Similarly कीदृक्, कीदृशः, कीदृक्षः।

अनीदृगाशयः—Adj. to कः। ईदृक् आशयः यस्य सः (बहुव्रीहि) = ईदृगाशयः। न ईदृगाशयः (नञ्तत्)। Who that has no such (warlike) spirit in him. आ – शी + अच् भावे = आशयः।

प्रसभं—Adv. qualifying वक्तुम्। प्रगता सभा विचारः अस्मात् तत् यथा स्यात् तथा (बहुव्रीहि)—without previous thought i. e., extempore.

वक्तुम्—वच् + तुमुन्।

उपक्रमेत—Nom. कः। उप – क्रम् + लिङ् ईत। आत्मनेपद by the rule "प्रोपाभ्यां समर्थाभ्याम्"। See St. 25.

Ch. of Voice—उपपत्तिम् उदाहृतवान् (त्वम्)......अनुमानम्...आगमं घतवत् ......आशयेन केन उपक्रमेत।

२५ अवितृप्ततया तथापि मे
हृदयं निर्णयमेव धावति।
अवसाययितुं क्षमाः सुखं
न विधेयेषु विशेषसम्पदः ॥ २८ ॥

Yet my unsatisfied mind struggles to solve the difficulty.

Prose—तथापि मे हृदयम् अवितृप्ततया निर्णयमेव धावति। विधेयेषु विशेषसम्पदः सुखम् अवसाययितुं न क्षमाः।

Beng.—কিন্তু আমার চিত্ত ইহাতে সন্তুষ্ট না হইয়া উপস্থিত বিষয়ের একটি প্রকৃত

সিদ্ধান্ত অনুসন্ধান করিতেছে। সন্ধিবিগ্রহাদি কর্ত্তব্য কার্য্যের সূক্ষ্ম অবান্তরভেদগুলি সহসা অনায়াসে হৃদয়ঙ্গম করিতে পারা যায় না।

Eng. Equiv.—अवितृप्ततया—not being satisfied. तथापि—yet. मे—my. हृदयं—mind. निर्णयम् एव धावति - struggles to solve the difficulty. अवसाययितुं सुखम् न अलाः—not easy of comprehension. विधेयेषु—among general rules. विशेषसम्पदः—special rules

Eng.—Yet my mind, not being satisfied, struggles to solve the difficulty. Among general rules (like conciliation etc.) there are many special rules not easy of comprehension.

Expl.—Still in spite of your having conclusively proved the advisability of war my mind is not satisfied. The science of politics is too intricate for ordinary men to grasp. A king finds himself at a loss in the maze of six political expedients. Sometimes at the heat of the moment it appears that war is the only remedy in the present situation ; but after cool thinking the mind changes it own conclusion. The general rules, indeed, are easy to know ; but the many special rules are not easy of comprehension as they are minute, various and difficult to understand. The study of political situation is like the diagnosis of a disease which requires cool observation ; otherwise the slightest blunder will frustrate all healthy project.

Malli.—यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह—अवितृप्ततयेति। तथापि त्वया सम्यङ् निर्णीतेऽपि मे हृदयम् अवितृप्ततया असन्तुष्टतया। अद्यापि संशयगतत्वेन इत्यर्थः। निर्णयमेव धावति अनुसरति, अपेक्षते इति यावत्। अद्यापि निर्णयस्य अनुदयादिति भावः। निर्णयानुदये हेतुमाह—अवेति। विधेयेषु सन्धिविग्रहादिकर्तव्यार्थेषु याः विशेषसम्पदः अवान्तरभेदभूमानः ताः सुखम् अक्लेशेन अवसाययितुं पुरुषान् प्रत्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रं प्रत्याययितुमित्यर्थः। स्यतेर्ण्यन्तादर्णाकर्मकर्तृकात् तुमुन्। गोरणाविति सूत्रस्य अयं विषयः। अमन्ते इति अमाः, पचाद्यच्। अलाः न भवन्ति। "अमं अक्तं हिते त्रिषु" इत्यमरः। विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्यात् बाहुल्याच्च दुर्ज्ञेयत्वात् अद्यापि निर्णयाकाङ्क्षेति

तात्पर्यार्थः। अत्र निर्णयधावनं प्रति उत्तरवाक्यार्थस्य हेतुत्वाभिधानात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। तदुक्तम्—"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति।

Notes on Malli—(1) यदि.........आशङ्क्याह—If what I have said, is all right, then act according to it—apprehending this he says.

(2) विशेषस्मावस्य.........तात्पर्यार्थः—Though the general rules are easy to know, yet the special rules are minute, various and difficult to understand—hence yet there is need of solution—this is the purport.

Notes—अवितृप्ततया—हेतौ तृतीया। अवितृप्तस्य भावः इति अवितृप्त + तल् भावे स्त्रियाम् = अवितृप्तता। न वितृप्तः = अवितृप्तः (नञ्तत्)। विशेषेण तृप्तः (प्रादितत्) = वितृप्तः। तृप् + क्त = तृप्तः। Not being satisfied.

तथापि—अव्यय। Yet—in spite of your having conclusively proved the advisability of war.

मे—शेषे षष्ठी।

हृदयम्—Nom to धावति। Mind.

निर्णयम्—Obj. to धावति; solution. निर्–नी (प्रापणे) + अच् भावे = निर्णयः। The dental न is charged into cerebral ण by the rule "उपसर्गादसमासेऽपि णोपदेशस्य"। Note that नी + घञ् by the rule "श्रिणीभुवोऽनुपसर्गे" = नायः। कथं राज्ञो नयः? बाहुलकात्। See St. 12 on नयः।

एव—अव्यय। अन्ययोगव्यवच्छेदार्थम्।

धावति—Nom. हृदयम्। धाव ("धावु गतिशुद्ध्योः") + लट् ति। Here the verb is used transitively (seeks) cf. "धातोरर्थान्तरे वृत्तेः धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया"॥ धाव with the affix क्त gives धावितः, धौतः।

अवसाययितुम्—अव–सो + णिच् + तुमुन्; to make their own nature understood. सो with णिच takes युक् instead of पुक् by the rule "शाच्छासाह्वाव्यावेपां युक्" making it अवसाययति। See विशेषसम्पदः।

क्षमाः—Predicate of विशेषसम्पदः। क्षम् + अच् (पचाद्यच्) = क्षमाः।

सुखम्—Adv. modifying अवसाययितुम्।

विधेयेषु—विषयाधिकरणे ७मी। वि–धा+यत् कर्मणि=विधेयानि, तेषु। 'सन्धि-विग्रहादिकर्तव्यार्थेषु'—Malli.

विशेषसम्पदः—Here the object of the non-causal form is put in the nominative case in the causal. The process is thus—

Non causal—पुरुषाः विशेषसम्पदः अवस्यन्ति।

Causal —विशेषसम्पदः पुरुषान् स्वयमेव अवसाययन्ते।

The आत्मनेपद in अवसाययन्ते is guided by the rule "णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने" which means that a causal verb takes आत्मनेपद if the object in the non-causal form (i. e., विशेषसम्पदः) becomes the subject in the causal and if the very verb of the non-causal form is also employed in the causal, but not so, when it means 'to remember with regret', even when the fruit of the action does not accrue to the agent. (N. B. This Sūtra does not apply if a *new object* is present in the causal. See our notes on Kirāta I. 10.—दर्शयते)।

अव-सो, being a root implying 'knowledge', the subject in the non-causal (i. e. पुरुष) is put in the accusative in the causal by the rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ"।

Ch. of Voice.—......हृदयेन निर्णयः धाय्यते।......क्षमाभिः......विशेषसम्पद्भिः (भूयते)।

Remark—The figure of speech in this verse is काव्यलिङ्ग (for def., see St. 5). Here the sense of the sentence in the second half of the verse, is represented as the cause of seeking a solution of the problem. Hence वाक्यार्थहेतुककाव्यलिङ्ग।

Don't act rashly. Want of discrimination is the chief source of misfortune.

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः॥ ३०॥

Prose—सहसा क्रियां न विदधीत ; अविवेकः आपदां परं पदम्। हि गुणलुब्धाः सम्पदः विमृश्यकारिणं स्वयमेव वृणते।

Beng.—বিবেচনা না করিয়া সহসা কোন কার্য্য করা উচিত নহে। বিবেকহীনতাই বিপদের প্রধান আশ্রয়। কিন্তু যদি বিবেচনা করিয়া কার্য্য করেন, গুণানুরাগিণী লক্ষ্মী স্বয়ং আসিয়া তাঁহাকে বরণ করেন।

Eng. Equiv.—सहसा—rashly. विदधीत क्रियां—should be done. अविवेकः—want of discrimination. परम्—chief. आपदां—of misfortunes. पदं—source. वृणते—select. हि—for. विमृश्यकारिणं—man of circumspection. गुणलुब्धाः—ever attached to merits. स्वयमेव—of her own accord. सम्पदः—prosperity.

Eng—Nothing should be done rashly ; since want of discrimination is the chief source of misfortunes. For, prosperity, ever attached to merits, selects the man of circumspection (as her lord) of her own accord.

Expl.—With a wrathful mind you have advocated the cause of war. But nothing should be done precipitately. Want of deliberation is a great source of calamity. In life, we can avoid most of our troubles and sorrows, if we can act with proper thought. We often rue our own rash acts. The best policy is sometimes destroyed by haste. Reason is no doubt the proud privilege of man ; but its real utility lies in how much he can use it against thoughtless hasty actions. Lady Fortune who is ever attached to merits, selects for her lord a man of circumspection. Hence look before you leap.

Malli.—वस्तुविमर्शावधारणमन्तरेणैव प्रवृत्तिरित्याशङ्क्याह—सहसेति। क्रियां क्रियते इति क्रिया कार्यं तां सहसा अविमृश्येत्यर्थः। "सहसेत्याकस्मिकाविमर्शयोः" इति गणव्याख्याने स्वरादिपाठादव्ययम्। न विदधीत न कुर्वीत। कुतः ?—अविवेकः अविमृश्यकारित्वं परम् अत्यन्तम् आपदां पदं स्थानम्। विपत्तिकारणमित्यर्थः। व्यतिरेकेण उक्तमर्थमन्वयेनाह—वृणते। गुणलुब्धाः गुणगृध्नाः गुणग्राहिण्य इति स्वयंवरणहेतूक्तिः। सम्पदः श्रियः विमृश्यकारिणं विमृश्य करोतीति विमृश्यकारी। "उपपदमतिङ्" इति समासः ; तं स्वयमेव वृणते भजन्ते हि।

"वृङ् सम्भक्तौ" इति धातुः । तस्मात् विमृश्य एव प्रवर्तितव्यमित्यर्थः । अत्र सहसा विधाननिषेध-लक्षणविमृश्यकारित्वरूपकारणस्य आपद्रूपव्यतिरेककार्येण समर्थनात् वैधर्म्येण अर्थान्तरन्यासः । द्वितीयार्धेण च स एव साधर्म्येण इति ज्ञेयम् ।

Notes on Malli.—(1) वस्तुविशेष.........आह—Action without considering the details of the matter—apprehending this he says.

(2) तस्मात्.........प्रवर्तितव्यम्—So act with circumspection alone.

Notes—सहसा—अव्यय ; rashly, without proper thought. सह् + असा = सहसा । "अतर्किते तु सहसा" इत्यमरः । Here adv. qualifying विदधीत ।

विदधीत—Nom. जनः understood. वि–धा + लिङ्, ईत ।

क्रियाम्—Obj to विदधीत । कृ + श भावे स्त्रियाम = क्रिया, ताम् ।

अविवेकः—Nom. to भवति understood. न विवेकः (नञ्तत्) = अविवेकः । वि – विच् + घञ भावे = विवेकः, discrimination.

परम्—Adj. to पदम् ; chief. Cf. "दूरानात्मोत्तमाः पराः" इत्यमरः ।

आपदाम्—शेषे षष्ठी । आपत् = आ – पद् + क्विप् स्त्रियाम् ।

पदम्—Predicate of अविवेकः । Source. "पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रि-वस्तुषु" इत्यमरः ।

वृणते—Nom. सम्पदः । वृ (क्रयादि) + लट्, अन्ते ; selects for her lord.

विमृश्यकारिणम् Obj. to वृणते । विमृश्य करोतीति विमृश्य + कृ + णिनि कर्तरि = विमृश्यकारी । The compound is उपपद-तत्पुरुष by the rule "उपपदमतिङ्"—which means that an उपपद which ends in a सुप् is invariably compounded with that with which it is in construction and this compound is one which does not end in तिङ् । Here the Samāsa is irregular. वि – मृश् + ल्यप् = विमृश्य । One who acts with proper circumspection.

गुणलुब्धाः—Adj. to सम्पदः । गुणेषु लुब्धाः (सुप्सुपेति) – attached to merits. लुभ (गार्ध्ये) + क्त कर्तरि = लुब्धाः । Greedy. But लुभ (विमोहने—विमोहनमाकुलीकरणम) + क्त = लुभितः ।

स्वयम्—अव्यय । प्रकृत्यादित्वात् तृतीया ।

सम्पदः—Nom. to वृणते । Fortune. सम् – पद् + क्विप् स्त्रियाम् ।

Ch. of Voice—क्रिया विधीयेत..... अविवेकेन परम..... पदेन (भूयते)...... गुणलुब्धाभिः सम्पद्भिः विमृश्यकारी व्रियते ।

Remark—The figure of speech in this verse is अर्थान्तरन्यास (for def., see St. 5). In the first half of this verse the cause (i e., circumspection which is obtained by the prohibition of hasty action) is supported by the effect (i. e., misfortune) through dissimilarity (वैधर्म्य). In the second half the same cause (i. e., circumspection) is supported by the effect (i. e., the gaining of fortune) through similarity (साधर्म्य) ।

विश्वनाथ in his साहित्यदर्पण (VII. p. 343, ed Gurunātha Vidyānidhi) has cited this verse as an example of the rhetorical blemish named पुनरुक्तता । He says that the idea of the second half (i. e , वृणते हि etc.) of this verse is nothing but the repetition of the reversed sense of the second foot (i. e., अविवेकः परमापदां पदम्) । "अत्र द्वितीयार्धं व्यतिरेकेण द्वितीयपादस्यैवार्थ इति पुनरुक्तता" । (ibid) also "यथा अधर्मो दुःखसाधनम् इत्युक्ते धर्मस्य सुखसाधनत्वमुपलभ्यते तथात्रापीति भावः" (रामतर्कवागीशी) । अत्र च वाक्यार्थस्य पुनरुक्तता ।

If, however, we want to defend this most well-known stanza of Bhāravi, we can say in the words of Malli, that poets often repeat the entire sense of a verse in two or three other stanzas (what to speak of a part of it). They do this in order to beautify their style. Cf. "प्रायेणैकार्थमप्यनेकं श्लोकमुक्तिविशेषलाभात् लिखन्ति कवयः । यथाह नैषधे आदावेव "निपीय"त्यादिश्लोकद्वयं तथा "स्वकेलिलेश"त्यादिश्लोकद्वयं चेति" । (Malli—सर्वङ्कषा on Śiśu. III. 13).

Duty, coupled with prudence, brings sure success.

अभिवर्षति योऽनुपालयन्
विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां
शरदं लोक इवाधितिष्ठति ॥ ३१ ॥

Prose—यः विधिबीजानि विवेकवारिणा अनुपालयन् अभिवर्षति, लोकः (फलशालिनीं) शरदमिव सः फलशालिनीं क्रियाम् सदा अधितिष्ठति ।

Beng. যে ব্যক্তি সময় প্রতীক্ষা করিয়া বিবেক-বারিদ্বারা কার্য্যরূপ বীজ সেচন করিয়া থাকেন, তিনি শরৎকালে কৃষকের ন্যায় নিয়ত বাঞ্ছিতফল প্রাপ্ত হন।

Eng. Equiv.—अभिवर्षति—nourishes. यः—who. अनुपालयन्—preserving them (till the time of fruition). विधिबीजानि—seeds of duty. विवेकवारिणा—with waters of prudence. सदा—always फलशालिनीं—rich with fruits. क्रियां—labour (फलशालिनीं). शरद्—autumnal harvest. लोकः—husbandman. अधितिष्ठति - (1) has mastery over or obtains. (2) reaps.

Eng.—He, who nourishes the seeds of duty with the waters of prudence, preserving them (till the time of fruition), obtains his desired fruits as husbandman reaps autumnal harvests. (Lit : has mastery over an action rich with desired furits).

Expl.—Duty coupled with prudence brings sure success. Plans are many ; but prudence can only make them a success. He who can preserve his plans and wait till they bear fruit, surely obtains the fruit of his labour Just as a farmer who waters and protects his seeds during the rainy season reaps the harvests in the glorious autumn

Malli.—(ननु साहसिकस्यापि फलसिद्धिर्दृश्यते एव - तत् किं विवेकेन ? इत्यवाह —अभीति । यः पुमान् विधीयन्ते इति विधयः, क्रत्यनुष्ठानि बीजानीवेति उपमितसमासः। शरदं लोक इवेति वाक्यगतोपमानुसारात् । तानि विधिबीजानि विवेकी वारीव विवेकवारि तेन विवेकवारिणा पूर्ववत् समासः। अनुपालयन् प्रतीक्षमाणः सञ्चन अभिवर्षति सिञ्चति, सः पुमान् फलशालिनीं फलं साधननिष्पाद्योऽर्थः शस्यञ्च, "शस्ये हेतुकृते फलम" इति उभयत्रापि अमरः। तच्छालिनीं क्रियां कर्म। लोकः जनः "लोकस्तु भुवने जने" इत्यमरः। शरदमिव सदा नित्यम अधितिष्ठति, सदा क्रियाफलं प्राप्नोत्येव, न कदाचित् व्यभिचरति इत्यर्थः। साहसिकस्य काकतालीयन्यायेन फलसिद्धि, विवेकिनस्तु नियता इति भावः। अत्र फलशब्देन शस्यहेतुकृतयोः अर्थयोः अभेदाध्यवसायात् श्लेषमूलातिशयोक्तिः, तदनुगृहीता च उपमा इत्यनुमन्धेयम्

Notes on Malli.—(1) ननु..... ...आह—Well, a man who acts rashly also succeeds ; so what is the necessity of prudence ? To this he replies.

(2) साहसिकस्य.........इति भावः—The success of a hasty man is accidental but the same is certain of a prudent man.

N. B. काकतालीय means any unexpected and accidental occurence. It is similar to घुणाक्षरन्याय (यद्कुशलेन दैवात् निष्पाद्यते तत् घुणाक्षरीयम्). "The maxim takes its origin from the unexpected and sudden fall of a palm-fruit upon the head of a crow (so as to kill it) at the very moment of its sitting on a branch of that tree. Cf. "पतत् तालफलं यथा काकेनोपभुक्तमेवं रहोदर्शनचुम्बितहृदया तन्वी मया भुक्ता" । (कुवलयानन्द)—Apte.

Notes—अभिवर्षति—Nom. यः । अभि – वृष् + लट् ति ; waters, i. e., nourishes. अभि— thoroughly.

यः—Related to सः । Cf. "यत्तदोर्नित्यसम्बन्धः" ।

अनुपालयन् Present participle adj. to यः । अनु – पा + णिच् + शतृ = अनुपालयन् । पा with णिच् takes लुक् instead of पुक् by the Vārttika "पातेर्णौ लुग् वक्तव्यः" । This makes पालयति । Another derivation is possible. अनु – पाल (चुरादि) + शतृ = अनुपालयन् । "Taking care of them and waiting till they bear fruit" (Kāle).

विधिबीजानि– Obj. to अनुपालयन् and अभिवर्षति । विधीयते इति वि – धा + कि = विधिः । Undertaking विधयः बीजानि इव (उपमित कर्मधारय)—"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" । Seeds of duty.

विवेकवारिणा—करणे तृतीया । विवेकः वारि इव (उपमित कर्मधारय), तेन । वि – विच् + घञ् = विवेकः । With the waters of prudence.

सदा—अव्यय ; Always. सर्वस्मिन् काले इति सर्वस्मिन् + दा (स्वार्थे) by the rule "सर्वैकान्यकियत्तदः काले दा" । सर्व is changed into स by the rule "सर्वस्य सोऽन्यतरस्यां दि" = सदा ।

फलशालिनीम्—Adj. to क्रियाम and शरदम् । फलेन शालते इति उपपदसमासे फल + शाल + णिनि + ङीप् स्त्रियाम् = फलशालिनी (1) क्रियापक्षे—rich with fruit (of labour) (2) शरत्पक्षे—majestic with its harvest.

क्रियाम्—Obj. to अधितिष्ठति । कृ + श भावे = क्रिया ; २या by the rule "अधिशीङ्स्थासां कर्म" ।

शरदम्—Obj. to अधितिष्ठति । Autumn.

लोक:—Nom. to अधितिष्ठति। Husbandman.

अधितिष्ठति—Nom. लोक: and स:। अधि – स्था + लट् ति ; to have mastery over, commands.

Ch. of Voice—अभिवर्षता येन अनुपालयता......तेन फलशालिनी क्रिया शरत् लोकेन इव अधिष्ठीयते ।

Remark—The figure of speech in this verse is अतिशयोक्ति (for def, see St. 24) which is the main figure. Here शस्य (harvest) and फल (success) have been completely identified. Hence the अतिशयोक्ति is of the first variety (भेदे अभेद:). This अतिशयोक्ति is based on श्लेष (for def., see St. 3) which is the subordinate figure. In अभिवर्षता, अनुपालयन् and फल we have श्लेष। Again, we have उपमा (for def., see St. 3), because विधि is compared with बीज, विवेक with वारि, a king (य:) with a farmer and क्रिया with शरत्। Between श्लेषमूलातिशयोक्ति and उपमा we have सङ्कर: (नीरक्षीरन्यायेन) ; because one supports the other.

Thoughtfulness is the ornament and source of all.

शुचि भूषयति श्रुतं वपु:
प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रम:
स नयापादितसिद्धिभूषण: ॥ ३२ ॥

Prose—शुचि श्रुतं वपु: भूषयति, तस्य (श्रुतस्य) प्रशम: अलङ्क्रिया भवति, पराक्रम: प्रशमाभरणं (भवति), स: (पराक्रम:) नयापादितसिद्धिभूषण: ।

Beng.—সম্প্রদায়শুদ্ধ শাস্ত্রজ্ঞান শরীরকে অলঙ্কৃত করে, শান্তি শাস্ত্রজ্ঞানকে, পরাক্রম শান্তিকে এবং বিবেককৃত-সিদ্ধি পরাক্রমকে অলঙ্কৃত করিয়া থাকে।

Eng. Equiv.—शुचि—correct. भूषयति—adorns. श्रुतं—knowledge of the Śāstras वपु:—person. प्रशम:—tranquility of mind. भवत्यलङ्क्रिया—beautifies. प्रशमाभरणं—sets off tranquility. पराक्रम:—valour. नयापादित-सिद्धिभूषण:—success produced by thoughtfulness (discrimination ; lit., policy) is the ornament.

Eng.—Correct knowledge of the Śāstras adorns the person ;

tranquility of mind beautifies knowledge ; valour sets off tranquility and success produced by thoughtfulness is the ornament of valour.

Expl.—Indeed, what is the worth of a beautiful face if it does not speak the words of S'āstras ? Learning makes a man beautiful and not the charm of the body ; and this knowledge must be derived from tradition. Knowledge, in its turn, is beautified by the tranquility of mind which generates from the subjugation of anger. Again, timely display of valour is the ornament of tranquility, otherwise people will call him weak ; and success produced by thoughtfulness is the natural result of valour. Thoughtfulness therefore, is the ornament and source of all.

Malli.—(नियता विवेकिनः फलसिद्धिरित्युक्तम्, सम्प्रति तामेव रुच्यर्थं स्तौति—शुचीति। शुचि सम्प्रदायशुद्धं श्रुतं शास्त्रश्रवणं कर्तृ वपुः भूषयति, अन्यथा "अविद्वान् पुरुषः शोच्य" इति भावः। तस्य श्रुतस्य प्रशमः क्रोधोपशान्तिः अलङ्क्रिया भूषणं भवति, अन्यथा श्रुतवैफल्यात् इति भावः। पराक्रमः सति अवसरे शौर्यं प्रशमस्य आभरणं भवति, अन्यथा सर्वैः परिभूयते इति भावः। सः पराक्रमः नयापादितसिद्धिभूषणः नयापादिता नीतिसम्पादिता। विवेकपूर्विका इति यावत्। सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्तः। अन्यथा साहसिकस्य सिद्धेः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यात् इति भावः। "वपुषो भूष्यतैवात्र सिद्धेर्भूषणतैव तु। उभयं मध्यमानां तु तेषां पूर्वोत्तरेच्छया" (तत्पूर्वोत्तरपक्षयोः) ॥ इति विवेकः। एवं विशिष्टसिद्धेः अनन्यभूषितायाः एव भूषणत्वोक्त्या सर्वोत्तरतया (सर्वाभरणतया) स्तुतिर्गम्यते। अत्र उत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वात् एकावल्यलङ्कारः। तदुक्तम्—"यत्र विशेषणभावं पूर्वं पूर्वं प्रति क्रमेणैव। भजति परम्परमेषालङ्कृतिरेकावली कथिता" ॥ इति।)

Notes on Malli.—(1) नियता.........स्तौति—It has already been said that sure is the success of a prudent man—now he extols the same to create a liking for it.

(2) अन्यथा.........शोच्यः—Otherwise, deplorable is the lot of a man without learning. Thus runs the सुभाषित—"अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजम्। निराहाराः प्रजाः शोच्याः शोच्यं राज्यमराजकम्" ॥

(3) अन्यथा साहसिकस्य. ......वैयर्थ्यात्—Otherwise (if success belongs

to a hasty man—then) the success of a hasty man being accidental, valour becomes useless.

(4) वपुषो.........विवेक:—Here वपु: (i. e., body) is the object to be adorned and सिद्धि: (success) is the adorner ; and all others between these two (i. e., श्रुत, प्रशम and पराक्रम) are both adorner and adorned according as each precedes or succeeds the other—this is the essence.

(5) एवं विशिष्ट.........गम्यते—Such kind of success (i. e., produced by thoughtfulness) which is not adorned by anything else, is here spoken of as the adorner (of valour). Hence it is praised as the ornament of all

Notes—शुचि—Adj. to श्रुतम् । Purified by tradition, hence correct. शुच् (दीप्तौ) + इन् = शुचि (neuter). "शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु"—मेदिनी ।

भूषयति—Nom. श्रुतम् । भूष (चुरादि) + लट् ति , adorns.

श्रुतम्—Nom. to भूषयति । श्रूयते स्म इति श्रु + क्त कर्मणि = श्रुतम् । Śāstra—so called for its oral transmission.

वपु:—Obj. to भूषयति । वपति, उप्यते वा वप् + उसि (औणादिक) body.

प्रशम:—Nom. to भवति । प्र – शम् + घञ् भावे = प्रशम: ; self-possession, tranquility. See शमम् in verse 24.

तस्य—शेषे षष्ठी । Refers to श्रुतस्य ।

अलङ्क्रिया—Predicate to प्रशम: । (विधेयस्य अजहल्लिङ्गत्वात् उद्देश्येन सह लिङ्गानैक्यम्) । अलम् + कृ + श भावे = अलङ्क्रिया ; ornament.

प्रशमाभरणम्—Predicate to पराक्रम: । (विधेयस्य अजहल्लिङ्गत्वात् उद्देश्येन सह लिङ्गानैक्यम्) प्रशमस्य आभरणम् (षष्ठीतत्) । आ समन्तात् भ्रियते अनेन इति आ – भृ + ल्युट् करणे = आभरणम् ।

पराक्रम:—Nom. to भवति understood. Valour. परा – क्रम् + घञ् भावे = पराक्रम: ।

स:—Nom. to भवति understood. Refers to पराक्रम: ।

नयापादितसिद्धिभूषणः—Adj. to सः। नयेन आपादिता (तृतीया तत); नयापादिता सिद्धिः (कर्मधा); नयापादितसिद्धिः भूषणं यस्य सः (बहुव्रीहि)। नय means right course of conduct. आ – पद् + णिच् + क्त कर्मणि = आपादिता (स्त्रियाम् टाप्)। सिध् + क्तिन् भावे = सिद्धिः। With the affix क्तिच् the word denotes a particular plant. भूष्यते अनेन इति भूष + ल्युट् करणे = भूषणम्।

Ch. of Voice—याचिना श्रुतेन भूष्यते, प्रशमेन अलङ्क्रियया भूयते, पराक्रमेण प्रशमाभरणेन (भूयते), तेन नयापादितसिद्धिभूषणेन (भूयते)।

Remark—The figure of speech in this verse is एकावली which is thus defined—"पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम्। स्थाप्यतेऽपोह्यते वा चेत् स्यात्तदेकावली द्विधा" ॥ (साहित्यदर्पण X. 101)—which means—when among a number of things each succeeding thing is represented as affirmed as a qualification of each preceding thing or denied as such, i. e., when the absence of each succeeding thing would indicate the negation of each preceding thing, the figure is एकावली। In the present case श्रुत is an attribute to वपुः, प्रशम to श्रुत and so on. The figure is of the first variety.

N. B. In मालादीपक each preceding thing enhances the charm of each succeeding thing and there lies its difference from एकावली where each succeeding thing adds to the beauty of each preceding thing (पूर्वेण वस्तुना उत्तरमुत्तरं चेदुपक्रियते तत् मालादीपकम्). In the figure कारणमाला (St. 14) each preceding one is represented as the cause of each succeeding one.

The knowledge of the śāstra is a beacon to the wise.

मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः
कुरुते दीप इवार्थदर्शनम् ॥ ३२ ॥

Prose—मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्ध आगमः दीपः इव अर्थदर्शनं कुरुते।

Beng.—সংশয়তিমিরাচ্ছন্ন অতএব দুর্জ্ঞেয় কার্য্যানুষ্ঠানে বিবেচক ব্যক্তিদিগের অভ্যস্ত ও অভ্রান্ত শাস্ত্রজ্ঞানই প্রদীপের ন্যায় স্বরূপ প্রকাশিত করিয়া থাকে।

Eng. Equiv.—मतिभेदतमस्तिरोहितं—(1) eclipsed by a conflict of ideas; (2) concealed by darkness. गहने—difficult to be grasped. कृत्यविधौ—In the matter of the execution of duties. विवेकिनाम्—cool-headed persons. सुकृत:—(1) acquired after long study; (2) well-placed. परिशुद्ध:—(1) correct; (2) bright. आगम:—knowledge of the S'āstras. अर्थदर्शनं कुरुते—(1) shows the way to reach their objects; (2) illumines objects. दीप इव—as a lamp.

Eng.—In the matter of the execution of duties, which is eclipsed by a conflict of ideas and (hence) difficult to be grasped, the correct knowledge of the S'āstras, acquired after long study by cool-headed persons, shows (them) the way to reach their objects, as a lamp that is bright and well-placed illumines objects concealed by darkness

Expl.—Verily it is difficult for the ordinary men to choose the right path of action when the knowledge of duty is eclipsed by a conflict of ideas. Being lost in the darkness of conflicting opinions they often select the wrong track and rue for it during their whole life. But different is the case with the wise. To them the knowledge of the S'āstras is the unfailing guide. This knowledge they acquire after deep study and it becomes deep-rooted in their hearts. They speak by it, look by it and everything they do is with its help. Thus in the execution of duties they never fail or err. The knowledge of the S'āstras is like a lamp which, if it is well-placed in a windless spot, shining brightly, brings out all the objects hidden in gloom.

Malli.—विमृश्य कुर्यादिति स्थितम्। तत्र 'विमर्शोपाय: क:'? इत्यत्राह शास्त्रमित्याह—मतीति। मतिभेदतमस्तिरोहिते, मतिभेद: कार्यविप्रतिपत्ति:। मतिभेद: तम इवेति उपमितसमास:। दीप इवेति उपमानुसारात्। तेन तिरोहिते आच्छन्ने अत एव गहने दुरवगाहे। कृत्यविधौ कार्यानुष्ठाने विवेकिनां सुकृत: स्वभ्यस्त: अत एव परिशुद्ध: निश्चित:, अन्यत्र सुविहित:.

प्रवातादिदोषरहितश्च । आगमः शास्त्रम् । "आगमः शास्त्र आयाते" इति विश्वः । दीप इव अर्थदर्शनं कार्यज्ञानं वस्तुप्रतिभासनञ्च कुरुते ।

Notes on Malli.—(1) विमृश्य.........आह—It has been said that one should act with discrimination ; the question being—'what is the guide to discrimination ?'—the answer is—'the S'āstra'.

Notes—मतिभेदतमस्तिरोहिते—Adj. to कृत्यविधौ । मतेः भेदः (षष्ठीतत्); मतिभेदः तम इव (उपमितकर्मधा); मतिभेदतमसि तिरोहितः (सुपसुपा) तस्मिन् । Here we cannot make तृतीयातत् instead of सुपसुपा (...तमसा तिरोहित) because the compound becomes a अलुक् in that case by the rule "ओजःसहोऽम्भस्तमसस्तृतीयायाः"-- the form being मतिभेदतमसातिरोहिते । Cf. "कथं तर्हि 'सततमैग्रतमावृतमन्यतः' इति भारविः । अत्राहुः 'वृत् वर्तने' इत्यस्मात् 'वजर्थे कविधानम्' इति भावे क-प्रत्यये तदन्तेन षष्ठीसमासाश्रयणात् न दोष इति । यत्तु केवलपदाधिकार एव तदन्तविधिर्न तूत्तरपदाधिकारे, तथा च 'नैगततमसा' इति तृतीयाया अलुङ् न भवतीति दुर्घट-वृत्त्यादावुक्तम, तन्न । 'पदाङ्गाधिकारे' इत्यत्र 'इष्टकचित', पक्वेष्टकचितम्' इति भाष्योदाहरणात् उत्तरपदाधिकारेऽपि तदन्तविधिप्रवृत्तेः" ।—(तत्त्वबोधिनी) । मन + क्तिन् भावे = मतिः । भिद + घञ् भावे = भेदः । तिरस् -- धा + क्त कर्तरि = तिरोहितः । तिरस् is a गति by the rule "तिरोऽन्तर्धौ" । मतिभेदः means conflict of opinions.

गहने - Adj. to कृत्यविधौ । Difficult to grasp. गाह् + युच् by the Unadi Sūtra—"बहुलमन्यत्रापि" । "पृषोदरादित्वात् ह्रस्वः । गस्य गानस्य गतेर्वा हननम्" । (Bhānuji).

कृत्यविधौ---विषयाधिकरणे ७मी । कृत्यस्य विधिः (षष्ठीतत्) तस्मिन् । In matter of the execution of duty. कृ + क्यप् भावे = कृत्यम् । वि – धा + कि = विधिः ।

विवेकिनाम—शेषे षष्ठी । For derivation, see St. 6.

सुकृतः—Adj. to आगमः and दीपः । सु कृतः (प्रादितत्) = सुकृतः ।

परिशुद्धः - Adj to आगमः and दीपः । परि – शुध् + क्त कर्तरि = परिशुद्धः । Correct and bright.

आगमः—Nom. to कुरुते । आ – गम् + अप् = आगमः । Sāstras.

कुरुते —Nom. आगमः and दीपः । कृ + लट् ते ।

दीप:—Nom. to कुरुते ; Lamp. दीप्यते अनेन वा, दीपयति वा—दीप + क or घञ् or णिच् = दीप: .

अर्थदर्शनम्—Obj. to कुरुते । अर्थस्य दर्शनम् (षष्ठीतत्) । दृश + णिच् + ल्युट् भावे = दर्शनम् ।

Ch. of Voice —..... सुकृतेन परिगृह्य‌तेन आगमेन दीपेन इव अर्थदर्शनं क्रियते ।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here S'āstra is compared with a lamp. In सुकृत:, परिगृह्य: and अर्थदर्शनम् we have अर्थश्लेष which is subordinate to उपमा । Hence सङ्कर: ।

For a similar idea, compare—"शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति"—शिशुपालवधे V. 47.

To those who try to emulate great men, their downfall is equal to rise.

स्पृहणीयगुणैर्महात्मभि-
श्चरिते वर्त्मनि यच्छतां मन: ।
विधिहेतुरहेतुरागसां
विनिपातोऽपि सम: समुन्नते: ॥ ३४ ॥

Prose—स्पृहणीयगुणै: महात्मभि: चरिते वर्त्मनि मन: यच्छतां (जनानाम्), विधिहेतु: आगसाम् अहेतु: विनिपात: अपि समुन्नते: सम: ।

Beng.—শ্লাঘ্যগুণসম্পন্ন সজ্জন ব্যক্তিদিগের অনুষ্ঠিত আচার যাহারা পালন করিতে ইচ্ছা করেন, তাহাদিগের দৈবকৃত আপদ্ অপরাধের হেতু হয় না ; পরন্তু তাহা বৃদ্ধিরই তুল্য হইয়া থাকে ।

Eng. Equiv.—स्पृहणीयगुणै:—of enviable virtues. महात्मभि:—by great men. चरिते—traversed. वर्त्मनि—path. मन: यच्छतां—persons who follow. विधिहेतु:—caused by adverse fate. अहेतु: आगसाम्—does not give ground for blame. विनिपात: अपि—even the fall. सम:—is as creditable as. समुन्नते:—rise.

Eng.—In the case of persons who follow the path traversed by great men of enviable virtues, even the fall, caused by (adverse) Fate, does not give ground for blame, but is (as creditable) as rise itself.

Expl.—Perilous, no doubt is the path of ambition. Yet it is our duty to emulate though not to surpass our illustrious predecessors of enviable virtues. Imitation of the great really makes us great. Knowing well that the path they have traversed is not a bed of roses, we should follow their path ; and if misfortune befalls us through adverse fate, then we are not to blame. In that case our fall is equal to our rise.

Malli—एवं विमृश्य कुर्वतो दैवात् अनर्थागमेऽपि न कश्चित् अपराधः इत्याह—स्पृहणीयेति। स्पृहणीयगुणैः लोकश्लाघ्यगुणैः महात्मभिः सज्जनैः चरिते अनुष्ठिते वर्त्मनि आचारे मनो यच्छतां निदधतां, सन्मार्गेण व्यवहरतामित्यर्थः। विधिहेतुः दैवनिमित्तकः। "विधिर्विधाने दैवे च" इत्यमरः। अत एव आगसाम् अपराधानाम् अहेतुर्विनिपातोऽपि दैविकानर्थोऽपि, "विनिपातोऽवपाते स्यात् दैवाद्व्यसनेऽपि च" इति विश्वः। समुन्नतेः अतिवृद्धेः समः तुल्यः। दैविकेषु पुरुषस्य अनुपालभ्यत्वादिति भावः। यथाह कामन्दकः—"यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम्। पुमांस्तत्रानुपालभ्यो दैवान्तरितपौरुषः" ॥ इति।

Notes on Malli.—(1) एवं.........अपराधः—Thus the man who acts with discrimination, is not to blame, if misfortune befalls him through adverse Fate.

(2) दैविकेषु....... पौरुषः—Unblamable is a person in every circumstance brought on by Fate. As Kāmandaka has said—"If a well-begun work meets with failure, the person is not to blame, since his enterprise is obstructed by Fate".

Notes—स्पृहणीयगुणैः—Adj. to महात्मभिः। स्पृहणीयाः गुणाः येषां ते (बहुव्रीहि) तैः; of enviable virtues. स्पृह् + अनीयर् कर्मणि = स्पृहणीयाः।

महात्मभिः—अनुक्ते कर्तरि तृतीया। महान् आत्मा येषां ते (बहुव्रीहि) तैः।

चरिते—Adj. to वर्त्मनि। चर् + क्त कर्मणि = चरितम्। तस्मिन् ; traversed.

वर्त्मनि—अधिकरणे ७मी। वृत् + मनिन् (औणादिक) = वर्त्मन् ; path.

यच्छताम्—Present participial adj. to जनानाम् understood. दा + शतृ, षष्ठी बहुवचन। दा is substituted by यच्छ by the rule "पा-घ्रा-ध्मा-स्था—" etc. (VII. 3. 78).

मनः—Obj. to यच्छताम् । Mind.

विधिहेतुः—Adj. to विनिपातः । विधिः हेतुः यस्य सः (बहुव्रीहि) ; caused by Fate. वि – धा + कि कर्तरि = विधिः ।

अहेतुः - Adj. to विनिपातः । न हेतुः (नञ्तत्) । Not the cause of.

आगसाम्—शेषे षष्ठी । Related to अहेतुः । आगस् means fault. इण् + असुन् (आगादेशश्च) ।

विनिपातः —Nom. to भवति understood. वि – नि – पत् + घञ् भावे = विनिपातः fall.

अपि—अव्यय ; समुच्चयार्थः ।

समः—Adj. to विनिपातः । सम is a सर्वनाम when it means 'all', 'whole', ; but it is a noun when means 'equal' as here (समः सर्वपर्यायः । तुल्यपर्यायस्तु नेह गृह्यते, यथासंख्यमनुदेशः समानाम् इति ज्ञापकात्"—Bhaṭṭoji.)

समुन्नतेः—षष्ठी in connection with the word समः by the rule "तुल्यार्थैर-तुलोपमाभ्यां तृतीयाऽन्यतरस्याम्". Alt. form समुन्नत्या (तृतीया) । सम् — उद् – नम् + क्तिन् भावे = समुन्नतिः, rise. The Sūtra means that words take the sixth and the third case-endings in connection with words meaning 'equal' excepting तुला and उपमा where only षष्ठी is available. "तुल्यतार्थैरित्यर्थः । अत एवातुलोपमाभ्यामिति चरितार्थम् । अत एव पर्युदासात् अनव्यययोगी एव इदम् । तेनेवशब्दयोगे न"—(शेखर) । "कथं तर्हि 'तुलां यदारोहति दन्तवाससा' इति कालिदासः । 'स्फुटोपमं भूतिसितेन शम्भुना' इति माघश्च । उच्यते - "सहयुक्तेऽप्रधाने" इति तृतीया । "स्वबालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिणः" इत्यत्र यथा । उक्तं हि—"विनापि तद्योगे तृतीया" इति ।—(प्रौढमनोरमा) ; also "स्फुटोपममित्यत्र उपमाशब्दो भावसाधनः" (शब्दरत्न) । Also "तुलोपमाशब्दौ कर्मसाधनौ तुल्यार्थौ, तत्र प्रतिषिध्यते तृतीया ; षष्ठी तु भवत्येव ; इह स्फुटोपमं भूतिसितेन शम्भुना इति शम्भुना स्फुटोपमा यस्य इत्युपमाशब्दे नापि योगे करणे तृतीया भवति, भावसाधनत्वात् तस्य, यथा उपमीयते अनेन इत्यादौ ; इतरथा हि तृतीयानुकृष्येतेति तस्यानन्तरसूत्रे श्रुतत्वात् ; अन्यतरस्यांग्रहणं तु सति तस्य प्रयोजनान्तराभावात् तदेव चकारेणानुकृष्यते" । (पदमञ्जरी, p. 457).

Ch. of Voice—......विधिहेतुना......अहेतुना.........विनिपातेन.........समेन (भूयते) ।

Remark—The figure of speech in this verse is विरोधाभास : (विनपातोऽपि समुन्नतः नमः) ।

Those who desire to conquer their enemies first overcome wrath, then join their valour to favourable means.

शिवमौपयिकं गरीयसीं
फलनिष्पत्तिमदूषितायतीम् ।
विगणय्य नयन्ति पौरुषं
विजितक्रोधरया जिगीषवः ॥ ३५ ॥

Prose—जिगीषवः विजितक्रोधरयाः गरीयसीं फलनिष्पत्तिम् अदूषितायतीं विगणय्य पौरुषं शिवम् औपयिकं नयन्ति ।

Beng.—জয়েচ্ছু নৃপগণ ক্রোধবেগ সংবরণপূর্ব্বক পরিণামশুভ প্রভূত ফল সম্যক্ অবধারণ করিয়া অনুকূল উপায়ের সহিত পৌরুষ যোজনা করিয়া থাকেন ।

Eng. Equiv.—शिवम्—favourable. औपयिकं—means. गरीयसीं—great. फलनिष्पत्तिम्—success. अदूषितायतीम्—will have no adverse future. विगणय्य—having well ascertained. नयन्ति—join. पौरुषं—valour. विजितक्रोधरयाः—overcome all impulses of wrath. जिगीषवः those who wish to conquer their enemies.

Eng.—Those who wish to conquer their enemies (first) overcome all impulses of wrath and then having well ascertained that their success will be great and will have no adverse future, join their valour to favourable means.

Expl.—Those who wish to conquer their enemies should first of all conquer their wrath. Futile will be the enterprise of a man who is a slave to the impulse of anger. Having conquered anger he should look whether the accomplishment of his desired end will be great or not, whether it will have any adverse future. If in the long run the success is little and meets with failure—then there is no need of enterprise at all. But if reverse is the case, he must use his valour when favourable opportunities occur.

Malli.—सम्प्रति यत् विमृश्यं तदाह—शिवमिति । जिगीषवः विजयेच्छवः नृपाः

विजितक्रोधरया: विजितक्रोधवेगा: सन्त: गरीयसीं प्रभूताम् अदूषितायतीम् अघतीत्तरकालां स्वन्तामित्यर्थ:, फलनिष्पत्तिं फलसिद्धिं विगणय्य, फलवत्त्वं निश्चित्य इत्यर्थ: । पौरुषं पुरुषकारं शिवम् अनुकूलम् औपयिकम् उपायम् । विनयादित्वात् स्वार्थे ठक्, "उपायात् ह्रस्वत्वञ्च" । नयन्ति प्रापयन्ति, पौरुषम् उपायेन योजयन्ति इत्यर्थ: । नानिश्चितफलं कर्म कुर्वीतेति भाव: । यथाह कामन्दक:—"निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च । न कर्म कुर्यान्मतिमान् सदा वैरानुबन्धि च" ॥ इति । नयति: प्रापणार्थे द्विकर्मक: । अत्र पौरुषस्य कर्तृस्थकर्मत्वेऽपि उपायस्य अतथात्वात् 'क्रोधं विनयत' इत्यादिवत् "कर्तृस्थे चाशरीरे कर्मणि" इति आत्मनेपदं न भवति ।

Notes on Malli—(1) सम्प्रति.........आह—Now he says what is to be thought of.

(2) नानिश्चितफलं.........वैरानुबन्धि च—The idea is that one should not undertake any work of doubtful consequence. As Kāmandaka has said—"The intelligent man should never undertake a work which is fruitless, troublesome, quarrelsome and of doubtful consequence".

Notes—शिवम्—Adj. to औपयिकम् । Auspicious, favourable. शी + वन् (औणादिक) (ह्रस्वश्च निपातित:) = शिवम् । "श्व:श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्" इत्यमर: । Note that शिवस्य स्त्री = शिवी । शिवा is the name of Gaurī, which is thus explained—शिवयति or शिवम् अस्ति अस्या: or शिव: अस्ति भर्तृत्वेन यस्या: । The word शिवानी (which is not included in "इन्द्र-वरुण-भव—" etc.,) is thus derived—शिवम् आनयति (जीवयति) इति शिवान: [शिव + अन (णिच्) + अण्] तत: स्त्रियां ङीप् = शिवानी ।

औपयिकम्—Indirect object (अप्रधान कर्म) of नयन्ति । उप – इ + अच् = उपाय: means. उपाय एव इति उपाय + ठक् (स्वार्थे) by the rule "विनयादिभ्यष्ठक्" The आ in उपाय is shortened by the गणसूत्र "उपायाद् ह्रस्वश्च" ।

गरीयसीम्—Adj. to फलनिष्पत्तिम् । Great. For derivation, see St. 1.

फलनिष्पत्तिम्—Obj. to विगणय्य । फलस्य निष्पत्ति: (षष्ठीतत्) ताम् ; accomplishment (निष्पत्ति:) of one's object. निस् – पद् + क्तिन् भावे = निष्पत्ति: ।

अदूषितायतीम्—Adj. to फलनिष्पत्तिम् । न दूषिता (नञ्तत्) = अदूषिता । अदूषिता आयति: यस्या: सा (बहुव्रीहि) ताम् । आ – यम् + क्तिन् भावे = आयति: (उत्तर: काल:)

future. Or, आयात्यांत इति आ-या+डति (बाहुलकात्)=आर्यतिः। दुष्+णिच्+क्त कर्मणि, स्त्रियाम् दूषिता। The short उ in दुष् is lengthened by the rule "दोषो णौ"। Having no adverse future.

विगणय्य—वि-गण (चुरादि)+ल्यप्=विगणय्य। Having well ascertained. Here अय comes in place of णिच् by the rule "ल्यपि लघुपूर्वात्"।

नयन्ति—Nom. जिगीषवः। नी+लट् अन्ति। Here the आत्मनेपद is not used by the rule "कर्तृस्थे चाशरीरे कर्मणि"—which means that the root नी takes आत्मनेपद, when it governs an incorporeal object (अशरीर) existing in the agent (कर्ता), as its accusative—e.g., क्रोधं विनयते। Malli's argument is that here the root नी has two objects पौरुषं and औपयिकम्। Of these two पौरुष is no doubt an incorporeal object existing in कर्ता, but the other औपयिक is not present in the कर्ता; hence the conditions of the Sūtra not being fully fulfilled the आत्मनेपद is not used. Bhaṭṭoji, however, defends it by saying "कर्तृगामित्वाविवक्षायां भविष्यति" which means that आत्मनेपद is not used here, as the fruit of the action does not accrue to tne agent. Cf. "अथ कथं विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषव इति। केचिदाहुः—अपगमे वर्तमानादिदमात्मनेपदविधानं भवति, अत्र तु करोत्यर्थं प्रापणं वा वर्तते अनेकार्थत्वात् धातूनामिति"। (पदमञ्जरी, p. 237); also—"अन्ये तु विध्यर्थमिदम् अकर्तृगेऽपि क्रियाफले, 'नयन्ति पौरुषम्' इति तु प्रमाद इत्याहुः"। (लघुशब्देन्दुशेखरः, p. 440).

पौरुषम्—Direct obj. (प्रधानकर्म) of नयन्ति। For derivation, see St. 7.

विजितक्रोधरयाः—Adj. to जिगीषवः। क्रोधस्य रयः (षष्ठीतत्); impulses of wrath=क्रोधरयः। विजितः क्रोधरयः यैः ते (बहुव्रीहि)। Who have conquered the force of anger. वि-जि+क्त कर्मणि=विजितः। क्रुध्+घञ्=क्रोधः। री (गतिरेषणयोः) or रय (गतौ)+घ=रयः speed, velocity.

जिगीषवः—Nom to नयन्ति। जेतुम् इच्छवः इति जि+सन्+उ कर्तरि=जिगीषवः। The second जि (in the reduplication जिजि) changes into गि by the rule "सन्लिटोर्जेः"। जि with सन् takes उ by the rule "सनाशंसभिक्ष उः"—जिगीषुः, desiring conquest.

Ch. of Voice—......विजितक्रोधरयैः जिगीषुभिः......पौरुषम्......नीयते।

Conquer wrath if you wish to rise.

अपनेयमुदेतुमिच्छता
तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः
प्रभया नांशुमतापुदीयते ॥ ३६ ॥

Prose—उदेतुम् इच्छता (पुरुषेण) पुरः रोषमयं तिमिरं धिया अपनेयम् । अंशुमता अपि प्रभया निशाकृतं तमः अविभिद्य न उदीयते ।

Beng.—অভ্যুদয়লাভার্থী পুরুষের প্রথমে বিবেকবুদ্ধির দ্বারা ক্রোধমূলক অজ্ঞান দূর করা কর্ত্তব্য। (দেখ!) দিবাকর রশ্মিদ্বারা রজনীর অন্ধকার ভেদ না করিয়া কখনই উদিত হন না।

Eng. Equiv.—अपनेयम—should get rid of. उदेतुम—to rise. इच्छता—wishes. तिमिरं—darkness of ignorance. रोषमयं—caused by anger. धिया—by thoughtfulness. पुरः—first. अविभिद्य—before dispelling. निशाकृतं—of night. तमः—darkness. प्रभया—by light. अंशुमता—by the sun. अपि—even. उदीयते—does not rise.

Eng.—The man who wishes to rise, should first by thoughtfulness get rid of ignorance caused by anger. Even the sun does not rise before he has dispelled by his light the darkness of night.

Expl.—Anger is our strongest enemy which always stands in the way of our success. The success of an enterprise depends upon cool thinking and adoption of proper measure. But cool thinking is not possible for him who is slave to his anger. Anger destroys the equanimity of our mind, racks our brain and shuts for ever from our eyes the vision of the right path. We falter at every step, we interpret the right to be wrong, find evil in good and suspect the sincerity of our best well-wisher. So it is our first duty to check anger and think coolly. See! that the sun also does not rise without first dispelling the darkness of night; and when the veil of darkness is removed the first rays of the sun gild the tops of the mountains and trees.

Malli.—(यदुक्तं विजितक्रोधरया इति तदावश्यकमाह—अपनेयमिति। उदेतुमभुदेतुम् इच्छता पुरुषेण पुरः प्रथमं रोषमयं रोषात् आगतम्। "मयट् च" इति मयट्। तिमिरम् अज्ञानं धिया विवेकबुद्ध्या करणेन अपनेयम् अपनोद्यम्। तथाहि, अंशुमतापि कर्त्रा प्रभया तेजसा करणेन निशाकृतं तमः ध्वान्तम् अविभिद्य न उदीयते। किन्तु विभिद्य एव इत्यर्थः। 'सूर्यस्य अपि एवं किमुत अन्येषाम्' इति अपिशब्दार्थः। इणो भाव लट्।)

Notes on Malli.—(1) यदुक्तं.........आह–It has been said—'having conquered the force of anger'; now he speaks of its necessity (आवश्यकम्—noun).

(2) सूर्यस्य.........शब्दार्थः—'This is the law even with the sun, what to speak of others ?'—this is the hint of the word अपि।

Notes—अपनेयम्—Verbal adj. to तिमिरम्। अप–नी+यत् कर्मणि = अपनेयम् is to be removed.

उदेतुम्—उद्–इ+तमुन्। To rise.

इच्छता--Adj. to पुरुषेण understood. इष्+शतृ, तृतीया १वचन; desiring.

तिमिरम—उक्ते कर्मणि २मा। Here it means 'ignorance'. तिम्यतीति तिम् (आर्द्रीभावे) + किरच् (बाहुलकात्) = तिमिरम्।

रोषमयम्—Adj. to तिमिरम्। रोषादागतम् इति रोष+मयट् by the rule "मयट् च"; born of anger. रुष्+घञ् भावे = रोषः।

धिया—करणे तृतीया। By thoughtfulness. ध्यै+क्विप् = धीः; तया।

पुरः—अव्यय। पूर्व–ङि+असि = पुरः। पूर्व is substituted by पुर् by the rule "पूर्वाधरावराणामसि पुरधवश्चैषाम्"। Also पुरस्तात् with the affix अस्ताति, first.

अविभिद्य—वि–भिद्+ल्यप् = विभिद्य। न विभिद्य (नञ्तत्) = अविभिद्य—without having penetrated.

निशाकृतम्—Adj. to तमः। निशया or निशा कृतम् (तृतीयातत्) = निशाकृतम्—made by night.

तमः—Obj. to अविभिद्य; darkness.

प्रभया—करणे तृतीया; by light. प्र–भा+अङ्, स्त्रियाम्—प्रभा।

अंशुमता—अनुक्ते कर्तरि तृतीया। अंशवः सन्ति अस्य इति अंशु+मतुप्=अंशुमान्, Sun.

अपि--अव्यय। For significance of this word, see Malli (Notes).

उदीयते—उद्-इण्+लट ते भाववाच्ये।

Ch. of Voice—अपनयेत् .....इच्छन् न अंशुमान् उदेति।

Remark—The figure of speech in this verse is दृष्टान्त which is thus defined—"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" (साहित्यदर्पण X. 69). When two ideas are represented as extremely similar to each other, so much so that one seems to be the reflection of another, the figure is दृष्टान्त। Here the rising of the sun after dispelling darkness has been represented as similar to the checking of anger by a man wishing to rise. बिम्बप्रतिबिम्बभाव (the relation of the image and its reflection) is the main factor in दृष्टान्त। Cf. "एकस्य अर्थस्य शब्दद्वयेनाभिधानं वस्तुप्रतिवस्तुभावः। द्वयोरर्थयोर्द्विरुपादानं बिम्बप्रतिबिम्बभावः इति प्रतापरुद्रयशोभूषणे स्पष्टम्"। (Jhalakikar p. 636). Also—"लोके हि दर्पणादौ बिम्बप्रतिबिम्बस्य भेदेऽपि मदीयमेवाव वदनं संक्रान्तमित्यभेदेनाभिमन्यते। अन्यथा हि प्रतिबिम्बदर्शने कृशोऽहं स्थूलोऽहम् इत्याद्यभिमानो नोदीयात्, भूषणविन्यासादौ च नायिका नाद्रियेरन्" (उद्योत)

N. B. दृष्टान्त differs from अर्थान्तरन्यास, because in the latter सामान्य is supported by विशेष and विशेष by सामान्य,—while in दृष्टान्त, सामान्य is supported by सामान्य and विशेष by विशेष. It differs from निदर्शना because in निदर्शना there is no mention of साधारणधर्म which is mentioned in दृष्टान्त। Moreover, in दृष्टान्त the two sentences are independent; but they are mutually dependent in निदर्शना। दृष्टान्त is not also उपमा as herein there is no use of words like यथा, इव etc.—Jagannātha thus brings out the distinction between दृष्टान्त and प्रतिवस्तूपमा—"अस्य चालङ्कारस्य प्रतिवस्तूपमया भेदकमेतदेव यत्तस्यां धर्मो न प्रतिबिम्बितः किन्तु शुद्धसामान्यात्मनैव स्थितः, इह तु प्रतिबिम्बितः" (रसगङ्गाधर, p. 452).

For similar idea, compare—"समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः। प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः"॥ शिशुपालवध—II. 33.

Even a powerful king loses all his regal power if he does not check the influence of ignorance caused by anger.

बलवानपि कोपजन्मन
स्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः
सकला हन्ति स शक्तिसम्पदः ॥ ३७ ॥

Prose—बलवानपि यः कोपजन्मनः तमसः अभिभवं न रुणद्धि, स क्षयपक्षः ऐन्दवीः कलाः इव सकलाः शक्तिसम्पदः हन्ति ।

Beng.—বলবান্ হইলেও যিনি ক্রোধজনিত মোহের আক্রমণ নিবারণ না করেন, কৃষ্ণপক্ষ যেরূপ চন্দ্রকলাকে নাশ করে, সেইরূপ তিনিও সকল শক্তিসম্পদ্ বিনষ্ট করিয়া ফেলেন।

Eng. Equiv.—बलवानपि—Howsoever powerful. कोपजन्मनः—caused by anger. तमसः—ignorance. अभिभवं—influence. रुणद्धि—checks. क्षयपक्ष.—dark fortnight. ऐन्दवीः—of the moon. कलाः—digits. सकलाः—all. हन्ति—destroys. सः—he. शक्तिसम्पदः—regal power.

Eng.—Howsoever powerful a man may be, if he does not check the influence of ignorance caused by anger, he destroys all his regal power, as the dark fortnight does all the digits of the moon.

Expl.—Similar to that of St. 36.

Malli.—(ननु दुर्बलस्य एवम् अस्तु, बलीयसस्तु क्रोधादेव कार्यसिद्धिरित्यत आह—बलवानिति । बलवान् शूरः अपि यः कोपात् जन्म यस्य तस्य कोपजन्मनः । "अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः" इति वामनः । तमसः मोहस्य, कृद्योगात् कर्तरि षष्ठी । अभिभवम् आक्रान्तिं न रुणद्धि न निवारयति । सः नृपः क्षयस्य पक्षः क्षयपक्षः कृष्णपक्षः ऐन्दवीः इन्दुसम्बन्धिनीः कला इव । "कला तु षोडशो भागः" इत्यमरः । सकलाः समग्राः शक्तिसम्पदः प्रभुमन्त्रोत्साहशक्तीस्तिस्रोऽपि हन्ति नाशयति । अन्धस्य जङ्घाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेव इत्यर्थः । अत्र कालस्य सर्वकारणत्वात् क्षयपक्षस्य कलाक्षयकारित्वम् अस्त्येव । तमसस्तु तत्कालविजृम्भणात् तथा व्यपदेशः ।)

Notes on Malli.—(1) ननु.........आह—Let this be the rule

with the weak ; the strong, however, gains success through anger—to this he says.

(2) अम्भस्य.........व्यपदेश:—Useless is the uncommon power of a man full of wrath, as the strength of the thighs is of no use to the blind man. As Time is the cause of every effect, the dark fortnight (which is a division of time) is the cause of the loss of moon's digits ; but the darkness is said to be the cause, simply because it appears at the time (of the moon's waning).

N. B. Time is the efficient cause (निमित्तकारण) of every effect. Cf. "जन्यानां जनक: कालो जगतामाश्रयो मत." (भाषापरिच्छेद 45)—"मूले जन्यानां जनक इति । कार्यत्वावच्छिन्नं प्रति निमित्तकारणमित्यर्थ:" (दिनकरी)। Also compare "न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते" , a half-verse of untraceable origin —quoted by सदानन्द in अद्वैतब्रह्मसिद्धि and by श्रीनिवासाचार्य in वेदान्तसौरभ—see कालसिद्धान्तदर्शिनी by the late M.M. Haran Chandra S'āstrI, p. 14). Also compare—"उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम् । निमित्तं कालमेवाहु-र्विभक्तेनात्मना स्थितम" ॥ (वाक्यपदीये IX. 3).

Notes—बलवान्—Adj. to य: । बलं अस्ति अस्य इति बल+मतुप् । The म of मतुप् is changed into व by the rule "मादुपधायाश्च मतोर्वोऽयवादिभ्य:" ; strong.

अपि—अव्यय । Here implies censure.

कोपजन्मन:—Adj. to तमस: । कोपात् जन्म यस्य तस्य (व्यधिकरण-बहुव्रीहि) ; Vāmana says a व्यधिकरण बहुव्रीहि is unavoidable when words like जन्म, प्रभव etc., follow - "अवर्ज्यो बहुव्रीहि र्व्यधिकरणो जन्माद्युत्तरपद:" । कुप् + घञ भावे = कोप: । Born of anger.

तमस: —कृद्योगे कर्तरि षष्ठी by the rule "कर्तृकर्मणो: कृति" । Ignorance.

अभिभवम्—Obj to रुणद्धि ; influence. अभि – भू + अप् भावे = अभिभव: ।

रुणद्धि—Nom. य: । रुध् + लट् ति ; checks. लिट् , रुरोध ।

क्षयपक्ष:—Nom. to हन्ति । क्षयस्य पक्ष: (षष्ठीतत्) = क्षयपक्ष: the dark fortnight. क्षि + अच् भावे = क्षय: ।

ऐन्दवी:—Adj. to कला: ; relating to the moon. lunar. इन्दो: इमा इति इन्दु + अण् + ङीप् स्त्रियाम् = ऐन्दव्य:, ता: (२या बहुवचन) । उनत्ति (wets) इति उन्द् + उ (औणादिक) = इन्दु: moon.

कलाः—Obj. to हन्ति ; digits.

सकलाः--Adj. to शक्तिसम्पदः and कलाः । कलाभिः सह वर्तमाना सकलाः (बहु) । Alt. form महकलाः, all.

हन्ति—Nom. सः and अयपक्षः । हन्+लट् ति । Destroys. लुङ् अवधीत् ।

शक्तिसम्पदः—Obj. to हन्ति । शक्तय एव सम्पदः (कर्मधा) or शक्तीनां सम्पदः (षष्ठीतत्) । शक्ति is here the regal power said to be three in number consisting of majesty (प्रभुशक्ति—see St. 10), energy (उत्साहशक्ति) and counsel (मन्त्रशक्ति). शक्+क्तिन् भावे = शक्तिः । सम्—पद्+क्विप् भावे = सम्पद् ।

Ch. of Voice—बलवतापि...अभिभवः येन न कथ्यते, अयपक्षेण ऊष्टव्यः...हन्यन्ते तेन ।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here the wrathful man is compared with the fortnight, regal power with lunar digits and wrath with darkness. This उपमा is supported by pun (श्लेष) in the word तमस् wich means darkness and ignorance.

The true monarch assumes mildness or severity as occasion demands.

समवृत्तिरुपैति मार्दवं
समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा
स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥

Prose—यः समवृत्तिः (सन्) समये मार्दवम् उपैति, तिग्मतां च तनोति, स मेदिनीपतिः विवस्वानिव ओजसा लोकम् अधितिष्ठति ।

Beng.—যে নৃপতি অতিশয় মৃদু ও অতিশয় কঠোর না হইয়া যথোচিত অবসরে মৃদুতা ও কঠোরতা প্রকাশ করেন তিনি প্রভাকরের ন্যায় তেজঃপ্রভাবে সকলের উপর অবস্থান করিয়া থাকেন ।

Eng. Equiv.—समवृत्तिः—maintaining the equanimity of his mind. उपैति—assumes. मार्दवम्—mildness. समये—as occasion demands. यः—who. तनोति—assumes. तिग्मताम्—severity. अधितिष्ठति—subdues.

लोकम्—the whole world. ओजसा—by his majesty. विवस्वान् इव—like the sun. मेदिनीपतिः—monarch.

Eng.—That monarch who, maintaining the equanimity of his mind, assumes mildness or severity as occasion demands, subdues, like the sun, the whole world by his majesty.

Expl.—A king should be just in his award of punishment. He should not adopt unnecessary harshness, nor should he be apathetic towards the perpetrators of crime. He should not be very severe, nor very mild ; but when occasion demands he shall be both. If he is too severe the people may rise against him and if he is too mild, he may be dishonoured and overcome. Hence all teachers of ancient Indian politics have recommended that king to be the ideal one who adopts the golden *via media*. Such a king presides over the world like the sun which is very hot during the summer, temperate in the spring and too mild in the winter.

Malli—विमृश्य कुर्वतः क्रियाप्रकारमाह—समेति । (यः समा नातिमृदुः नातितिग्मा वृत्तिर्यस्य सः समवृत्तिः सन्, समये सति अवसरे मार्दवं मृदुवृत्तित्वम् उपैति, तिग्मतां तीक्ष्णवृत्तित्वम् च तनोति, स मेदिनीपतिः विवस्वान् इव सूर्य इव ओजसा तेजसा लोकम् अधितिष्ठति आक्रामति । सूर्योऽपि ऋतुभेदेन समवृत्तिरित्यादि योज्यम् ।)

Notes on Malli.—(1) विमृश्य.........आह—Now he states the way of work for a discriminating man.

(2) सूर्योऽपि.........योज्यम्—The sun also becomes temperate, too hot and too mild in different seasons. N. B. Thus the sun is too hot in summer, temperate in spring and too mild in the winter.

Notes—समवृत्तिः -Adj. to मेदिनीपतिः । समा वृत्तिर्यस्य सः (बहुव्रीहि); who follows an even course of conduct i. e., neither too mild nor too severe.

उपैति—Nom. मेदिनीपतिः । उप – इ + लट्, ति । Takes up, assumes.

मार्दवम्—Obj. to उपैति । मृदोः भावः इति मृदु + अण् भावे = मार्दवम्, mildness.

समये—भावे or अधिकरणे ७मी। In the right time, on proper occasions. सम् – इ + अच् = समयः।

तनोति—Nom. मेदिनीपतिः। तन् + लट् ति।

तिग्मताम्—Obj. to तनोति। तेजयति इति तिज् + मक् (कवर्गश्चान्तादेशः) by the Uṇādi Sūtra "युजिरुचितिजां कुश्च" = तिग्मः, तस्य भावः इति तिग्म + तल्, स्त्रियाम् तिग्मता—sharpness, severity.

अधितिष्ठति—Nom. मेदिनीपतिः and विवस्वान्; अधि – स्था + लट् ति; presides subdues.

लोकम्—Obj. to अधितिष्ठति by the rule "अधिशीङ्स्थासां कर्म"; world.

ओजसा—करणे तृतीया। By valour, majesty.

विवस्वान्—Nom. to अधितिष्ठति। Sun. विविधं वस्ते आच्छादयते इति वि – वस् + क्विप् = विवः (रश्मिः) विवोऽस्यास्तीति विवस् + मतुप्। The म of मतुप् is changed into व by the rule "मादुपधायाश्च" मतोर्वोऽयवादिभ्यः"। We get विवस्वान्, as स् in विवस् is treated as भ by the rule "तसौ मत्वर्थे"।

मेदिनीपतिः—Nom. to अधितिष्ठति। मेदिन्याः पतिः (षष्ठीतत्)। King. Cf. "मधुकैटभयोरासीन्मेदसैव परिप्लुता। तेनेयं मेदिनी नाम्ना सर्वतः परिकीर्तिता॥" The base मेदिनीपति is declined like मुनि by the rule "पतिः समास एव"।

Ch. of Voice—समर्शत्तिना उपेयते .....येन तन्यते तिग्मता अधिष्ठीयते लोकः...... तेन विवस्वता इव मेदिनीपतिना।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here a king is compared with the sun.

For similar idea, compare—"स हि सर्वस्य लोकस्य युक्तदण्डतया मनः। आददे नातिशीतोष्णो नभस्वानिव दक्षिणः" ॥ Raghu IV. 8. "उद्वेजयति तीक्ष्णेन मृदुना परिभूयते। दण्डेन नृपतिस्तस्माद् युक्तदण्डः प्रशस्यते" ॥ Kāmandaka. "तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः। नैकमोजः प्रसादो वा रसभावविदः कवेः"—Śiśupālavadham II. 83. "मृदुपरुषगुणौ कालयोगेन कार्यौ" (अविमारक)।

Wealth cannot be managed by those who are slaves of their passions.

क्व चिराय परिग्रहः श्रियां
क्व च दुष्टेन्द्रियवाजिवश्यता ।
शरदभ्रचलाश्चलेन्द्रियै-
रसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

Prose—श्रियां चिराय परिग्रहः क्व, दुष्टेन्द्रियवाजिवश्यता च क्व ? हि शरदभ्रचलाः बहुच्छलाः श्रियः चलेन्द्रियैः असुरक्षाः ।

Beng.—সম্পদের চিরকাল স্থিতিই বা কোথায় আর দুষ্টেন্দ্রিয়রূপ অশ্বের বশ্যতাই বা কোথায় ! শরৎকালের মেঘের ন্যায় চঞ্চল এবং বহুচ্ছলযুক্ত সম্পদকে অজিতেন্দ্রিয় ব্যক্তিগণ রক্ষা করিতে সমর্থ হয় না।

Eng. Equiv.—क्व—where. चिराय—perpetual. परिग्रहः—mastery. श्रियाम्—of prosperity. दुष्टेन्द्रियवाजिवश्यता—slavery under horse-like unruly senses. शरदभ्रचलाः—flitting like autumnal clouds. चलेन्द्रियैः—by those who have no control over their senses. असुरक्षाः—cannot be properly managed. बहुच्छलाः—full of pretexts. श्रियः—wealth.

Eng.—Where is the perpetual mastery over prosperity ! and where the slavery under horse-like unruly senses ! wealth, flitting like autumnal clouds and full of pretexts, cannot be properly managed by those who have no control over their senses.

Expl.—Wealth and dissipation cannot dwell together. Wealth is ever ready to seek various pretexts to slip away. It is unsteady like the autumnal clouds. Even wise and self controlled persons are not able to maintain their perpetual mastery over prosperity, what to speak of ordinary men. Truly says the adage that fickle is the nature of fortune. There is no gainsaying the fact then that wealth can never be properly managed by those who are slaves of their passions. These unruly passions destroy all the inherent faculties of a man and ultimately hurl him down in the bottomless pit of perdition. So free yourself from the influence of wrath and think coolly.

Malli.—उक्तान्यथाकरणेऽनिष्टमाह—क्वेति । श्रियां सम्पदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व ? दुष्टेन्द्रियवाजिवश्यता, इन्द्रियाणि वाजिन इव इत्युपमितसमासः । दुष्टानाम् अमार्गधाविनाम् इन्द्रियवाजिनाम् वश्यो वशङ्गतः तस्य भावः तत्ता च क्व ? न उभयमेकत्र तिष्ठतीत्यर्थः । कुतः ? हि यस्मात् शरदभ्रचलाः शरदभ्रवत् चलाः चञ्चलाः । किञ्च बहुच्छलाः, बहुव्याजाः, बहुरन्ध्रा इति यावत् । "छलं तु स्खलिते व्याजे" इति विश्वः । श्रियः सम्पदः चलेन्द्रियैः अजितेन्द्रियैः असुरक्षाः, रक्षितुमशक्याः । कथञ्चित् प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्ति इत्यर्थः । वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

Notes on Malli.—(1) उक्ता..........आह—Now he states the faults arising from acting otherwise.

(2) न.........तिष्ठति—The two never dwell together.

(3) कथञ्चित्.........इत्यर्थः—The idea is that wealth, even if obtained somehow, does not remain with persons who have no control over their senses.

Extracts from other Commentaries.—(No commentary of Chitrabhānu is found on verses 21-38. It is evidently lost).—"ननु मार्दवतिग्मभावसमयमनादृत्य यथाकामं द्विषद्वर्गनिग्रहं कुर्वाणो धार्तराष्ट्रः सर्वेषां राज्ञाम उपरि स्थितः समग्रां श्रियम् अनुभवतीति दृष्टविरुद्धमिदं न्यायोपपादनमित्याशङ्क्याह—क्व चिरायेत्यादि । ......असाधारणे दारादिकर्मके स्वीकारे प्रसिद्धः स्वीकारमात्रे पर्यवस्यन् इह परिग्रहशब्दः स्त्रीलिङ्गवाच्यानां श्रियां भार्यात्वारोपं द्योतयति । चिरायेति परिग्रहविशेषणम् । दीर्घकाल-सम्बन्धीत्यर्थः । पृथक्त्वं द्योतयता श्रियामिति बहुवचनेन श्रियां सपत्नीवत् परस्परविरोधितया विभिन्नोपायरत्यता द्योत्यते ।......दुष्टेन्द्रियवाजिवश्ये मयोधने श्रोपरिग्रहोऽस्तीति शङ्का चिरायेत्यनेन निरस्यते ।......वायुवशानामभ्राणामिव कर्मवशानां श्रियां नैसर्गिकं चलत्वं, जितेन्द्रिय-स्थिर-पुरुषाश्रयाणां तु तासां प्रकृतिचपलानामपि प्रावृडभ्राणामिव अनुकूलपवनाप्याश्रितानां फलपर्यवसायि-स्थायित्वमस्तीति शरदभ्रदृष्टान्तेन द्योत्यत एव । चेतनधर्मत्वेन प्रसिद्धं चलनं लक्षणया त्वचेतनासु श्रीष्वारोप्यते । श्रियां पुरुषवञ्चकवेश्यासादृश्यं व्यञ्जयितुं श्रियः पुरुषांस्त्यजन्तीत्युक्तिं प्रतीतिं च परिहृत्य श्रियां पुरुषत्यागहेतुधर्मविशेषः इह छलशब्देन विवक्ष्यते"—चित्रभानुः ।

Notes—क्व क्व—The particle क्व, if repeated in co-ordinate sentences, indicates great disparity ("द्वौ क्वशब्दौ महदन्तरं सूचयतः" Malli on Raghu I. 2. Cf. "क्व वयं क्व परोक्षमन्मथः" Sak II. 18—also see Kirata I. 6). किम् + ङि + अत् by the rule "किमोऽत्". Then किम् is replaced by क्व by the rule "क्वाति" = क्व—पक्षे वत्, कुत्र ।

चिराय—अव्यय ; means चिरम् 'for a long time' ; perpetual. Adj. to परिग्रहः,।

परिग्रहः – Nom. to भवति understood. परि – ग्रह् + अप् भावे = परिग्रहः, mastery.

श्रियाम्—कृद्योगे कर्मणि षष्ठी by the rule "कर्तृकर्मणोः कृति" । श्रयति हरिम इति श्रि + क्विप, कर्तरि दीर्घश्च by the Vārttika "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च" ; prosperity.

च—अव्यय ; here denotes समुच्चय or अन्वाचय acc. to Chitrabhanu

दुष्टेन्द्रियवाजिवश्यता – Nom. to भवति understood. इन्द्रियाणि वाजिनः इव (उपमितकर्मधारय) = इन्द्रियवाजिनः । दुष्टाः इन्द्रियवाजिनः (कर्मधा) ; दुष्टेन्द्रियवाजिनां वश्यता (षष्ठीतत्) ; slavery under unruly horse like passions. दुष् + क्त कर्तरि = दुष्टाः । इन्द्रस्य आत्मनो लिङ्गम् इति इन्द्र + घच् (निपातनात्) by the rule "इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा" (V. 2. 93) = इन्द्रियम । इन्द्रिय is so called because we infer the presence of soul from the sign of senses. Here we infer the nominative from the instrumental ("करणेन कर्तुरनुमानात्" Bhaṭṭoji, because "कर्त्रधिष्ठितानामेव करणत्वात् तस्य लिङ्गमनुमापकम्" Nāgeśa). Other derivations as given in the Sūtra are "इन्द्रेण दृष्टम् ज्ञातम्, मम चक्षुः, मम श्रोत्रम् इत्यादिक्रमेण सृष्टमदृष्टद्वारा ; जुष्टं प्रीणितं सेवितं वा ; दत्तं यथायथं विषयेभ्यः । रूढिशब्दोऽयं यथाकथञ्चित् व्युत्पादितः" (तत्त्वबोधिनी)। In all the above derivations इन्द्र means the Supreme Soul. Nāgeśa quotes the following Śruti—"स एतमेव पुरुषं ब्रह्म ततमपश्यदिदमदर्शमिति तस्मादिन्द्रो नाम तमिन्द्रं सन्तमिन्द्र इत्याचक्षते" इति श्रुतेः (लघुशब्देन्दुशेखरः p. 330). अवश्यं व्रजति गच्छति इति वज + णिनि कर्तरि = वाजिनः horses. वश् + यत् = वश्यः, तस्य भावः इति वश्य + तल् स्त्रियाम् वश्यता ।

N. B. In philosophical works, the sense-organs are compared to horses. Cf. "तथा ह्यनन्तरातीतोग्रन्थ आत्मशरीरादीनां रथिरथादिरूपकल्पिं दर्शयति—

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ("काठकोपनिषत् I. 3. 3-4) इति" (शाङ्करभाष्य on ब्रह्मसूत्र I. 4, 1).

शरदभ्रचलाः—Adj. to श्रियः। शरदः अभ्राणि (षष्ठीतत्) ; शरदभ्राणि इव चलाः (उपमानकर्मधारय) "उपमानानि सामान्यवचनैः" ; flitting like the autumnal clouds. न भ्रश्यन्ति आपो यस्मात् इति नञ्–भ्रंश्+ड = अभ्रः। Or अपो बिभर्ति इति अप्+भृ+क (मूलविभुजादित्वात्) = अब्भ्रः (कें अब्भ्रं बकारवत् इति वैयाकरणाः"—इति मुकुटः)। चलन्तीति चल्+अच् (पचादित्वात्) = चलाः।

चलेन्द्रियैः—अनुक्ते कर्तरि तृतीया। चलानि इन्द्रियाणि येषां तैः (बहुव्रीहि)। Here an adjective is used as a noun cf. "विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" (वामन V. I. 10). Here षष्ठी is barred by the rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्" as असुरक्षाः is formed with the affix खल्।

असुरक्षाः—Adj. to श्रियः। सुखं रक्ष्यन्ते इति सु – रक्ष् + खल् कर्मणि = सुरक्षाः। न सुरक्षाः (नञ्तत्) = असुरक्षाः—cannot be well managed.

बहुच्छलाः—Adj. to श्रियः। बहूनि छलानि यासां ताः (बहुव्रीहि) of many pretexts. Sandhi बहु + छल = बहुच्छलः।

श्रियः—Nom. to भवन्ति understood. For derivation see. श्रियाम्।

Ch of Voice—......परिगृहीतेन (भूयते)......बध्यतया (भूयते)। शरदभ्रचलाभिः श्रीभिः......असुरक्षाभिः (भूयते)।

Remark—In the first half of this verse the figure of speech is विषम which is thus defined—"गुणौ क्रिये वा चेत् स्यातां विरुद्धे हेतुकार्ययोः। यद्वारब्धस्य वैफल्यमनर्थस्य च सम्भवः। विरूपयोः सङ्घटना या च तत् विषमं मतम्" ॥ (साहित्यदर्पणे X. 91) which means that (1) when the quality of a cause is contrary to the quality of its effect or (2) when the action of a cause is contrary to the action of its effect or (3) when the agent not only does not get the fruit of his action but meets with an undesirable effect or (4) when the connection between two things which are incongruous on account of extreme disparity, is conceived to be

impossible—the figure is विषम । Here there is great disparity between mastery over fortune and dissipation and their connection with each other is conceived to be an impossibility—which is indicated by the use of the word क्व twice. Hence the figure is of the 4th variety.

Again there is the figure काव्यलिङ्ग (for def., see St. 5). Here the sense of the second half has been stated as the cause of the sense of the first half. Between विषम and काव्यलिङ्ग we have संसृष्टि (तिलतण्डुलन्यायेन) because the two figures are independent of each other. We have also उपमा in इन्द्रियवाजि and शरदभ्रचला: which is subordinate figure.

For similar idea, compare—"तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न सन्तिष्ठते, मूर्खान् द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि । शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनपि, श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम्" ॥ मुद्राराक्षस--III. 5.

किमसामयिकं वितन्वता
मनसः क्षोभमुपात्तरंहसः ।
क्रियते पतिरुच्चकैरपां
भवता धीरतयाधरीकृतः ? ॥ ४०

Why are you manifesting this untimely agitation of your mind?

Prose—उपात्तरंहसः मनसः असामयिकं क्षोभं वितन्वता भवता (पुरा) धीरतया अधरीकृतः अपां पतिः (अधुना) किम् उच्चकैः क्रियते ?

Beng.—তুমি ধৈর্য্যগুণে মহাসাগরকেও অতিক্রম করিয়াছিলে, কিন্তু এক্ষণে অধীর মনের অসাময়িক ক্ষোভ প্রকাশ করিয়া সেই সাগরকে কেন তোমা অপেক্ষা অধিক করিতেছ ?

Eng. Equiv.—किम्—why. असामयिकम्—untimely. वितन्वता—exhibiting. मनसः—of your mind. क्षोभम्—excitement. उपात्तरंहसः—impulsive. उच्चकैः क्रियते—allow to domineer over you. अपां पतिः—ocean. भवता—by you. धीरतया—in calmness. अधरीकृतः—surpassed.

Eng.—Why do you, who (once) surpassed in calmness the ocean, now allow him to domineer over you, by exhibiting untimely excitement of your impulsive mind ?

Malli.—क्रोधस्य दुष्टताम् उक्त्वा तस्य त्यागमुपदिशति—किमिति। उपात्तरंहसः प्राप्तत्वरस्य मनसः, असामयिकं, समयोऽस्य प्राप्तः सामयिकः। "समयस्तदस्य प्राप्तम्" इति ठञ्। स न भवतीति असामयिकः तम् अप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्यगुणेन। "मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु" इति रसिकाः। अधरीकृतः तिरस्कृतः प्राक् इति शेषः। अपां पतिः समुद्रः किं किमर्थम् उच्चकैः अधिकः क्रियते ? न पराजितं पुनः उच्चकैः कुर्यात् इति भावः। अत्र वितन्वता इति क्षोभविशेषणत्वेन अपांपतिपदार्थस्य उच्चैःकरणे हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः।

Notes on Malli—(1) क्रोधस्य.........उपदिशति—Having spoken of the evils of wrath he now advises its renunciation.

(2) न पराजितं.........भावः—The idea is that one should not allow a defeated person to domineer over him.

Extracts from other Commentaries—"एवं नयानुरोधिनः प्रशमस्योपादेयतां नयविरोधिनः साहसरूपस्य पराक्रमस्य हेयतां चापपाद्य महामतिः महीपतिः द्विषद्विषयासमयरोषकषितं सहोदरं सप्रश्रंसोपालम्भमनुशास्ति—किमसामयिकमित्यादिना।......प्रकृतिस्थितिरूपम् इह अम्बुधेः धैर्यम् विवक्षितं न चलनविरहः, अविरतचलदूर्मिपरम्परस्य तस्य तदसम्भवात्। प्रकृतिस्थितिमात्रम् अम्बुधेः धैर्यम्, भवतस्तु चलनविरहः प्रकृतिस्थितिश्चेति समग्रं धैर्यमिति पर्याप्तधैर्येण त्वया अपर्याप्तधैर्यः अम्बुधिः पूर्वं जित एवेत्यभिप्रायः।......वितन्वतेति परस्मैपदेन क्षोभकरणस्य समयलङ्घनादिनिमित्ताधर्मरूपं फलं न वृकोदरैकसम्बन्धि, सर्वपाण्डवसम्बन्धीति द्योत्यते। नन्वक्षुभिते मनसि कोपो नोत्पद्यते, कोपानुत्पत्तौ परिपन्थिनिरासाय प्रयत्नो न स्यादिति परिपन्थिनिरासहेतुः मनसः क्षोभः गुण एव, न दोषः इत्याशङ्क्याह—असामयिकमिति। ......उपात्तरंहसेति।......संरम्भो हि स्वानुभूतमपि वस्तु विस्मारयतीति भावः"—चित्रभानुः।

Notes—किम्—अव्यय ; denotes censure (आक्षेप)।

असामयिकम—Adj. to क्षोभम्। न सामयिकः (नञ्तत्) = असामयिकः, तम्। **Untimely.** समयः प्राप्तः अस्य इति समय + ठञ् by the rule "समयस्तदस्य प्राप्तम्" = सामयिकः। सम् – इ + अच् कर्तरि = समयः।

वितन्वता—Adj. to भवता। वि – तन् + शतृ, तृतीया १वचन = वितन्वता manifesting.

मनस:—शेषे षष्ठी ।

क्षोभम्—Obj. to वितन्वता । क्षुभ् + घञ् भावे = क्षोभ:, तम् ; excitement.

उपात्तरंहस:—Adj. to मनस: । उपात्तं रंह: येन तस्य (बहुव्रीहि) । उप – आ + दा + क्त कर्तरि = उपात्त: taken. रमते अनेन इति रम् + असुन् (हुगागमश्च) by the Uṇādi Sūtra "रमेर्हुक् च" or रह् + असुन् = रंहस् means velocity, here means 'agitation'.

क्रियते—Nom. भवता । कृ + लट् ते कर्मणि ।

पति:—उक्ते कर्मणि १मा । Lord. पा + डति = पति: ।

उच्चकै:—अव्यय । उच्चै: + अकच् (स्वार्थे) by the rule "अव्ययसर्वनाम्नामकच् प्राक् टे:" which means that अकच् is added immediately before the final vowel of an indeclinable (अव्यय) or a pronoun. (Cf. the affix बहुच् which comes before a प्रकृति "विभाषा सुपो बहुच् पुरस्तात्" e. g., 'लघुब हुतृणं नर:' Śiśu. II. 50) = उच्चकै: high. उच्चै: is mostly used as an adjective Cf. "उच्चै: कुलं चात्मन:" (Śāk. IV 17). See St. 13.

अपाम्—शेषे षष्ठी । अपां पति: = अपांपति ocean. अप् is always feminine and plural.

भवता—अनुक्ते कर्तरि तृतीया । By you. भा + डवतु = भवत्, तेन ।

धीरतया—करणे तृतीया ; by profundity. Calmness is the unagitated condition of our mind even if there be any cause of agitation. Cf. "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीरा:" (कुमारसम्भव I. 59). Also see Chitrabhānu.

अधरीकृत:—Adj. to अपां पति: । न अधर: (नञ्तत्) = अनधर: । अनधर: अधर: सम्पद्यमान: कृत: इति अधर + च्वि (अभूततद्भावे) + कृ + क्त कर्मणि ; excelled, surpassed.

Ch. of Voice— .....वितन्वन्......भवान्......अधरीकृतम्......पतिम्......... करोति ।

Remark—The figure of speech in this verse is काव्यलिङ्ग (for def., see St. 5). Here Bhīma's exhibition of his mental excitement, has been stated as the cause of raising the ocean to a higher status.

Fortune deserts those who do not check their passions.

श्रुतमप्यधिगम्य ये रिपून्
विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदा-
मयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

Prose—ये श्रुतम् अधिगम्य अपि शरीरजन्मनः रिपून् न विनयन्ते, ते अचिराय सम्पदाम् चापलाश्रयम् अयशः जनयन्ति खलु ।

Beng—যাহারা কৃতবিদ্য হইয়াও কামক্রোধাদি অন্তঃশত্রুসকল দমন করিতে পারে না তাহারা শীঘ্রই লক্ষ্মীর চপলতারূপ অযশ ঘটাইয়া দেয় ।

Eng. Equiv.—श्रुतम्—Sāstras. अपि—even. अधिगम्य—after studying. ये—those. रिपून्—passions विनयन्ते—check. शरीरजन्मनः—carnal. जनयन्ति—bring. अचिराय—quickly सम्पदाम्—goddess of wealth. अयशः—infamy. खलु—verily. चापलाश्रयम्—due to fickleness.

Eng.—Verily those, who even after studying the S′āstras, do not check their carnal passions, quickly bring on the Goddess of wealth the infamy due to fickleness.

Expl.—Hard it is to check our passions Yet, in the constant struggle of the spirit and the senses, the knowledge of the S′āstras enables a man to fight successfully his sensual enemies sprung from the body. The onslaught of these unruly passions can only be checked by our knowledge of the S′āstras. Yet rare are not those men who even after having acquired S′āstric knowledge, are slaves to their passions. Passion is no doubt powerful in the ignorant and the learned alike ; but it is the learned alone who can check and conquer his passions. With these persons the Goddess of Fortune does not remain long and they quickly bring the Goddess of wealth into ill fame as being unsteady in her attachment. Hence the fault is not of the wealth but of its possessor.

Malli.—श्रुतमिति । (किञ्च ये श्रुतं शास्त्रम् अधिगम्यापि शरीरजन्मनः शरीरप्रभवान्

रिपून् कामक्रोधलोभमोहमदमात्सर्यादीन् न विनयन्ते न नियच्छन्ति । "कर्तृस्थे चाशरीरे कर्मणि" इत्यात्मनेपदम् । ते खलु अचिराय झटिति सम्पदां श्रियां चापलाश्रयम अस्थैर्यनिबन्धनम् अयशः दुष्कीर्तिय जनयन्ति । आश्रयदोषात् अस्थैर्यं सम्पदां न स्वदोषात् इत्यर्थः । अजितारिषड्वर्गस्य कुतः सम्पद इति भावः ।)

Notes on Malli—(1) आश्रय......भावः—The fickleness of Fortune is due to the fault of her possessor and not of her own—this is the idea. The sense is that where is the wealth of a man who has not conquered his six enemies (Kāma and others).

Extracts from other Commentaries—"ननु समयधैर्यविरोध्यपि संरम्भः क्षत्रियाणां न दूषणम्, तस्य शत्रुदमनसाधनत्वात्, शत्रुदमनं विना सम्पद् दुष्प्रापेत्याशङ्क्याह—श्रुतमपीत्यादि ।......चक्षुरादयः कामादयश्चेह रिपुशब्देन विवक्ष्यन्ते । चक्षुरादीनां कामादीनां च नापकारित्वमेव उच्छेदकरत्वमप्यस्तीति द्योतयितुं तेषां रिपुत्वमेवोक्तं न रिपुसामान्यम् ।......एतदुक्तं भवति—अविनीतेन्द्रियाणां परिवादकरं चापलं सम्पदश्चजन्ति च्यवन्ते चेत्येव न, कदाचित् स्वसम्बन्धेन कृतचापलाना सम्पदा पुनः पुरुषान्तरसम्बन्धेऽपि चापलसम्भावनया परिवादस्तदवस्थ एवेति । किञ्च कुलभाया कृद्व्रातादिदोषदूषितेषु सपत्नेषु अस्मदभिमुखीभूता लच्चात्मवाविनीततया चलिता इत्ययमर्थोऽपि अनेनैव शाकेन द्योत्यते ।"—चित्रभानुः ।

Notes.—श्रुतम्—Obj. to अधिगम्य । श्रूयते इदम् इति श्रु+क्त कर्मणि—श्रुतम Śāstras.

अपि—अव्यय । Denotes either विरोध or समुच्चय । Cf. "श्रुतमधिगम्यापीत्यन्वयः । श्रुताधिगमे कारणे सति विनयस्य कार्यस्य भावो विरुद्धतया प्रतिभातीति विरोधं द्योतयन् अपिशब्दो द्विगुणामविनीतेन्द्रियता द्योतयति । अथवा श्रुतमप्यधिगम्येत्यन्वयः । श्रुतं शास्त्रश्रवणम् । अनुक्ता धैर्य-विवेकादयो विनयहेतवः अपिशब्देन समुच्चीयन्ते ।"—चित्रभानुः ।

अधिगम्य—अधि—गम्+ल्यप्—having studied.

रिपून्—Obj. to विनयन्ते । रपति दोषम् इति रप्+कु (औणादिक)=रिपुः ; the (six) enemies of our body, are काम (lust), क्रोध (wrath) लोभ (greed), मोह (ignorance), मद (haughtiness), मात्सर्य (jealousy). Some, however, read हर्ष for मोह and मान (pride) for मात्सर्य । Also see extracts.

विनयन्ते—Nom. ये। वि—नी+लट् अन्ते। The आत्मनेपद is by the rule "कर्तृस्थे चाशरीरे कर्मणि"। For detailed discussion, see St. 35 on नयन्ति।

शरीरजन्मनः—Adj. to रिपून्। शरीरात् जन्म येषां ते (व्यधिकरणबहुव्रीहि) तान्। Cf. "सवर्ण्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः" (वामन)—see St. 37. Born from the body; carnal. शृणाति शीर्यते वा शॄ+ईरन् (औणादिक)= शरीरम्।

जनयन्ति—Nom. ते। जन+णिच्+लट् अन्ति; creates.

अचिराय—अव्यय; quickly. न चिराय (नञ्तत्)। Chitrabhānu reads it as चिराय। "कालदैर्घ्यद्योतकं चिरायेत्यव्ययं जनयन्तीत्यस्य विशेषणम्" (चित्रभानुः)।

सम्पदाम्—शेषे षष्ठी। सम्—पद+क्विप्=सम्पत्; wealth.

अयशः—Obj. to जनयन्ति। न यशः (नञ्तत्), scandal. अश्नुते व्याप्नोति इति अश्+असुन् (औणादिक)=यशः।

खलु—अव्यय; verily.

चापलाश्रयम्—Adj. to अयशः। चापलम् आश्रयः यस्य तत् (बहुव्रीहि); due to fickleness, चपलस्य भावः इति चपल+अण्=चापलम्।

Ch. of Voice—यैः रिपवः विनीयन्ते न शरीरजन्मानः......जन्यते......तैः।

Do not allow anger to rob you of success.

अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापनी।
जनवन् न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

Prose—अतिपातितकाल साधना स्वशरीरेन्द्रियवर्गतापनी अक्षमा भवन्तं जनवत् अपनेतुं न अर्हति।

Beng.—ক্রোধ সময় ও সহায়াদি উপেক্ষা করে এবং নিজ দেহ ও ইন্দ্রিয়বর্গকে সন্তপ্ত করিয়া থাকে; সেই ক্রোধ যেন তোমাকে নীচ লোকের ন্যায় নীতিলভ্য ফললাভে বঞ্চিত না করে।

Eng. Equiv.—अतिपातितकालसाधना—that frustrates the (usefulness of) proper time and means. स्वशरीरेन्द्रियवर्गतापनी—that inflames the

body and the senses. जनवत्—like ordinary people. भवन्तम्—you. अक्षमा—anger. नयसिद्धे:—from success to be achieved by sound policy. अपनेतुम्—lead away.

Eng.—Let not anger lead you away, like ordinary people, from success to be achieved by sound policy—anger that frustrates the (usefulness of) proper time and means and inflames the body and the senses.

Expl.—Do not allow anger to rob you of the success to be had by following a sound policy. Wrath makes us blind. Through wrath we neglect the usefulness of proper time and overlook the means of success. The angry eye does not see things properly. Due to excitement wrath inflames our body and mind. The wrathful person can commit any act of proclaimed ugliness. But success depends on cool thinking and timely action. The ordinary people are no doubt subject to the impulse of wrath but it is shameful that you should also be led away from success by anger.

Malli.—(तथा क्रोधात् कार्यहानि: इत्याशयेनाह—अतिपातितेति। अतिपातितकालसाधना अतिपातितानि अतिक्रान्तानि काल: समर्थोऽनुरूप: साधनानि सहायादीनि च यया सा तथोक्ता स्वशरीरेन्द्रियवर्गतापना, तापयतीति तापनी। कर्तरि ल्युट्। टित्वात् ङीप्। स्वस्य यच्छरीरम् इन्द्रियवर्गश्च तयो: तापनी अक्षमा क्रोध: भवन्तं जनवत् पृथक्जनमिव। "तेन तुल्यम्—" इति वतिप्रत्यय:। तेन इवार्थो लक्ष्यते। "तद्धितश्चासर्वविभक्ति:" इति अव्ययम्। नयसिद्धे: नयसाध्यफलात् अपनेतुं पृथक्कर्तुम् नार्हति। असमयक्रोधस्य आत्मसन्तापातिरिक्तं फलं नास्तीत्यर्थ:।)

Notes on Malli.—(1) तथा............आह—Wrath renders all enterprise futile—with this intention he says.

(2) असमय........नास्तीत्यर्थ:—The idea is that untimely wrath only begets sorrow.

Extracts from other Commentaries—"ननु मुमुक्षूणामिव महीभुजां कामादयो नैकान्तशत्रव इति ते कदाचित् उपकारिणोऽपि भवन्ति। सहजादयस्तु द्विष: सन्ततं

तापकारिण एवेति तत्कृतपरिभवो न मर्षणीय इत्याशयेनाह—अतिपातितेत्यादिना ।......स्वशब्दं विनापि शरीरस्य इन्द्रियवर्गस्य च स्वकीयत्वे सिद्धे स्वशब्दोपादानेन शरीरस्य इन्द्रियवर्गस्य च स्वकीयस्यैव अक्षमया तापः क्रियते न परकीयस्येति द्योत्यते ।......परिभवासहिष्णूनां बलवताम्-अक्षमया रिपुक्षपणादिसिद्धिः भवन्त्यपि दूरं तन्वीति द्योतयितुं नयेन सिद्धिर्विशेषिता । नयहेतुकैव सिद्धिः प्रशस्यते, न सिद्धिमात्रमिति भावः ।......जन्मभावसंस्कारम् अन्धबधिरकल्पं प्राकृतं जनम् अक्षमा नयसिद्धेर्दूरं गमयतीत्येतत् तामिस्रा गुहा छादयतीतिवद् उचितमेव । त्वां तु प्रशस्यतरं श्रुतविवेकादिसम्पन्नम् अक्षमा नयसिद्धेरपनयतीत्येतत् सूर्यं तमश्छादयतीतिवद् अत्यन्तं न सम्भवतीति भावः"—चित्रभानुः ।

Notes.—अतिपातितकालसाधना—Adj. to अक्षमा । कालश्च साधनानि च (द्वन्द्व) = कालसाधनानि । अतिपातितानि कालसाधनानि यया सा (बहुव्रीहि) । Which transgresses proper time and means. अति + पत् + णिच + क्त कर्मणि = अतिपातितानि transgressed, outstripped (Cf. "ततार विद्याः पवनातिपातिभिः" Raghu III. 30) ; साध + ल्युट् करणे = साधनानि here means an army or allies or means of doing a work. Chitrabhānu analyses as काल एव साधनम् (कर्मधा०) ; अतिपातितं कालसाधनं यया सा (बहु०) ।

स्वशरीरेन्द्रियवर्गतापनी—Adj. to अक्षमा । शरीरश्च इन्द्रियवर्गश्च (द्वन्द्व) = शरीरेन्द्रियवर्गौ ; स्वस्य शरीरेन्द्रियवर्गौ (षष्ठीतत्) ; तयोः तापनी (षष्ठीतत्) । इन्द्रियाणां वर्गः (षष्ठीतत्) = इन्द्रियवर्गः ; which inflames the body and the senses. तापयतीति तप + णिच् + ल्युट् कर्तरि = तापन + ङीप् by the rule "टिड्ढाणञ्-द्वयसज्-दघ्नञ्-मात्रच्-तयप्-ठक्-ठञ्-कञ्-क्वरपः" = तापनी । If, however, तापन is derived with the affix ल्यु the feminine will be तापना (as in नन्दना) । Chitrabhânu reads it as तापिनी (ताच्छील्ये णिनिप्रत्ययः) । For derivation of the word इन्द्रिय see St. 39. For शरीर, see St. 41.

जनवत्—अव्यय adv. जनेन तुल्यम् इति जन + वति by the rule "तेन तुल्यं क्रिया चेद्वतिः" = जनवत् like ordinary man. The word is an अव्यय by the rule "तद्धितश्चासर्वविभक्तिः" which means that words formed with such तद्धित affixes as do not take all the case-endings, are indeclinables.

भवन्तम्—Obj. to अपनेतुम् । For derivation, see St. 40.

अक्षमा—Nom. to अर्हति । न क्षमा (नञ्तत्) = अक्षमा wrath. (क्षमूष् सहने) क्षम् + अङ् ; (षित्त्वात्) स्त्रियां क्षमा ।

नयसिद्धेः—अपादाने पञ्चमी । नयसाध्या सिद्धिः (शाकपार्थिवादिवत् समासः) Success to be achieved by sound policy. सिध् + क्तिन् भावे = सिद्धिः । For नयः, see St. 3.

अपनेतुम्—अप – नी + तुमुन् ; to lead away. Here तुमुन् is used in connection with the root अर्हति । The rule is "शक-धृष-ज्ञा-ग्ला-घट-रभ-लभ-क्रम-सहार्हास्त्यर्थेषु तुमुन्" ।

अर्हति—Nom. अक्षमा । अर्ह + लट् ति , deserves.

Ch. of Voice—अतिपातितकालसाधनया स्वशरीरेन्द्रियवर्गतापन्या......अक्षमया... न अर्ह्यते ।

Forgiveness is the noblest revenge.

उपकारकमायतेर्भृशं
प्रसवः कर्मफलस्य भूरिणः ।
अनपायि निबर्हणं द्विषां
न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

Prose—आयतेः भृशम् उपकारकं, भूरिणः कर्मफलस्य प्रसवः, अनपायि द्विषां निबर्हणं तितिक्षासमं साधनं न अस्ति ।

Beng.—পরিণামে বিশেষ উপকারক, প্রভূত কর্মফলের কারণ, স্বয়ং অবিনাশী এবং শত্রুবিনাশক তিতিক্ষার সদৃশ সাধন আর কিছুই নাই ।

Eng. Equiv.—उपकारकम् - yields beneficial results. आयतेः—in the end. भृशं—highly. प्रसवः—source. कर्मफलस्य—success in undertakings. भूरिणः—great. अनपायि—itself indestructive. निबर्हणं—which destroys. द्विषा—enemies. तितिक्षासमम्—equal to forgiveness. अस्ति—is. साधनम्—means.

Eng.—There is no means equal to forgiveness, which yields highly beneficial results in the end, which is the source of great success in undertakings, and which itself indestructive, destroys enemies.

Expl.—Remember, forgiveness is the noblest revenge. No other

means is productive of such good as it is. We may at first call the forgiving man weak; but in the long run he triumphs over all others. With all great men in the world, forgiveness is the only weapon. They win their battle without blood-shed. In the orgy of violence and hatered, those who preach non-violence and forgiveness, are at the outset looked down upon by the people; but the time comes when the world looks back to them and salutes them as her saviour and ages of adorers follow them. Forgiveness is thus the great source of success in undertakings. It is an unfailing destroyer of enemies. So win your enemies rather by love than by the sword.

Malli.—दुष्टः क्रोध इत्युक्तम्। अथ क्षमाया गुणानाह—उपकारकमिति। आयतेः उत्तरकालस्य भृशम् अत्यन्तम् उपकारकं स्थिरफलहेतुरित्यर्थः। भूरिणः प्रभूतस्य कर्मफलस्य। प्रसूयतेऽनेनेति प्रसवः कारणम्। अपायि न भवतीति अनपायि स्वयम् अविनश्यदेव द्विषां निबर्हणं विनाशकम् एवंगुणकं साधनं तितिक्षासमं क्षमातुल्यं नास्ति। "क्षान्तिः क्षमा तितिक्षा च" इत्यमरः। "तिज निशाने" इति धातोः "गुप्तिज्किद्भ्यः सन्" इति क्षमार्थे सन्-प्रत्ययः। तितिक्षासममित्यनुक्तोपमेया समासे आर्थी लुप्तोपमा, भृशायत्यनपायिशब्दैः साधनान्तर-वैलक्षण्यात् व्यतिरेकश्च व्यज्यते। "भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः" इत्यलङ्कारसर्वस्वम्।

Extracts from other Commentaries—"नन्वक्षमा पुरुषस्य उत्साह-हेतुतया द्विषद्वधादिफलं जनयत्येव, तस्याः स्वन्तता न निश्चितत्येष एव दोषः। क्षमा तु उत्साहविघातिनी किं फलम् अभिप्रेत्य उपास्यते इत्याशङ्क्याह—उपकारकमित्यादिना।...... वंशजन्माधिपत्यप्राप्तिरूपसम्बन्धायत्तं दीर्घकालस्यापि सिद्धं फलमायतिशब्देनोच्यते।........ आयतेः सिद्धतया उपकार एवापेक्षा न निष्पत्तौ इति उपकारकमित्युक्तं न कारकमिति।...... बहुसाधनापेक्षं पराक्रमादिकर्म न चिरं तिष्ठति। बुद्धिगुणमात्रापेक्षः साधनविशेषस्तु नैवमिति भावः। अथवा अनपायीत्यस्य अन्योऽर्थः। अपायस्य उपप्लवस्य व्यसनस्य सम्बन्धि अपायि। हेतुहेतुमद्भाव इह सम्बन्धो विवक्षितः; अपायहेतुरित्यर्थः, तद्विपरीतमनपायि। परोच्छेदकर एव पराक्रमः कदाचित् कर्तुरपि उपप्लवं कुर्यात्, इदं तु साधनं नैवमिति भावः।...... ईदृग्गुणं साधनं तितिक्षासमं नास्तीत्युक्तं, न तु ईदृक्गुणसिद्धा तितिक्षा फलसिद्धेः

साधनमिति । ईदृक्गुणं साधनं तितिक्षाया अधिकं मा भूत्, समं तु यद्यस्ति तर्हि तदपहाय कुतोऽस्यां पक्षपात इति प्रतीतिः मा भूदिति द्योत्यते" ।—चित्रभानुः ।

Notes—उपकारकम्—Adj. to साधनम् । उपकरोतीति उप – कृ + ण्वुल् (अक) = उपकारकम्, that which benefits.

आयतेः—शेषे षष्ठी । Related to उपकारकम् । आ – यम् + क्तिन् भावे = आयतिः (future).

भृशम्—अव्ययं । Adverb qualifying the root in उपकारकम् । भृश्यतीति भृश् + क = भृशम् ।

प्रसवः—Adj. to साधनम् । प्रसूयते अनेन प्र – सू + अप (करणे) = प्रसवः cause source. Chitrabhānu reads प्रभवः ।

कर्मफलस्य—कृद्योगे कर्मणि षष्ठी । कर्मणः फलम् (षष्ठीतत्) तस्य ; success of undertakings.

भूरिणः—Adj. to कर्मफलस्य । भवतीति भू + क्रिन् by the Uṇādi Sūtra "अदिशदिभूशुभिभ्यः क्रिन्" ; immense, great. "भूरि स्यात् प्रचुरे स्वर्णे" इति हैमः ।

अनपायि – Adj. to निबर्हणम् । अप – इ + घञ् भावे = अपायः । अपायः अस्ति अस्य इति अपाय + इनि (मत्वर्थे) = अपायिन् । न अपायि (नञ्तत्) = अनपायि, unfailing indestructible.

निबर्हणम् – Adj. to साधनम् । निबर्ह्यते अनेन इति नि – बर्ह + ल्युट (करणे) = निबर्हणम्, destroyer.

द्विषाम्—कृद्योगे कर्मणि षष्ठी । द्वेष्टि इति द्विट् ; द्विष् + क्विप् कर्तरि । Of the enemies.

तितिक्षासमम्—Adj. to साधनम् । तिज् + सन् (स्वार्थे) + अ + स्त्रियाम् टाप् = तितिक्षा, forgiveness. The affix सन् comes after the root तिज् in the sense of 'forgiving' by the rule "गुप्तिज्किद्भ्यः सन्" and Vārttika "तिजेः क्षमायाम्" । तितिक्षया or तितिक्षायाः समम् (तृतीयातत् or षष्ठीतत्) । तृतीया and षष्ठी being optional by the rule "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्" । See St. 34. Equal to forgiveness. In Vedānta, तितिक्षा has the technical meaning—'शीतोष्णादिद्वन्द्वसहिष्णुता' ।

अस्ति—Nom. साधनम् । अस् + लट् ति ।

साधनम्—Nom. to अस्ति । साध् + ल्युट् करणे = साधनम्, means.

Ch. of Voice—उपकारकेण .....प्रसवेन......अनपायिना निबर्हणेन तितिक्षासमेन साधनेन न भूयते ।

Remark—The figure of speech in this verse is लुप्तोपमा (a variety of उपमा) which is thus defined "लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः । त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत्" ॥ (साहित्यदर्पण X. 22)—which means that in लुप्तोपमा one or two or three of the four elements of उपमा (उपमान—standard of comparison, उपमेय—object of comparison, सामान्यधर्म—common property and सम्बन्ध—the relation of the उपमान and उपमेय with the common property) are absent. Here in 'तितिक्षासमम्' उपमेय has not been mentioned, तितिक्षा being उपमान । Here, again, the लुप्तोपमा is आर्थी (and not श्रौती) because the relationship of उपमान and उपमेय with the common property is expressed by the word समम् । This word समम् which is उपमाप्रतिपादक is compounded with उपमान (तितिक्षा) and hence the लुप्तोपमा is समासगा आर्थी ।

Again, there is the implied figure व्यतिरेक which is thus defined—"आधिक्यमुपमेयस्योपमानान्न्यूनताथवा व्यतिरेकः" (साहित्यदर्पण X. 71). When उपमेय is described as superior or inferior to उपमान the figure is व्यतिरेक । व्यतिरेक is of 48 kinds (see साहित्यदर्पण—Do). Here the words भृशम्, आयति and अनपायि differentiates the means (साधन) from other means which are inferior to it. According to Ruyyaka (author of अलङ्कारसर्वस्व) the superiority of the उपमान over उपमेय also constitutes this figure. But Mammaṭa refutes this view. (See काव्यप्रकाश X. 159). Viśvanātha accepts it, but Jagannātha refutes it.

For similar idea, compare—"क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा । क्षमा वशीकृतिर्लोके क्षमया किं न सिध्यति" ॥

The Yādavas will not always bow to Duryodhana, leaving us ever inclined to bow down to them.

प्रणतिप्रवणान् विहाय नः
सहजस्नेहनिबद्धचेतसः ।
प्रणमन्ति सदा सुयोधनं
प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

Prose—सहजस्नेहनिबद्धचेतसः मानभृतां प्रथमे वृष्णयः प्रणतिप्रवणान् नः विहाय सुयोधनं सदा न प्रणमन्ति ।

Beng.—অকৃত্রিম স্নেহদ্বারা আমাদিগের প্রতি দৃঢ়বদ্ধচিত্ত, মানীদিগের অগ্রগণ্য বৃষ্ণিগণ প্রণামপর আমাদিগকে পরিত্যাগ করিয়া কথনই দুর্য্যোধনের অনুসরণ করিবে না।

Eng. Equiv.—प्रणतिप्रवणान्—ever ready to bow down to them. विहाय—leaving. नः—us. सहजस्नेहनिबद्धचेतसः—bound to us by natural ties of affection. प्रणमन्ति—bow. सदा—permanently. सुयोधनं—Suyodhana. प्रथमे—foremost. मानभृतां—who are possessed of self-respect. वृष्णयः—Yādavas, Vṛṣṇis.

Eng.—The Vṛṣṇis, foremost among those who are possessed of self-respect and bound to us by natural ties of affection, will not permanently bow to Suyodhana, leaving us who are ever ready to bow down to them.

Expl.—If you think that Duryodhana will win over to his side all the kings, if we neglect him through forgiveness—then you are wrong. Take for example, the Yādavas. They are proud of their race and it is the nature of proud men that they cannot brook the superiority of others. So these Yādavas now bow down to Duryodhana; but they do not like him in their heart of hearts. On the other hand, there is a natural tie of affection between us and them; they know that unlike Duryodhana we are ever ready to bow down to them. So the time is not far off when they will revolt against Duryodhana and side with us And once they revolt everything will be easy for us.

Malli.—ननु तितिक्षया कालक्षेपे दुर्योधनः सर्वान् राज्ञो वशीकुर्यादित्यत्राह—प्रणतीति । सहजस्नेहनिबद्धचेतसः सहजस्नेहेन अकृत्रिमप्रेम्णा निबद्धचेतसोऽस्मासु गाढं लग्नचित्ताः । सुयोधने तु न तथेति भावः । किञ्च मानभृताम् अहङ्कारिणां प्रथमे अग्रेसराः, सुयोधनस्यापीति भावः । वृष्णयः यादवाः प्रणतिप्रवणान् प्रणामपरान् । सुयोधनस्तु न तथेति भावः । नः अस्मान् विहाय सुयोधनं सदा न प्रणमन्ति न नमन्ति नानुसरन्ति । किन्तु कार्यकाले त्यक्ष्यन्ति एव

इत्यर्थः। सति यादवविग्रहे न किञ्चित् अस्माकम् असाध्यं भवेदिति भावः। अनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः।

Notes on Malli.—(1) ननु... .....आह—If we waste time through forgiveness, then Duryodhana will win over to his side all the kings —apprehending this he says.

(2) किन्तु कार्यकाले.........भावः—The sense is that they will desert him in times of need; and once the Yādavas revolt, nothing will be impossible for us.

Extracts from other Commentaries—"नन्वक्षमाया दोषवत्त्वं क्षमाया गुणवत्त्वं चोक्तमस्तीव, किं तु अस्मासु वनवासनिरतेषु यदुपाञ्चालादयोऽस्मत्सुहृदः सर्व एव धार्तराष्ट्रं समाजमाश्रयेरन् इत्याशङ्क्याह—प्रणतीत्यादिना।......यद्यपि वृष्णीनां कार्यवशेन कुरुराजसुतं प्रति कदाचित् प्रणतिः स्यात्, तथापि सा न शाश्वतीति भावः।......सहजप्रेमनिबद्धचेतसः। एतत् पदं न इति वृष्णय इत्यनयोर्विशेष्ययोर्विशेषणत्वेन आवृत्त्या योजनीयम्। अर्थौचित्यं शब्दैकरूपता चावृत्तिकल्पने हेतुः। तेन वृष्णयः पाण्डवाश्च नैसर्गिकस्नेहातिशययुक्ता इत्यर्थः सिध्यति।...... नैसर्गिकस्नेहगौरवमानवशा अस्मदुत्थानप्रतीक्षिणो वृष्णयः सम्प्रति सुयोधनेन स्वयं न विगृह्णन्तीत्ये-तावता तेषां तस्मिन् प्रणामपक्षपातो वा न शङ्कनीय इति भावः।"—चित्रभानुः।

Notes—प्रणतिप्रवणान्—Adj. to नः। प्रणतौ प्रवणाः (सुप्सुपेति); ready to salute. प्र – नम् + क्तिन् भावे = प्रणतिः। प्रु (गतौ) + ल्युट् = प्रवणः "प्रवणः क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे" इत्यमरः। This explains why the Yādavas will side with Yudhiṣṭhira.

विहाय – वि – हा + ल्यप्। Leaving.

नः—Obj. to विहाय। Diminutive form of अस्मद्; अस्मान्।

सहजस्नेहनिबद्धचेतसः—Adj. to वृष्णयः। सहजः स्नेहः (कर्मधा); natural affection सहजस्नेहेन निबद्धम् (तृतीयातत्); सहजस्नेहनिबद्धं चेतः येषां ते (बहुव्रीहि)। Whose hearts are tied by natural affection. The word may also be taken as an adjective to नः। See Chitrabhānu. Malli takes it as an adjective to वृष्णयः। सह जायते इति उपपदसमासे सह + जन् + ड कर्तरि = सहजः। स्निह + घञ् = स्नेहः। नि – बन्ध + क्त कर्मणि = निबद्धम्।

प्रणमन्ति—Nom. वृष्णय: । प्र – नम् + लट्, अन्ति ; bow down. The dental न is changed into cerebral ण by the rule "उपसर्गादसमासेऽपि णोपदेशस्य" :

सदा—अव्यय । Adverb to प्रणमन्ति । Always. सर्व – ङि + दा (स्वार्थे) by the rule "सर्वैकान्यकिंयत्तद: काले दा" । सर्व is replaced by स by the rule "सर्वस्य सोऽन्यतरस्यां दि" ।

सुयोधनम्—Obj. to प्रणमन्ति । सुखेन युध्यते इति सु – युध् + युच् (कर्मणि) by the Vārttika—"भाषाया शासि-युधि-दृशि-धृषि मृषिभ्यो युज् वाच्य:"—one who is fought with ease. Name of Duryodhana. Or, सु सुष्ठु योधनं यस्य स: (बहुव्रीहि) ।

प्रथमे—Adj. to वृष्णय: । Foremost. Alt. form प्रथमा: by the rule "प्रथमचरमतयाल्पार्धकतिपयनेमाश्च" which means that the words प्रथम, चरम, अल्प, अर्ध and words ending with the affix तयप्, become pronouns optionally in nominative plural.

मानभृतां—निर्धारणे षष्ठी । Alt. form मानभृताम् । मानं बिभर्तीति उपपदसमासे मान – भृ + क्विप् कर्तरि ; तेषाम् । Having self-respect ; proud of their race. For the meaning of मान, see Chitrabhānu. St. 13, 19. मन + घञ् भावे = मान: ।

वृष्णय:—Nom. to प्रणमन्ति । The Yādavas. वृष्णि, the ancestor of Kṛṣṇa, was the head of the hundred sons of Madhu. वृष्णे: गोत्रापत्यानि पुमांस: इति वृष्णि + अण् The affix अण is dropped by the rule—"तद्राजस्य बहुषु तेनैवास्त्रियाम्" । Descendants of वृष्णि by लक्षणा (transference of epithets) cf.—"रघूणामन्वयं वक्ष्ये, निरुध्यमाना यदुभि: कथञ्चित् इति तु रघुयदुशब्दयो: तदपत्ये लक्षणया" (Bhaṭṭoji). Also "लक्षणयेत्यस्य रघुत्वाद्यारोपेणेत्यर्थ: । एवञ्च रघुत्वेनैव ततो बोध: इति नासाधुता, तत्सम्बन्ध्यपत्यमित्यर्थे तु असाधुतैवेति स्पष्टं "परस्य पुंयोगादसूत्रे भाष्ये" (लघुशब्देन्दुशेखर p. 293). So वृष्णित्वारोपेण वृष्णे: अपत्यानि वृष्णय इति साधु: ।

Ch. of Voice—......सहजस्नेहनिबद्धचेतोभि: प्रणम्यते......सुयोधन: प्रथमै:... वृष्णिभि: ।

Remark—The figure of speech in this verse is काव्यलिङ्ग (for

def., see St. 5). Here the sense of the words प्रणतिप्रवणान्, सहजन्नेह-निबद्धचेतसः and मानभृतां प्रथमे has been stated as the cause of not saluting Duryodhana.

The friends and relatives of the Yādavas serve Duryodhana only to gain their ends.

सुहृदः सहजास्तथेतरे
मतमेषां न विलङ्घयन्ति ये ।
विनयादिव यापयन्ति ते
धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

Prose—एषां (वृष्णीनां) ये सहजा सुहृदः तथा इतरे मतं न विलङ्घयन्ति, ते आत्मसिद्धये धृतराष्ट्रात्मजं विनयादिव यापयन्ति ।

Beng.—যাঁহারা এই যদুবংশীয়দিগের মতানুযায়ী হইয়া আছেন, ইঁহাদিগের সেই সকল সহজ ও কৃত্রিম মিত্রেরা এক্ষণে স্বকার্য্যসাধনের নিমিত্ত দুর্য্যোধনের নিকট যেন অনুকূলভাবে কালাতিপাত করিতেছেন ।

Eng. Equiv.—सुहृदः—friends. सहजाः—natural. तथा—and. इतरे—others. मतम्—wish. एषां—their. विलङ्घयन्ति—go contrary to. ये—those. विनयात्—in submission. इव—as if. यापयन्ति—follow. धृतराष्ट्रात्मजम्—son of Dhṛtarāṣṭra—Duryodhana. आत्मसिद्धये—for their private ends.

Eng.—Their (Vṛṣṇis') natural friends and those others who never go contrary to their wishes, follow the son of Dhṛtarāṣṭra—Duryodhana, as if in submission for their private ends.

Expl.—The relatives and friends of the Yādavas (Vṛṣṇis) are not pleased with Duryodhana. Now they submit to Duryodhana only to gain their private ends. On the other hand, they never go contrary to the wishes of the Yadavas, simply because they are their near relatives. Hence they will never leave the side of the Yādavas. And when the Yādavas revolt against Duryodhana they are sure to join their standard.

Malli.—किञ्च कारणान्तरमाह—सुहृद इति । किञ्च एषां वृष्णीनां ये सहजाः सहजाताः मातृपितृपक्षा इत्यर्थः । "अन्येष्वपि दृश्यते" इति ड-प्रत्ययः । सुहृदः मित्राणि, तथा इतरे

कृत्रिमसुहृदश्च एषां मतं वृष्णिपक्षं न विलङ्घयन्ति न अतिक्रामन्ति। ते इयेऽपि नृपाः दुर्योधनोपजीविनोऽपीति भावः। आत्मसिद्धये आत्मजीवनार्थं धृतराष्ट्रात्मजं दुर्योधनं विनयात् आनुकूल्यात् इव यापयन्ति कालं गमयन्ति: कार्यकाले तु वृष्णिपक्षप्रवेशिन एव इत्यर्थः। यातेर्ण्यन्ताल्लट्। "अर्तिह्री—" इत्यादिना पुगागमः।

Extracts from other Commentaries—"ननु समुद्रकुक्षिसंश्रयाः सघातवृत्तयो मानिनः वृष्णयः कामं सुयोधनं न समर्थयेरन्, अन्ये तु मातृस्वकेकयादयोऽस्मत्सुहृदः सम्राजं कुरुपतिमवश्यमाश्रयन्ते इत्याशङ्क्याह—सुहृद इत्यादिना।... ..आरोपितेन विनयेन कथं कुरुराजो वशीक्रियते इति शङ्का धृतराष्ट्रात्मजपदेन निरस्यते। जात्यन्धः सन् आम्बिकेयो भीष्मादिकृतया गुप्त्या धृते राष्ट्रे जानेन मया धृतं राष्ट्रमित्यमन्यत। ततः तदात्मजः स्वबाहुबलेनाविजितानपि नृपतीन् प्रणतिप्रकाशनमात्रेण विनीतवदवभासमानान् विजितात्मवशानेव मन्येत इत्यभिप्रायः।......आत्मसिद्धय इति। सघातसम्बन्धान्निषा सिद्धयः सघातमात्रापेक्षा इति तदर्थं ते सम्राजमपि सुयोधनं नापेक्षन्ते। एकैकसम्बन्धात् प्रातिस्विकप्रयत्नसाध्याः सिद्धयः सम्राजः प्रसादं विना दुर्लभा इति तदर्थमेव ते कुरुराजसुताय सुयोधनाय विनयं प्रकाशयन्तीति द्योतयितुम् आत्मसिद्धय इत्युक्तं, न सिद्धय इत्येव"।—चित्रभानुः।

Notes—सुहृदः—Nom. to विलङ्घयन्ति। Friends. सु शोभनं हृदयं यस्य (बहुव्रीहि)। हृदय becomes हृद् when compounded with सु and दुर् in the sense of a 'friend' and 'enemy' respectively. The rule is "सुहृद्दुर्हृदौ मित्रामित्रयोः"।

सहजाः—Adj to सुहृदः। सह जायन्ते इति उपपदसमासे सह – जन + ड कर्तरि = सहजाः; natural (by birth) i. e., belonging to the mother's and the father's line. Māgha in his Śiśupālavadha notices three kinds of friends and enemies ; cf "सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः। स्याताममित्रौ मित्रे च सहजप्राकृतावपि" ॥ (II. 36). Thus a friend is of three kinds—(1) कृत्रिमः (क्रियया उपकाररूपया निर्वृत्तः)—a friend by conduct ; (2) सहजः (सहजं मित्रं मातृष्वसेय-पितृष्वसेयादिः)—natural (by birth)—as here ; (3) प्राकृतः (विषयान्तरः प्राकृतः शत्रुः, तदनन्तरः प्राकृतं मित्रम्)—"a natural ally i. e., a ruler whose dominions lie immediately beyond those of the natural enemy" (Apte). Similarly, enemy is also of three kinds—(1) कृत्रिमः (क्रियया अपकाररूपया निर्वृत्तः)—enemy by conduct ; (2) सहजः

(सहजशत्रुस्तु पितृव्यतत्पुत्रादिः) natural (by birth) e. g , uncle and his sons etc. ; (3) प्राकृतः (विषयान्तरः प्राकृतः शत्रुः)—"natural enemy i. e., the ruler of an adjacent country" (Apte).—See Malli on S'iśu II. 36. Vide, Arthaśāstra of Kauṭīlya (VI. 2), for fuller discussions.

तथा—अव्यय ; and or so. Cf. "इतरे सहजाः सुहृदः तथा धृतराष्ट्रात्मजं विनयादिव यापयन्ति, यथा तृणाय इति शेषः" (चित्रभानुः) ।

इतरे—Pronoun. Nom. to विलङ्घयन्ति ; refers to कृत्रिमसुहृदः, friends by conduct. See सहजाः ।

मतम्—Obj. to विलङ्घयन्ति । मन् + नपुंसके भावे क्त ; opinion, wishes.

एषाम्—शेषे षष्ठी । Of these (Vṛṣṇis), or सहजानां सुहृदाम् ।

विलङ्घयन्ति—Disobey, go against ; वि—लङ्घ् + णिच् + लट् अन्ति । Nom. सुहृदः and इतरे ।

विनयात्—(विनयमाश्रित्य) ५मी by the rule "ल्यब्लोपे कर्मण्यधिकरणे च" । वि—नी + अच् भावे = विनयः । "विनयो लोकमर्यादाशास्त्रार्थानतिलङ्घनम्" । Chitrabhānu parses it as हेतौ पञ्चमी ।

इव—अव्यय । "इवशब्दो विनयस्य अपरमार्थतां द्योतयति ; अपारमार्थिकात् आरोपितात् विनयात् इत्यर्थः"—चित्रभानुः ।

यापयन्ति—Nom. ते । या + णिच् + लट् अन्ति । The पुक् comes by the rule "अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुक् णौ" = यापयन्ति, follow. The real sense is 'allow him to pass (his days)'. Cf. "Duryodhana goes on the supposition that they are attached to him ; and they allow him to pass his days on that supposition" (Prof. Kāle). "यापयतिर्विकारनिवारणे वर्तते । यापयन्ति ईर्ष्यारोपादिविकारेभ्यः निवर्तयन्ति, शमयन्ति, वशीकुर्वन्तीत्यर्थः"—चित्रभानुः ।

धृतराष्ट्रात्मजम्—Obj. to यापयन्ति । Here the nominative in the non-causal takes द्वितीया in connection with the intransitive verb यापयन्ति । The rule is "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ" । Here यापयन्ति means कालं गमयन्ति ; hence धात्वर्थसंगृहीतत्वादकर्मकः i. e., intransitive in form but transitive in sense. Cf. "धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया" ॥ धृतराष्ट्रस्य आत्मजः (षष्ठीतत्) तम् । Duryodhana.

आत्मसिद्धये—(आत्मसिद्धिं लब्धुम्) ; ४र्थी by the rule "क्रियार्थोपपदस्य च कर्मणि स्थानिन:" । आत्मन: सिद्धि: (षष्ठीतत्) तस्यै । To gain their ends.

Ch. of Voice.—सुहृद्भि: सहजै:......इतरै:......विलङ्घ्यते यै:......याप्यते तै: धृतराष्ट्रात्मज:...... ।

A timely attack will detach these kings from Duryodhana.

अभियोग इमान् महीभुजो
भवता तस्य क्रत: क्रतावधे:[1] ।
प्रविघाटयिता समुत्पतन्
हरिदश्व: कमलाकरानिव ॥ ४६ ॥

Prose—क्रतावधे: तस्य भवता क्रत: अभियोग: इमान् महीभुज: हरिदश्व: कमलाकरान् इव समुत्पतन् प्रविघाटयिता ।

Beng.—দুর্যোধন আমাদের সহিত একটি সর্ত্ত স্থাপন করিয়াছে ; তাহা পালন করিয়া তুমি যদি আক্রমণ কর, তাহা হইলে সূর্য্য যেরূপ উদিত হইয়া কমলাকরকে ভেদ করিয়া থাকে, সেইরূপ তোমারও আক্রমণ এই সকল নৃপতিকে ভেদগ্রস্ত করিবে।

Eng. Equiv.—अभियोग:—fresh attack. इमान्—these. महीभुज:—kings. भवता—by you. तस्य—on him. क्रत:—made. क्रतावधे:—who has given a time-limit. प्रविघाटयिता—separate, alienate. समुत्पतन्—just on rising. हरिदश्व:—sun. कमलाकरान्—the lotuses. इव—as.

Eng.—A fresh attack on him who has given a time-limit, by you, will at the very outset alienate these kings (from one another), as does the sun the (petals of) lotuses just on rising.

Expl.—Duryodhana has set down a time-limit. If before the stipulated time you make an attack on him that may detach these kings and their partisans from us. Because, in that case we shall be guilty of the breach of contract. While, on the other hand, if we attack him after the expiry of the term, that will separate these allied kings from Duryodhana and we shall gain their sympathy.

1. घतावधे:—पाठान्तरम् ।

Just as the sun, after rising, separates (i. e., unfolds) the petals of the lotuses from one another.

Malli.—(किञ्च नायमभियोगकाल इत्याशयेनाह—अभियोग इति। कृतावधेः परिभाषितकालस्य। "अवधिस्त्ववधाने स्यात् सीम्नि काले बिलेऽपि च" इति विश्वः। तस्य सुयोधनस्य, कर्मणि षष्ठी। भवता कृतः अवधितः इति शेषः। अभियोग आर्द्राभिभव इति यावत्। "अभियोगस्तु शपथे स्यादार्द्रे च पराभवे" इति विश्वः। इमान् पूर्वोक्तान् महीभुजः राज्ञः हरिदश्वः उष्णरश्मिः कमलाकरानिव समुत्पतन् उद्यन् एव प्रविघाटयिता भेत्स्यति। घाटयतेः चौरादिकात् लुट्। भौवादिकस्य तु "मिता ह्रस्वः" इति ह्रस्वत्वं स्यात्।)

Notes on Malli.—(1) किञ्च....... आह—Now he says with the intention that now is not the time for attack.

(2) अवधितः इति शेषः—Almost all the editions read here as अवधिमनपेक्ष्य इति शेषः। But as Prof. Kāle rightly observes that of these two —अवधितः (which is found in the new edition of the Nirṇayasāgara Press) is undoubtedly a better reading. अवधिमनपेक्ष्य will give the following meaning —"If you lead an attack against Duryodhana without waiting for the expiry of the time agreed upon, your action will have no justification and will alienate the sympathy of the Yādavas and their friends from us"—(Prof. Kāle). "But then the simile becomes inappropriate. The sun rises at stated times (not before the expiry of the night)" (Prof. Kāle). But the reading अवधितः gives a better meaning thus—"If you take hostile action against Duryodhana having waited for, i. e., at the end of the stipulated time, it will make the Yādavas and their allies break from their apparent allegiance to Duryodhana's party" (Kāle). [A reference to the next verse also would support Kale's interpretation ; for it speaks of the possible future alienation of Duryodhana's allies from him.]. Chitrabhānu, however, is at great pains to endorse the former explanation, as will be evident from the following extracts.

Extracts from other Commentaries—"ननु यदुपञ्चालादयोऽस्मत्-सुहृदोऽस्मदनुरक्ततरा यदि सुयोधनस्य वशं न गच्छन्ति, तर्हि त्वरितमेवास्माभिः सुयोधनं प्रत्यभियोगः कर्तव्य इति शङ्कायामाह—अभियोग इत्यादिना ।......भवता कल्पितं निरस्तसमयम् अधर्म्यं कुरुकुलकदनीयमं निशम्य क्रमेण तद्वार्तायाः वास्तवविषयतां प्रतीत्य धार्मिकग्रगण्या गुरुमतयस्ते नरपतयो धर्मपथच्युतानस्मान् निश्चित्य पश्चात् औदासीन्यरूपम् अस्मत्तो विश्लेषं गमिष्यन्तीत्ययमर्थोऽनद्यतनभविष्यद्विषयेण लुट प्रत्ययेन द्योत्यते ।..... यथा जलनिधिनिगूढः अर्कः जवनतरैः हरिद्भिः अश्वैः वाह्यमानः क्षणेनैव निखिलनैवपदवीमवतरति तथा भवदाशयनिगूढोऽयं सुयोधनाभियोगो जनवक्त्रपरम्पराभिर्वाह्यमानः क्षणेनैव निखिलश्रीवपदवीमवतरति इत्यमुमर्थं द्योतयितुं हरिदश्वः इत्युक्तं, नाहिमांशुरित्यादि ।......रश्मिसम्बन्धद्वारका हरिदश्वस्य कमलाकरैः सम्बन्धो रजन्या व्यवधीयते । अभियोगस्य श्रवणस्मरणद्वारकौ नराधिपैः सम्बन्धस्तु केनापि न व्यवधीयते इति हरिदश्वादभियोगस्य व्यतिरेकं व्यञ्जयितुं रूपकमनादृत्य उपमा उपन्यस्ता"—चित्रभानुः ।

But, however much Chitrabhānu may try to show that the simile is not accurately parallel in all respects, we cannot but regard his attempt as merely a piece of ingenious interpretation—not much convincing.

Notes—अभियोगः—Nom. to प्रविघाटयिता । अभि – युज् + घञ् भावे = अभियोग ; a fresh attack (आक्रमणम्) ।

इमान्—Pronoun. Adj. to महीभुजः । These.

महीभुजः—Obj. to प्रविघाटयिता । महीं भुनक्ति पालयति इति उपपदसमासेमही – भुज् + क्विप् (कर्तरि) = महीभुज् ; तान् । Kings.

भवता—अनुक्ते कर्तरि तृतीया । भा + डवतु = भवत् ; तेन ।

तस्य—कृद्योगे कर्मणि षष्ठी । तम् अभियुनक्ति (तिङन्त) । Refers to Duryodhana.

कृतः—Adj. to अभियोगः । कृ + क्त कर्मणि । Made (after the expiry of the term). See notes on Malli (2).

कृतावधेः—Adj. to तस्य । कृतः अवधिः येन तस्य (बहुव्रीहि) who has set down a time-limit (i. e., 12 years in forest and 1 year incognito). अव – धा + कि करणे = अवधिः । Limit (of time) "परिच्छेदे बिलेऽवधिः" इत्यमरः ।

प्रविघाटयिता—Nom. अभियोगः and हरिदश्वः। प्र–वि–घट् (चुरादि, संघाते) + णिच् + लुट् ता। That which separates. Here घट is not of the भ्वादि class; because in that case the form will be घटयति in णिच by the rule "मितां ह्रस्वः"। घट (भ्वादि) is a मित् root; cf. "कथं तर्हि 'कमलवनोद्घाटनं कुर्वते ये' 'प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिवे'त्यादि। शृणु, घट संघात इति चौरादिकस्येदम्" (Bhaṭṭoji).

समुत्पतन्—Adj. to अभियोगः and हरिदश्वः। सम्–उत्–पत्+शतृ, १मा १वचन; at the outset, on rising.

हरिदश्वः—Nom. to प्रविघाटयिता। हरितः अश्वाः यस्य सः (बहुव्रीहि) = हरिदश्वः sun. हरितः are the horses of the sun while हरयः are the horses of इन्द्र —cf. "हरी इन्द्रस्य, हरितः आदित्यस्य" (निघण्टु I. 15). The horses of the sun are of green colour—cf.—"हारीतहरितवाजिनि" (कादम्बरी)। Cf. "दिशो हरिद्भिर्हरितामिवेश्वरः" Raghu III. 30. For significance of this word, see extracts from Chitrabhānu.

कमलाकरान्—Obj. to प्रविघाटयिता। कमलस्य आकराः (षष्ठीतत्) तान्; groups of lotuses. आ–कृ or कृ+घ by the rule "पुंसि संज्ञायां घः प्रायेण" = आकराः, groups. Cf. "आकरशब्दः समूहार्थः प्रभवार्थो वा। तेन पद्मसमूहाः, पद्मोत्पत्तिस्थानानि सरांसि वोच्यन्ते। अवयवानां दलानां विश्लेषणम् अवयविषु कमलाकरेषु उपचर्यते"—चित्रभानुः।

Ch. of Voice—अभियोगेन इमे महीभुजः... कृतेन प्रविघाटयितारः समुत्पतता हरिदश्वेन कमलाकरा इव।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here attack is compared with the Sun and kings with groups of lotuses. The particle इव indicates the comparison. Chitrabhānu discovers व्यतिरेक as the implied figure. See Extracts.

The kings insulted by the proud Duryodhana will embrace our cause.

उपजापसहान् विलङ्घयन्
स विधाता नृपतीन् मदोद्धतः।
सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥ ४७ ॥

Prose—मदोद्धत: स नृपतीन् विलङ्घयन् उपजापसहान् विधाता। जन: अपि अध:क्रियां न सहते, लोकाधिकधाम राजकं किम्।

Beng.—গর্ব্বিত দুর্য্যোধন অবমাননা করিয়া অন্যান্য নৃপতিগণকে ভেদযোগ্য করিয়া রাখিবে। লোকোত্তর-প্রতাপশালী মহীপালগণের কথা কি, সামান্য লোকেও অপমান সহ্য করিতে পারে না।

Eng. Equiv.—उपजापसहान्—capable of being split. विलङ्घयन्—insulting. विधाता—will make. नृपतीन्—kings. मदोद्धत:—inflated with pride. सहते—pockets. जन:—common people. अपि—even. अध:क्रियां insult. किम्—how can. लोकाधिकधाम—possessed of extra-ordinary prowess. राजकम्—princes.

Eng.—Inflated with pride, Duryodhana will insult other kings and will make them capable of being split Even common people do not pocket insults ; how can princes, possessed of extra-ordinary prowess, put up with (them).

Expl.—Rest assured that some day Duryodhana will meet his doom. His haughty nature will not allow him long to maintain his feigned courtesy. Sooner or later, he will insult the kings now his partisans ; and this will detach them from him and drive them to embrace our cause. Because the angry, greedy and the insulted can be easily detached. And surely the kings will not pocket insults simply because even the most ordinary man cannot brook even the slightest affont. Even the dust struck by the feet, rises up as a mark of protest—what to speak of men who are gifted with uncommon power !

Malli.—अथ न ये वृष्णिपक्षास्तान् प्रत्याह—उपजापेति। मदोद्धत: स: दुर्योधन: नृपतीन् अन्यान् नृपान् विलङ्घयन् मदात् अवमानयन्। उपजापसहान्. सहन्ते इति सहा:, पचाद्यच्। उपजापस्य सहान् भेदयोग्यान्। "समौ भेदोपजापौ" इत्यमर:। विधाता विधास्यति विपूर्वस्य दधातेर्लुट्। अवमानितो जन: सुभेद्य इति भाव:। न च ते सहिष्यन्त इत्याह—जन: प्राकृतोऽपि अध:क्रियाम् अपमानं न सहते। लोकाधिकधाम लोकोत्तरप्रतापं राजकं

राजसमूहः, "गोत्रोक्षोष्ट्र—" इत्यादिना वुञ्-प्रत्ययः। किमु, किमुत सहत इति किं वक्तव्य-मित्यर्थः। तथा सति कृत्स्नमेव राजमण्डलम् अस्मानेव अवलम्बिष्यते इति भावः।)

Notes on Malli.—(1) अथ.........प्रत्याह—Now he speaks of those who do not belong to the party of the Yādavas.

(2) तथा सति.........अवलम्बिष्यते—That being the case, all the kings will take our side.

Extracts from other Commentaries—"ननु तेजस्विनः सहजसुहृदो ये यदुपक्षपातादयोऽस्माकं वनवासारम्भे स्वयमेव सुयोधनं प्रत्यभियोक्तुकामा मानयशोधनैरस्माभिः कथञ्चिन्निवर्तिताः, ते पुनरस्माभिर्व्यवसिते सपत्नाभियोगे परं प्रीयेरन। विमुक्तविक्रमव्यवसायेषु वनस्थेषु तु अस्मासु विप्रकर्षक्रमापचितस्नेहसाराः सम्मानादिविधायिना सुयोधनेन वशीक्रियमाणाः तत्पक्ष्याः स्युरित्याशङ्क्याह—उपजापेत्यादिना।......तेजसा लोकोत्तरत्वं च नराधिपस्य गीतास्वेव गम्यते, "नराणां च नराधिपम्" इति। नराधिपस्य एकैकस्य एव तेजो लोकतेजोऽधिकं, किं पुनः नृपतिसमूहस्य तेज इति द्योतयितुं राजकमित्युक्तं, न राजेत्यादि"—चित्रभानुः।

Notes—उपजापसहान्—Adj. to नृपतीन्। उपजापस्य सहाः (अधीनन्) तान्। Susceptible to dissension. सहन्ते इति सहाः सह् + अच् (पचाद्यच्)। उप उपांशु जपनम् इति उप – जप् + घञ् भावे = उपजापः। उपजाप or भेद is one of the four (acc. to some seven—who add माया, उपेक्षा and इन्द्रजाल) political expedients (उपायs)—साम, दान, भेद and दण्ड। भेद is sowing dissensions in enemy's party and thus winning him over to one's side. भेद is of three kinds cf. "भेदस्त्रिविधः। तदुक्तम्—"स्नेहरागापनयनं संहर्षोत्पादनं तथा। सन्तर्जनं च भेदज्ञैर्भेदस्तु त्रिविधः स्मृतः॥" इति। राज्ञो द्रोहाय शपथपूर्वकम् 'अमीषामेकमत्यं जातम्' इत्यस्यार्थस्य कपटलेखादीनां राजसदसि प्रक्षेपात् राज्ञोऽनुयायिषु स्नेहस्य परिजनानां च प्रभौ भक्तेरपनयनमित्येकः। अनुयायिनामेव परस्पराभिभवसंजननं संहर्षोत्पादनम्—इति द्वितीयः"—(Pandit Sivadatta's notes on अमरकोषः). The persons who may be seduced from allegiance are called भेद्य or कृत्य (cf. "कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः" इत्यमरः). These persons are, क्रुद्धः (angry), लुब्धः (greedy), भीतः (afraid) and अवमानितः (insulted). Here the kings are उपजापसह (or भेद्य), simply because they have been insulted. Hence Malli says "अवमानितो जनः सुभेद्यः"। Cf. "क्रुद्ध-लुब्ध-भीतावमानिता भेद्याः"।

विलङ्घयन्—Adj. to सः। वि—लङ्घ (चुरादि)+शतृ, १मा १वचन। Insulting हेतौ शतृ-प्रत्ययः।

विधाता—Nom. सः। वि—धा+लुट् ता; will make.

नृपतीन्—Obj. to विलङ्घयन् and विधाता। नृणां पतयः (षष्ठीतत्) तान्; kings. The base is declined like मुनि by the rule "पतिः समास एव"।

मदोद्धतः—Adj. to सः। मदेन उद्धतः (तृतीयातत्)। Puffed up with pride. उत्—हन्+क्त कर्तरि=उद्धतः। "मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः" इति विश्वः। Cf. "अभीप्सितप्राप्तिजन्मा कृतार्थता-प्रतीतिहेतुः आत्मादर-परतिरस्कारकारी हर्षविशेषो मदः"—चित्रभानुः।

सहते—Nom. जनः and राजकम। सह्+लट् ते; brooks, tolerates.

जनः—Nom. to सहते। Here means ordinary man.

अधःक्रियाम्—Obj. to सहते। अधः क्रिया (कर्मधा); insult ताम्। "स्वोचिताधिकारात् अर्वाक्पदलम्भनम्"—चित्रभानुः।

किम्—अव्यय; implies impossibility. "किमुशब्दः असम्भावनां द्योतयति" (चित्रभानुः)। "किमुतातिशये प्रश्ने विकल्पे च प्रयुज्यते" इति विश्वः।

लोकाधिकधाम—Adj. to राजकम्। लोकेभ्यः अधिकम् (सुपसुपेति); पञ्चमीतत् acc. to चित्रभानु ("पञ्चमी भयेन" इत्यत्र पञ्चमीति योगविभागात्); लोकाधिकं धाम यस्य तत् (बहुव्रीहि). Possessing uncommon prowess. धा+मनिन्=धामन्—power, तेजः। Cf. "यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः। तस्मादभिभवत्येष सर्वभूतानि तेजसा"॥—Manu VII 5.

राजकम्—Nom. to सहते। राज्ञां समूहः इति राजन्+वुञ् by the rule "गोत्रोक्षोष्ट्रो-रभ्र-राज राजन्य-राजपुत्रवत्समनुष्याजाद् वुञ्"। A collection or group of kings.

Ch. of Voice—उपजापसहाः विलङ्घयता तेन विधातारः नृपतयः मदोद्धतेन...... सह्यते......जनेन......अधःक्रिया......लोकाधिकधाम्ना राजकेन।

Remark—For similar idea, compare—"सद्यः क्रीडारसच्छेदं प्राकृतोऽपि न मर्षयेत्। किं नु लोकाधिकं तेजो बिभ्राणः पृथिवीपतिः"॥ मुद्राराक्षसे IV. 10.

The prosperity of arrogant persons only heightens their insolence.

असमापितकृत्यसम्पदां
हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां
मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

Prose—असमापितकृत्यसम्पदाम् अभिमानशालिनां विभूतयः तावता विनयेन हतवेगं मदम् उत्तम्भयितुं प्रभवन्ति ।

Beng.—অকৃতকার্য্য অহঙ্কারী ব্যক্তিদিগের সম্পদ্ কপট-বিনয়-প্রচ্ছন্ন গর্ব্বভাবকে পরিবর্দ্ধিত করে ।

Eng. Equiv.—असमापितकृत्यसम्पदाम्—who have not achieved their objects. हतवेगं—the violence of which was checked. विनयेन—by humility. तावता—for the time being. प्रभवन्ति—has power. अभिमानशालिनाम् of arrogant persons. मदम्—insolence. उत्तम्भयितुम्—to heighten. विभूतयः—prosperity.

Eng.—The prosperity of arrogant persons, who have not achieved their objects, has power to heighten their insolence, the violence of which was checked by humility for the time being.

Expl.—Prcsperity is the source of pride and insolence. Only the virtuous can maintain their prosperity. The arrogant persons are ever puffed up with prosperity. There are some, however, who feign humility and try to obtain the applause of others ; but ultimately their mask drops off. And this is the case with Duryodhana. He has tried so long to check the violence of his insolence by assumed humility. But his inner nature is always at war with his feigned courtesy and the time will come when his arrogance will burst out in full grandeur.

Malli.—ननु सत्त्वोन्निवर्त्यादिवनेचरोक्त्या तस्य मदसम्भावनापि कथमित्यत्राह—असमापितेति । असमापितकृत्यसम्पदाम् अकृतकृत्यानाम् अत: अभिमानशालिनाम् अहङ्कारिणाम् विभूतयः सम्पद एव तावता स्वल्पेन विनयेन, कार्य्यवशात् आरोपितेनेति शेषः । हतवेगं

प्रतिबद्धवेगं, न तु स्वरूपतो हतं मदम् उत्तम्भयितुम् वर्धयितुं प्रभवन्ति। सर्वथा दुर्जनं सम्पदो विकारयन्ति इति भावः।)

Notes on Malli.—(1) ननु.........आह—Well, from the speech of the forest-ranger like—"as his friends" etc., (in Canto I. 10) it appears that there is no arrogance in him,—to this he says.

N. B. The full stanza is "सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः। स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम्" ॥ (I. 10).

(2) सर्वथा ....भावः—The idea is that prosperity corrupts a wicked man.

Extracts from other Commentaries—"......विनयवता व्यपेतमदेनैव विभूतयो लभ्यन्ते इति कथं विभूतिभिर्मदोत्तम्भनम् इत्याशङ्क्याह—तावता विनयेन हतवेगमिति। ......असमापितकृत्यसम्पदाम्।......क्रियासु अन्तराले विरतानामित्यर्थः। अथवा कृत्यशब्देन क्रुद्धलुब्धादयो भेद्या विवक्ष्यन्ते। सम्पच्छब्दः समूहार्थे पर्यवस्यति। क्रुद्धादीनां कृत्यवर्गाणां क्रोधादिदोषापनयनेन आत्मनः संश्लेषणं समापनम्, तदकृतवतामित्यर्थः। कृत्यसम्पदसमापने हेतुरभिमानशालित्वम्।......ननु "कृतारिषड्वर्गजयेन" इत्यादिना "स वेद निःशेषमशेषितक्रियः" इत्यन्तेन च चरवाक्येन सुयोधनस्य विनयप्रकर्षः कृत्यसम्पत्समापकत्वं च प्रतीयते, तत् कथमनेन श्लोकेन तद्विपरीतः अर्थः प्रतिपाद्यते इति चेदुच्यते—पौरजानपदेषु अननुकूलेषु तदानुकूल्य-सम्पादनाय सुयोधनेन प्रयत्नसम्पादितं विनयं कृत्यसमापनं च पश्यतः चरस्य तद्वचनम्, तेषु पुनः अनुकूलेषु विजृम्भितविभूतेः मानिनः तस्य भविष्यन्मदविजृम्भणमुत्पश्यतः युधिष्ठिरस्य इदं वचनम् इति न विरोधः"—चित्रभानुः।

Notes—असमापितकृत्यसम्पदाम्—Adj. to जनानाम् understood. न समापिताः (नञ्तत्) = असमापिताः। कृत्यानां सम्पदः (षष्ठीतत्) = कृत्यसम्पदः। असमापिताः कृत्यसम्पदः यैः तेषाम् (बहुव्रीहि)। Who have not achieved their purpose सम् — आप् + णिच् + क्त कर्मणि, स्त्रियाम् = समापिताः। कृ + क्यप् = कृत्यम्।

हतवेगम्—Adj. to मदम्। हतः वेगः यस्य तम् (बहुव्रीहि)। Whose violence has been checked (but not destroyed). हन् + क्त कर्मणि = हतः। विज् (भयचलनयोः) + घञ् भावे = वेगः।

विनयेन—अनुक्ते कर्तरि तृतीया। By humility. "विनयो लोकमर्यादाशास्त्रार्थानतिलङ्घनम्" (भावप्रकाश)। विनय is grammatically connected with इतवेगम्; but it has been separated on the authority of the dictum—"सापेक्षत्वेऽपि गमकत्वात् समासः"।

तावता—Adj. to विनयेन। तत् परिमाणमस्य इति तद्+वतुप्=तावान्, तेन। With that much limit i. e., little, for the time being. Cf. "तावतेति यत्परिमाणेन विनयेन विभूत्यादयः तत्परिमाणेन इत्यर्थः"—चित्रभानुः।

प्रभवन्ति—Nom. विभूतयः। प्र-भू+लट् अन्ति। Has power.

अभिमानशालिनाम्—Adj. to जनानाम् understood. अभिमानेन शालन्ते इति उपपदसमासे अभिमान-शाल+णिनि, कर्तरि=अभिमानशालिनः arrogant, तेषाम्। अभि-मन्+घञ् भावे=अभिमानः।

मदम—Obj. to उत्तम्भयितुम्। मद्+अप् भावे by the rule "मदोऽनुपसर्गे" =मदः, insolence, pride.

उत्तम्भयितुम—उद्-स्तम्भ+णिच+तुमुन्। The स of स्तम्भ takes पूर्वसवर्ण by the rule "उदः स्था-स्तम्भोः पूर्वस्य"। To raise up, heighten.

विभूतयः—Nom. to प्रभवन्ति। वि-भू+क्तिन् भावे=विभूतिः, prosperity, ताः।

Ch. of Voice—......विभूतिभिः......प्रभूयते।

Pride brings impudence which creates unpopularity.

मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढ़ता।
अतिमूढ़ उदस्यते नयात्
नयहीनादपरज्यते जनः॥ ४९॥

Prose—मदमानसमुद्धतं नृपं मूढ़ता नियमेन न वियुङ्क्ते, अतिमूढ़ः नयात् उदस्यते, नयहीनात् जनः अपरज्यते।

Beng.—দর্প ও অহঙ্কারে উদ্ধত নৃপকে কার্য্য-বিমূঢ়তা কখনই ত্যাগ করে না; কর্ত্তব্য-বিমূঢ় নীতিপথ হইতে ভ্রষ্ট হয় এবং নীতিপথ-ভ্রষ্টের প্রতি লোকের অনুরাগ থাকে না।

Eng. Equiv.—मदमानसमुद्धतं—inflated by insolence and pride.

नृपं—king. न वियुङ्क्ते—is never left by. नियमेन—as a rule. मूढ़ता—imprudence. अतिमूढ़:—who is extremely imprudent. उदस्यते—swerves. नयात्—from the right path. नयहीनात—who swerves from the right path. अपरज्यते—is disliked by. जन:—people.

Eng.—The king, who is inflated by insolence and pride is never, as a rule, left by imprudence ; he who is extremely imprudent swerves from the right path ; and he who swerves from the right path is disliked by the people.

Expl.—Pride makes a man blind. The haughty man is ever at a loss to distinguish between the right and the wrong. He always falters in the confusion of what ought and ought not to be done. The imprudent man invariably selects the wrong path, and he who follows the wrong policy inevitably brings misrule and thereby earns the dislike of the people ; and what remains for that king who is not liked by any one of his subjects ?

Malli.—अथ मदस्य अनर्थहेतुतां युग्मेनाह—मदेति, अपरागीति च। मदमानसमुद्धतं, मदमानाभ्यां दर्पाहङ्काराभ्यां समुद्धतं नृपं, मूढता कार्य्यापरिज्ञानं नियमेन अवश्यं न वियुङ्क्ते न विमुञ्चति। अतिमूढ: नयात् नीतिमार्गात् उदस्यते उतक्षिप्यते। कर्मकर्तरि लट्। नयहीनात् जन: लोक: अपरज्यते अपरक्तो भवति। "स्वरितञित:—" इत्यादिना आत्मनेपदम्।

Notes on Malli.—(1) अथ.........आह—Now, he speaks of insolence as the cause of troubles in a couple of stanzas forming one grammatical sentence (युग्मम)—cf. "द्वाभ्यां तु युग्मकं प्रोक्तं त्रिभि: स्यात्तु विशेषकम्। कलापकं चतुर्भि: स्यात्तदूर्ध्वं कुलकं स्मृतम्" ॥ Sāhityadarpaṇa, however, reads—"द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते। कलापकं चतुर्भिश्च पञ्चभि: कुलकं मतम्" ॥ (VI. 288). Acc. to Chitrabhānu there is no युग्मक।

Extracts from other Commentaries—"ननु विभूतिलाभसम्भवो मद: शत्रुपारंभवकृतमानश्च सुयोधनस्य काममाविर्भवतु। तावता तस्य प्रभावच्युतिकरी का क्षतिरित्याशङ्क्याह—मदमानेत्यादिना।......मूढ़तया नियन्त्रितो नृप: परतन्त्र: कदाचिदपि तां रहयितुं न शक्नोतीति नृपकर्तृकस्य रहणस्य न प्राप्ति:। मूढ़ता तु स्वतन्त्रा स्वनियन्त्रितं नृपं रहयितुमपि

शक्नोति, किन्तु स्वनियम्यताद्दश्यपुरुषान्तरादर्शनात् तं न रहयतीति द्योतयितुं मूढ़ता न नृपं वियुङ्क्ते इत्युक्तं, न तु नृपो मूढ़तां न वियुङ्क्त इति"—चित्रभानुः।

Notes—मदमानसमुद्धतम्—Adj. to नृपम्। मदश्च मानश्च (द्वन्द्व) = मदमानौ। ताभ्यां समुद्धतः (तृतीयातत्)। Inflated by insolence and pride. सम्—उत्—हन्+क्त कर्मणि = समुद्धतः। For derivation of मदः, see St. 48.

नृपम्—Obj. to वियुङ्क्ते। नॄन् पाति इति उपपदसमासे नृ—पा+क कर्तरि = नृपः; king.

वियुङ्क्ते—Nom. मूढ़ता। वि—युज्+लट् ते। Forsakes. The आत्मनेपद is by the Vārttika "स्वराद्यन्तोपसर्गादिति वक्तव्यम्" which means that युज् takes आत्मनेपद when it is preceded by any उपसर्ग beginning or ending with a vowel.

नियमेन—प्रकृत्यादित्वात् तृतीया। As a rule. नि—यम्+अप् by the rule "यमः समुपनिविषु च" = नियमः।

मूढ़ता—Nom. to वियुङ्क्ते। मुह् (वैचित्त्ये)+क्त = मूढः or मुग्धः, तस्य भावः इति मूढ+तल् स्त्रियाम् मूढ़ता। Imprudence, folly. (विचित्तता)।

अतिमूढः—कर्मकर्ता of उदस्यते। अतिशयेन मूढः (प्रादितत्); extremely imprudent.

उदस्यते—उद्—अस् (क्षेपे)+लट् ते कर्मकर्तरि (पृथक्करणस्य सौकर्यविवक्षया)। When, in order to express the notion of the extreme facility of the action of the verb, it is not desired to express the operation of the subject, and the object is used as the subject, the voice is known as कर्मकर्तृ ("कर्मवत् कर्मणा तुल्यक्रियः") cf. "क्रियमाणन्तु यत् कर्म स्वयमेव प्रसिध्यति। सुकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद्विदुः" ॥ (हरिकारिका)। Falls off.

नयात्—अपादाने ५मी। For derivation, see St. 3. From the right path. "बुद्धिकर्तृकावगमरूपयोः उदसनापरञ्जनक्रिययोः अवधेः नयस्य नयहीनन्नृपस्य च अविकृतत्वात् अपादानत्वम्" (चित्रभानुः)।

नयहीनात्—नयहीनं प्राप्य। ५मी by the rule "ल्यब्लोपे कर्मण्यधिकरणे च" (acc. to चित्रभानु, अपादाने पञ्चमी)। नयेन हीनः (तृतीयातत्) तस्मात्। Who swerves from the right path. हा+क्त कर्मणि = हीनः; but हि (to send)+क्त = हितः।

अपरज्यते—Nom. जनः। अप – रञ्ज् (दिवादि) + लट् ते। (Acc. to Chitrabhānu कर्मकर्तरि); becomes dissatisfied. Here रञ्ज takes आत्मनेपद as the fruit of the action accrues to the agent. The rule is "स्वरितञितः कर्त्रभिप्राये क्रियाफले"।

Ch of Voice—मदमानसमुद्धतः नृपः न विमुज्यते......मूढतया। अतिमूढेन ......जनेन।

Remark—The figure of speech in this verse is कारणमाला (for def., and notes, see St. 14), as each preceding clause has been stated as the cause of each succeeding one. Thus मदमान is the cause of मूढता; मूढता is the cause of नयभ्रष्टता and so on. N. B. Malli discusses this figure in the next stanza as the two form a युग्मक।

Even a mighty enemy can be uprooted by a patient man.

अपरागसमीरणेरितः
क्रमशीर्णाकुलमूलसन्ततिः।
सुकरस्तरुवत् सहिष्णुना
रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

Prose—अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः रिपुः महानपि तरुवत् सहिष्णुना उन्मूलयितुं सुकरः।

Beng.—যাহার প্রকৃত্যাদি স্বজনবর্গ বীতরাগ হইয়া থাকে, সেই শত্রু প্রবল হইলেও তাহাকে সহিষ্ণু ব্যক্তি সমীরণ-সঞ্চালিত শীর্ণমূল পাদপের ন্যায় সহজেই উন্মূলিত করিতে পারে।

Eng. Equiv.—अपरागसमीरणेरितः—driven by the wind of discontent. क्रमशीर्णाकुलमूलसन्ततिः—having roots in the form of his powers (ministers etc,) gradually loosened (estranged). सुकरः—is easy. तरुवत्—like a tree. सहिष्णुना—by one who has patience enough. रिपुः—enemy. उन्मूलयितुं—to be uprooted. महानपि—even the mighty.

Eng.—Driven by the wind of discontent and having roots in the form of his powers (ministers, etc.,) gradually loosened (estranged) even the mighty enemy like a tree is easy to be uprooted by one who has patience enough.

Expl.—Cursed is the king who is disliked by the people. The peoples' discontent is like a storm which drives him in the pit of downfall. The dislike of the people is immediately followed by the dislike of the relatives and ministers. They gradually leave him for fear of incurring the censure of the people. And a man who watches his enemy with patience, sees that it is the right time for attack and destroys his mightiest enemy. Just as a tree which is driven by the wind and whose roots are gradually loosened, becomes easy to be uprooted by a patient wood-cutter.

Malli.—अपरागेति—अपरागसमीरणेरितः, अपरागोऽप्रीतिः, द्वेष इति यावत्, समीरण इव तेनेरितः नोदितः, अत एव क्रमशीर्णाकुलमूलसन्ततिः, क्रमेण शीर्णा शीर्णीभूता आकुला चला च मूलसन्ततिः प्रकृत्यादिस्वजनवर्गः शिफासङ्घातश्च यस्य स तथोक्तः। "मूलं वशीकृते स्वीये शिफातारान्तिकादिषु" इति वैजयन्ती। रिपुर्महानपि तरुवत् वृक्ष इव सहिष्णुना क्षमावता उन्मूलयितुम् उद्धर्तुं सुकरः सुसाध्यः, सुकरोन्मूलन इत्यर्थः। अत्र मदादेः पूर्वपूर्वस्य उत्तरोत्तरं प्रति कारणत्वात् कारणमाला, तरुवत् इत्युपमा च इति द्वयोः संसृष्टिः।

Extracts from other Commentaries—"एवं मदमानयोर्जनापरागपर्यवसायित्वमुक्तम्। अथेदानीं जनापरागस्य दुरन्ततामुपपादयति—अपरागेत्यादिना।......जनापरागात् प्रागवस्थां निरूप्य पूर्वं नृपमित्रोक्तं, इदानीं तु जनापरागकृतां द्वेष्यतां विमृश्य रिपुरिति।......तरुवदिति।......यथा महीयसा समीरणेन कृतमात्मविघातं नैसर्गिकजडिमा पादपो वेदितुमपि न शक्नोति, किं पुनर्निवर्तयितुं, तथैव मदमानोपबृंहित-महामोहाक्रान्तः महीपतिः जनापरागजनितम् आत्मव्यसनम् नेवावगच्छति, दूरे तदुपशमनार्थम् उपायप्रयोगादीत्यभिप्रायः।......ननु यद्येवं जनापरागेण विवशीक्रियते रिपुः, तर्हि सद्य एवोच्छेद्यः। तदर्थं न कालक्षेपो योग्य इति तत्राह सहिष्णुनेति।......न तु साहसिकेन इत्यभिप्रायः। समन्ततः प्रसरता समीरणेन प्रचलितस्य महतोऽपि वनस्पतेः क्रमेण कानिचित् मूलानि शीर्णानि भवन्ति कानिचित् आकुलानि भवन्तीति क्रमशीर्णाकुलमूलसन्ततिर्वनस्पतिः यथा इन्धनार्थिना कालज्ञेन कालक्षेपसहिष्णुना कालान्तरे सुखेन उन्मूल्यते, तथैव अविधेयप्रकृतिमण्डलः सुयोधनः कालान्तरे सुखेन उन्मूलनीयः नैवेदानीमिति तात्पर्यार्थः।"—चित्रभानुः।

Notes—अपरागसमीरणेरित:—Adj. to रिपु: and तरु:। अपराग: समीरण इव (उपमितकर्मधारय); अपरागसमीरणेन ईरित: (तृतीयातत्)। Driven by the wind of discontent. अप-रञ्ज्+घञ् भावे=अपराग:। The न of रञ्ज् is dropped by the rule "घञि च भावकरणयो:" (अनयो: किम्। रजत्यस्मिन् इति रङ्ग:)। सम्यग् ईर्ते गच्छति, ईरयति प्रेरयति वा इति सम्-ईर्+युच्=समीरण:। ईर्-णिच्+क्त=ईरित:।

क्रमशीर्णाकुलमूलसन्तति:—Adj. to रिपु: and तरु:। क्रमेण शीर्णा (सुप्सुपेति); मूलानां सन्तति: (षष्ठीतत्); क्रमशीर्णा चासौ आकुला च (कर्मधा); क्रमशीर्णाकुला मूलसन्तति: यस्य स: (बहुव्रीहि)। Or, क्रमशीर्णा आकुला मूलसन्तति: यस्य स: (बहुव्रीहि)। शॄ+क्त स्त्रियाम्, शीर्णा। सम्-तन्+क्तिन् भावे=सन्तति:। मूल means (1) रिपुपक्षे —ministers and relatives (मूल also means 'capital'. "स गुप्तमूलप्रत्यन्त:" Raghu IV. 26). Acc. to Chitrabhānu 'मूल' means subjects—"कुलान्वितम् अभिषिकादिराजकार्याधिकृतं चातुर्वर्ण्यमिह मूलशब्देन विवक्ष्यते"। (2) तरुपक्षे—roots. शिफा। Having roots in the form of his powers gradually loosened.

सुकर:—Adj. to रिपु: and तरु:। सुखेन क्रियते इति सु+कृ+खल् कर्मणि= सुकर:; which can be easily done.

तरुवत्—अव्यय। Adv. qualifying उन्मूलयितुम्। तरुणा तुल्यम् इति तरु+ वति by the rule "तेन तुल्यं क्रिया चेद्वति:"=तरुवत्। The word is an अव्यय by the rule "तद्धितश्चासर्वविभक्ति:"। See notes on जनवत्, St. 42.

सहिष्णुना—अनुक्ते कर्तरि तृतीया। सह+इष्णुच=सहिष्णु:; patient. The sixth case is prohibited by the rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्", as सुकर: is derived with the affix खल्।

रिपु:—उक्ते कर्मणि १मा। Enemy. रपति दोषम् इति रप्+कु: (रपेरिच्चोपधाया:) =रिपु:।

उन्मूलयितुम्—उत्-मूल (चुरादि)+तुमुन्। To uproot.

महान्—Adj. to रिपु: and तरु:।

Ch. of Voice—अपरागसमीरणेरितेन क्रमशीर्णाकुलमूलसन्ततिना महतापि रिपुणा ......सुकरेण (भूयते)।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here the enemy is compared with a tree and hence

discontent is compared with the wind. In the word मूल we have शब्दश्लेष (which is अभङ्ग), as it cannot be replaced by any synonym. This श्लेष is subordinate to उपमा ; hence सङ्कर (नीरक्षीरन्यायेन)। Malli says that as these two stanzas form a युग्मक (see notes on Malli, St. 49). The figure कारणमाला of the previous stanza (49) and उपमा of this stanza form a संसृष्टि (तिलतण्डुलन्यायेन), as the two figures are independent of each other.

For similar idea, compare--"अधिगमा च रन्ध्रमन्तरा जनयन् मण्डलमिदमन्यत: । खनति घनसंहतिः घणादपि मूलानि महान्ति कस्यचित्" ॥ शिशुपालवधे -- XVI. 73.

Internal revolution is sure to destroy a king.

अणुरप्युपहन्ति विग्रहः
प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं
तरुशाखान्तनिघर्षजोऽनलः ॥ ५१ ॥

Prose—अन्तःप्रकृतिप्रकोपजः विग्रहः अणुः अपि प्रभुम् उपहन्ति । तरुशाखान्तनिघर्षजः अनलः अखिलं भूधरं हिनस्ति हि ।

Beng.—অন্তরঙ্গলোক কুপিত হইয়া যদি সামান্যরূপও বৈরাচরণ করে, তাহা হইলে উহা দ্বারাই রাজা বিনষ্ট হয় ; দেখ বৃক্ষশাখার ঘর্ষণজনিত অগ্নি (দাবাগ্নি) বিন্দুমাত্র হইলেও সমস্ত ভূধরকে দগ্ধ করিয়া থাকে ।

Eng. Equiv.—अणुः—insignificant. अपि—even. उपहन्ति—kills. विग्रहः—revolt. प्रभुम्—the king. अन्तःप्रकृतिप्रकोपजः—produced by the disaffection of his trusted counsellors. अखिलं—whole. हिनस्ति—burns. भूधरं—mountain. तरुशाखान्तनिघर्षजः—produced by the friction of the ends of the branches of a tree. अनलः—fire.

Eng.—Even an insignificant revolt, produced by the disaffection of his trusted counsellors, kills the king. The fire, produced by the friction of the ends of the branches of a tree, burns the whole mountain.

Expl.—Internal revolution is a perpetual source of danger to a

king. Even a most powerful king with a secure kingdom, is destroyed by the insignificant revolt of his trusted counsellors. Outer aggression can be checked successfully, but a king is powerless when his own ministry goes against him. First of all, the ministers smart under his insults, then hatch a conspiracy and plan his overthrow. History can cite numerous instances of it. The internal revolt is just like a small fire which is produced by the friction of the branches of a tree and which gradually pervades the entire mountain and destroys it.

Malli.—ननु अन्तर्भेदमात्रेण कथं सुसाध्यः ? तत्राह—अणुरिति । अणुः अल्पोऽपि अन्तःप्रकृतिप्रकोपजः अन्तरङ्गामात्याद्यपरागसमुत्थः । "प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्त्वमात्यादिकेष्वपि" ॥ इति वैजयन्ती । विग्रहः वैरं प्रभुम् उपहन्ति नाशयति । अत्र दृष्टान्तमाह । तरुशाखान्तनिघर्षजः तरुशाखान्तानां निघर्षः घर्षणं तज्जः अनलः अग्निः, भूधरं गिरिम् अखिलं साकल्येन हिनस्ति हि । दहतीत्यर्थः । अत्र उपमानोपमेयसमानधर्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालङ्कारः

Notes on Malli.—(1) ननु........सुसाध्यः—Well, how can he be conquered by internal dissension alone ?

Extracts from other Commentaries—"......अणुरपीति । प्रारम्भे स्वल्पोऽपि परिणामे पृथुलीभविष्यतीति भावः । तत्र हेतुरन्तःप्रकृतिप्रकोपज इति । प्रमादजो बहिरङ्गप्रकृतिप्रकोपजो विरोधो महानपि शाम्यत्येव । आभ्यन्तराणाम् अभिषेकादिनृपकार्य-प्रयोजिकानां प्रकृतीनां प्रभूतात् कोपात् जातो विरोधः स्वल्पोऽपि प्रतिदिनं प्रथत एवेति भावः । ......निघर्षशब्दसमभिव्याहारेण अनलजननोत्तीव तरुशाखयोः शुष्कता द्योत्यते ।......यद्यपि पूर्वस्मिन् वाक्ये उपमेयव्यक्तये प्रकृतिशब्द एक एव प्रयुक्तः, तथापि उत्तरस्मिन् वाक्ये उपमान-व्यक्तये प्रयुक्तैः समष्टि-व्यष्टितदंशविषयैः तरुशाखान्तशब्दैः प्रकृतिवर्ग-तद्वर्ग्यौ उपमेयतया प्रतीयन्ते एव । प्रभुं प्रति प्रकुपितानां प्रकृतीनां ऐक्येन अभेद्यतां द्योतयितुं पूर्वत्र प्रकृतिशब्द एव प्रयुक्तः । उत्तरत्र तासां यथाप्रधानम् अनुगमम् अवगमयितुं पृथक् पृथक् उपमानशब्द-प्रयोगः"—चित्रभानुः ।

Notes—अणुः—Adj. to विग्रहः। Small, insignificant. Feminine forms अण्वी and अणुः।

उपहन्ति—Nom. विग्रहः। उप—हन्+लट् ति। Kills.

विग्रहः—वि—ग्रह्+अप् by the rule "ग्रहवृदृनिश्चिगमश्च"। Revolt. Nom. to उपहन्ति।

प्रभुम्—Obj to उपहन्ति। King. प्रभवतीति प्र—भू+डु by the rule "विप्रसम्भ्यो ड्वसंज्ञायाम्"।

अन्तःप्रकृतिप्रकोपजः—Adj. to विग्रहः। अन्तर्गताः प्रकृतयः (शाकपार्थिवादिवत् कर्मधारय); अन्तःप्रकृतीनां प्रकोपः (षष्ठीतत्); तस्मात् जायते असौ इति अन्तःप्रकृतिप्रकोप—जन्+ड कर्तरि। (उपपदतत्)। Produced by the disaffection of his trusted counsellors. Here अन्तःप्रकृति means the trusted ministers. प्र—कृ+क्तिन्=प्रकृतिः। प्र—कुप्+घञ भावे=प्रकोपः।

अखिलम्—Malli takes it as an adverb of हिनस्ति। Wholly (साकल्येन). It may also be taken as an adjective to भूधरम्।

हिनस्ति—Nom. अनलः। हिन्स्+लट् ति। Destroys, burns. "अग्निकर्तृका हिंसा दाह एव इति दहतीति लभ्यते" (चित्रभानुः)।

भूधरम्—Obj. to हिनस्ति। धरतीति धरः; भुवः धरः (षष्ठीतत्) तम्; mountain. Cf. "कथं तर्हि गङ्गाधरः, भूधरादयः। कर्मणः शेषत्वविवक्षायां भविष्यन्ति"—Bhaṭṭoji on "कर्मण्यण्"। Acc. to Haradatta, however, "गङ्गाधरः, श्रीधरः, वज्रधरः, भूधरः, सम्धरेति तु सञ्ज्ञाशब्दाः" (पदमञ्जरी—p. 611).

तरुशाखान्तनिघर्षजः—Adj. to अनलः। तरूणां शाखाः (षष्ठीतत्); तासाम् अन्ताः (षष्ठीतत्); तेषां निघर्षः (षष्ठीतत्); तस्मात् जायते असौ इति उपपदसमासे तरुशाखान्तनिघर्ष—जन्+ड कर्तरि (उपपदतत्); produced by the friction of the ends of the branches of trees. नि—घृष्+घञ् भावे=निघर्षः, friction.

अनलः—Fire. Nom. to हिनस्ति। अनित्यनेन इति अन+कलच (औणादिक) = अनलः।

Ch. of Voice—अणुनापि उपहन्यते विग्रहेण प्रभुः अन्तःप्रकृतिप्रकोपजेन......... हिंस्यते भूधरः तरुशाखान्तनिघर्षजेन अनलेन।

Remark—The figure of speech in this verse is दृष्टान्त (for def.,

see St. 36). Here the idea of the first half of the stanza has been represented as extremely similar to the idea of the second half, so much so that one seems to be the reflection of another (बिम्बप्रतिबिम्ब भाव:) । The illustration is here based on similarity (साधर्म्य) ।

The wise man can overlook the prosperity of his impudent enemy.

मतिमान् विनयप्रमाथिन:
समुपेक्षेत समुन्नतिं द्विष: ।
सुजय: खलु तादृगन्तरे
विपदन्ता ह्यविनीतसम्पद: ॥ ५२ ॥

Prose—विनयप्रमाथिन: द्विष: समुन्नतिं मतिमान् समुपेक्षेत । तादृक् अन्तरे सुजय: खलु । अविनीतसम्पद: हि विपदन्ता: ।

Beng.—বিজ্ঞ ব্যক্তি দুর্বিনীত শত্রুর উন্নতি উপেক্ষা করিবে, কারণ সেইরূপ অবিনীত শত্রুকে রন্ধ্র পাইলে সহজেই পরাজিত করা যায় ; যেহেতু অবিনয়ী লোকের সম্পৎ পরিণামে বিপদের কারণ হয় ।

Eng. Equiv.—मतिमान्—wise man. विनयप्रमाथिन:—impudent. समुपेक्षेत—should connive at. समुन्नतिं—prosperity. द्विष:—of his enemy. सुजय:—easy to be conquered. तादृक्—such (a foe). अन्तरे—in his weak points. विपदन्ता:—end in disasters. हि—indeed. अविनीतसम्पद:—prosperity of arrogant persons.

Eng.—The wise man should connive at the prosperity of his impudent enemy. Such a foe is easy to be conquered in his weak points. Indeed, the prosperity of arrogant persons, ends in disasters.

Malli.—तथापि कथं वर्धमानं शत्रुमुपेक्षेत इत्याशङ्क्य दुर्विनीतत्वादित्याह—मतिमानिति । मतिमान् प्राज्ञ:, विनयं प्रमथ्नाति त्यजतीति विनयप्रमाथिनो दुर्विनीतस्य द्विष: समुन्नतिं वृद्धिं समुपेक्षेत । उपेक्षाया: फलमाह—तादृक् अविनीत: अन्तरे क्वचित् रन्ध्रे सुजय: सुखेन जेतुं शक्य: खलु । हि यस्मात् अविनीतसम्पदो विपदन्ता विपन्मर्यादका:, अनर्थोदर्का:, इत्यर्थ: ।

Notes on Malli.—(1) तथापि.........आह—Yet, how can one afford to neglect a rising enemy—apprehending this he says (that the enemy can be overlooked) because of his impudence.

Extracts from other Commentaries—"......विनयं प्रभुत्वेन मथ्नाति विलोड़यतीति विनयप्रमाथी तस्य। पूर्वं विनयमादृत्य पश्चात् प्रभुत्वेन तन्निराकुर्वत इत्यर्थः।......अप्रमादिना प्रमादी सुजय इति प्रसिद्धोऽयमर्थ इति खलुशब्देन द्योत्यते।...... अविनीतानां नहुषरावणादीनां सम्पदन्तथा दुरन्ताः श्रूयन्त इति हिशब्देन द्योत्यते"—चित्रभानुः।

Notes—मतिमान्—Nom. to समुपेक्षेत। प्रशस्ता मतिरस्य इति मति + मतुप् (प्राशस्त्ये) = मतिमान्, wise. मतिमान् जनः इत्यर्थः -"विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" (वामन V. 1. 10). मन् + क्तिन् भावे = मतिः। Chitrabhānu reads the word as 'नयवान्' (प्रशस्यनयः) = a man of good policy.

विनयप्रमाथिनः—Adj. to द्विषः। विनयं प्रमथति इति विनय – प्र – मथ (भ्वादि, विलोडने) + घिनुण्, कर्तरि by the rule "प्रे लप-सृ-द्रु-मथ-वद-वसः"। One who tramples down modesty, impudent. मन्थ of the क्र्यादि class will give प्रमन्थिन्। वि – नी + अच् भावे = विनयः।

समुपेक्षेत—Nom. मतिमान्। सम् – उप – ईक्ष् + लिङ् ईत। Should connive at.

समुन्नतिम्—Obj. to समुपेक्षेत। सम् – उद् – नम् + क्तिन् भावे = समुन्नतिः, prosperity. "समन्तादुन्नतिः समुन्नतिः, पुरराष्ट्राटवीषु तत्तज्जनधान्यादिसमृद्धिः"—चित्रभानुः।

द्विषः—शेषे षष्ठी। द्वेष्टि इति द्विष + क्विप् कर्तरि। षष्ठी एकवचन।

सुजयः—Adj. to तादृक्। सुखेन जीयते इति सु – जि + खल् कर्मणि = सुजयः, easy to be conquered.

खलु—अव्यय। This particle indicates that a careful man easily conquers a careless one. See Extracts.

तादृक्—उक्ते कर्मणि १मा। तमिव इमम् पश्यन्ति जनाः, सः अयम् स इव दृश्यमानः तमिव आत्मानं पश्यति इति तद् + दृश् + क्विन् कर्मकर्तरि by the rule "त्यदादिषु दृशोऽनालोचने कञ् च"। The final of the pronoun तद् is substituted by आ by the rule "आ सर्वनाम्नः"। Such (a foe).

अन्तरे--भावे सप्तमी; in weak point, loop-hole. Cf. "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च"॥ इत्यमरः।

विपदन्ताः—Adj. to अविनीतसम्पदः। विपद् अन्तः यासां ताः (बहुव्रीहि)। Which end in disaster.

हि—अव्यय। It signifies that kings like Nahuṣa, Rāvaṇa etc., lost their fortune through impudence. See Extracts.

अविनीतसम्पदः—Nom. to भवन्ति understood. न विनीतः (नञ्तत्) = अविनीतः; अविनीतानां सम्पदः (षष्ठीतत्)। Prosperity of arrogant persons. वि – नी + क्त कर्मणि = विनीतः।

Ch of Voice—मतिमता......समुन्नतिः समुपेक्ष्यते। तादृशा सुजयेन (भूयते)। अविनीतसम्पद्भिः विपदन्ताभिः (भूयते)।

Remark—The figure of speech in this verse is अर्थान्तरन्यास (for def, see St. 5). Here the effect (in the first half) is supported by the cause (in the second half). Because an impudent man is easy to be conquered in his weak points and because the prosperity of arrogant persons ends in disaster—hence one should overlook the prosperity of his impudent enemy.

A neighbouring prince invades and subjugates the kingdom of that king whose subjects and ministers are dissatisfied with him.

लघुवृत्तितया भिदां गतं
बहिरन्तश्च नृपस्य मण्डलम्।
अभिभूय हरत्यनन्तरः
शिथिलं कूलमिवापगारयः॥ ५३॥

Prose—लघुवृत्तितया बहिः अन्तश्च भिदां गतं नृपस्य मण्डलम् अनन्तरः आपगारयः शिथिलं कूलम् इव अभिभूय हरति।

Beng.—যে রাজার রাষ্ট্রে তাহার দুর্ব্ব্যবহার হেতু মিত্রামাত্যাদি অসন্তুষ্ট হইয়া থাকে তাহার সন্নিহিত শত্রু, নদীবেগ-জর্জ্জরিত তীরের ন্যায় সেই রাষ্ট্রকে আক্রমণ পূর্ব্বক নিপাতিত করে।

Eng. Equiv.—लघुवृत्तितया—by ill conduct. भिदा—(1) dissension; (2) breaking. गतम्—are affected with. बहिः—(1) external; (2) outside. अन्तश्च—and (1) internal (2); inside. नृपस्य—of the king. मण्डलम्—dominion. अभिभूय—(1) invades; (2) overruns. हरति—(1) subjugates; (2) sweeps away. अनन्तरः—a neighbouring king. शिथिलं—loose. कूलम्—bank. इव—as. आपगारयः—the current of a river.

Eng.—A neighbouring king (wishing to extend his dominions) invades and subjugates the dominion of a king the constituent members external as well as internal (i. e , friends and ministers) of which are affected with dissension by his ill conduct, as the current of a river overruns and sweeps away its loose bank broken through, inside and outside.

Expl.—The impudent king never becomes capable of maintaining his kingdom for a long time. By his ill conduct the ministers, subjects and allies become dissatisfied with him. The neighbouring king who is always on the lookout for a loop-hole finds the best opportunity of extending his kingdom and launches an attack. And the king, thus made weak by dissension, easily submits to his mighty enemy. Just as the bank of a river which is shattered inside and outside, is easily overrun and swept away by the forcible current of a river. So shall we attack Duryodhana and regain our lost kingdom.

Malli.—कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वादित्याह—लघ्विति । लघुवृत्तितया स्वस्य दुर्वृत्ततया बहिर्मित्रादिजनपदेषु अन्तः अमात्यादिषु च भिदा भेदं गतम् । "षिद्भिदादिभ्योऽङ्" इत्यङ्-प्रत्ययः । नृपस्य मण्डलं राष्ट्रम् अनन्तरः सन्निहितो जिगीषुः आपगारयो नद्यावेगः शिथिलम् अन्तर्भेदजर्जरं कूलमिव अभिभूय आक्रम्य हरति ।

Notes on Malli—(1) कथ.........आह—How an impudent enemy is easy to be conquered ?—apprehending this he says—(he is easy to be conquered) because he is worn by dissension.

Extracts from other Commentaries—"नन्वविनीतेन मानिना नृपेण कृतापरागाः प्रकृतयः परेण क्रियमाणं तस्य परिभवमेवोपेक्षन्ते न तु राज्यहरणमिति सम्प्रत्यसात्कृतं राज्यं प्रतिजिहीर्षतामस्माकम् मनोरथः कथं नयेन साध्यः स्यादिति तत्राह—लघुवृत्ततयेत्यादिना । ...अन्तरं भेदः, तद् यस्य नास्ति सोऽनन्तरः अतिसन्निकृष्टः तदंशस्य इत्यर्थः ।......प्रकृतिप्रधानाः पौरजानपदाः मण्डलवासिनो जना इह मण्डलशब्देन विवक्ष्यन्ते । बलीयसोऽपि बाह्यस्य शत्रोः मण्डलस्याभिभव एव शक्यः न हरणं, सन्निकृष्टस्य तु नीतिमतस्तदुभयं शक्यमिति भावः ।

......शिथिलमिति। अवयविनोऽवयवानां विश्लेषः शैथिल्यम्। इह तु स्नेहविश्वासादीनां मनोवृत्तीनाम् अवयविनो मनसो विश्लेषः शिथिलशब्देन विवक्ष्यते। तनुतरनृपविषयस्नेह-विश्वासादिभावमित्यर्थः।......लघुवृत्ततयेति।......व्यापारो वृत्तम् नृपसम्बन्धात् तद्रक्षणभरणा-दिति गम्यते। लघु स्वल्प मण्डलविषयं रक्षणभरणादि वृत्तं यस्य स लघुवृत्तः, तद्भावो लघुवृत्तता तया।......बहिरन्तश्च भिदां गतमिति। बाह्येषु वागादिव्यापारेषु आभ्यन्तरेषु मनोव्यापारेषु च भिन्नम् अन्यथाभूतमित्यर्थः। बहिर्व्यक्तं मण्डलस्य भेदं शमयितुमनुद्यते मदोद्धते नृपे स्थिरतरोऽभ्यन्तरः तद्भेदो भवतीति शब्दक्रमेण द्योत्यते।..... यथा नदीसन्निकृष्टेन भूभागेन चिरश्लिष्टमपि कूलं भेदं सति नदीवेगो हरति, तथा नृपेण चिरबद्धमपि मण्डलं रन्ध्रे सति अनन्तरो नृपो हरतीति समुदायार्थः।......दृष्टान्ते च विशेषणानि योजनीयानि। लघुवृत्ततयेति। परिणाहो वृत्तम्। विरलावयवत्वमिह लघुत्वं विवक्षितम्। विरलावयवसंस्थान-तया बहिरन्तश्च भिदां भेदम अवयवविश्लेषम् गतम् प्राप्तम्। शिथिलं स्वस्थानात् च्यवितुमारब्धम्। अभिभूय भङ्क्त्वेत्यर्थः।......यथा प्रावृषि वर्षद्भिः पयोदैः कुल्यादिभिश्चोपबृंहितप्रवाहा नदी वेलां विलङ्घ्य कूलं हर्तुं शक्नोति न ग्रीष्मे शुष्यत्समस्तजला, तथैव समयप्रमापनसमये शक्रादिभि-स्त्रिदशैर्यदुपाञ्चालादिभिश्च उपबृंहितबलावयवं सुयोधन सपत्नमवधूय तन्मण्डलं हर्तुं शक्नुयाम, नेदानीमीदृशकार्श्यां इत्ययं चार्थोऽनेन श्लोकेन द्योत्यते। यथा प्रसन्नस्वादुसलिलायास्तरङ्गिण्याः नैसर्गिकं सकलानुग्राहकत्वं, कूलभञ्जकत्वमौपाधिकं, तथैव धर्मात्मभाचरितस्य धर्मात्मजस्य स्वाभाविकं सकलानुग्राहकत्वं सपत्नोन्मथनमौपाधिकमित्यादि चात्र द्योत्यत एव"—चित्रभानुः।

Notes—लघुवृत्तितया—हेतौ तृतीया। लघुः वृत्तिर्यस्य (बहुव्रीहि); तस्य भावः इति लघुवृत्ति+तल् स्त्रियाम् लघुवृत्तिता, तया। By ill conduct. Chitrabhānu reads the word as लघुवृत्ततया and construes it with both नृप and कूल thus—(1) नृपपक्षे—on account of his failing to give protection and nourishment to his subjects (वृत्तं रक्षणभरणादि); (2) कूलपक्षे—because of scanty expanse (वृत्तम् परिणाहः). See Extracts.

√ भिदाम्—Obj. to गतम्। भिद्+अङ् भावे स्त्रियाम्=भिदा। (1) नृपमण्डलपक्षे—dissension. Chitrabhānu also interprets it in the sense of 'duplicity' i. e., different in word and mind. See Extracts. (2) कूलपक्षे—splitting up (being shattered inside and outside).

गतम्—Adj. to नृपस्य मण्डलम् and कूलम्। गम्+क्त कर्तरि = गतम्। Attained.

बहिः अन्तः च—अव्यय। The two indeclinables have a locative sense. बहिः अन्तश्च भिदाम् गतम्। (1) नृपमण्डलपक्षे—बहिः means 'other friendly kings' and अन्तः 'counsellors and subjects'—acc. to Malli and Chitrabhānu. Chitrabhānu also gives another explanation. बहिः means 'words and outward gestures', अन्तः means 'the inner mind'. See Extracts. (2) कूलपक्षे—Outside and inside.

नृपस्य—शेषे षष्ठी। नॄन् पाति इति उपपदसमासे नृ – पा + क कर्तरि = नृपः।

मण्डलम्—Obj. to अभिभूय and हरति। मण्डल means 'dominion' or as Chitrabhānu clearly puts "people residing in the kingdom" (See Extracts).

अभिभूय—Nom. अनन्तरः and आपगारयः। अभि – भू + ल्यप्। (1) नृपमण्डलपक्षे—having invaded ; (2) कूलपक्षे—having overrun.

हरति—Nom. अनन्तरः and आपगारयः। हृ + लट्, ति। (1) नृपपक्षे—subjugates ; (2) कूलपक्षे—sweeps away.

अनन्तरः—Nom. to अभिभूय and हरति। अविद्यमानम् अन्तरं यस्मात् सः (बहुव्रीहि)। A neighbouring king who wishes to extend his kingdom. Chitrabhānu adds तद्देश्य इत्यर्थः। कूलपक्षे—stream which is very near the bank.

शिथिलम्—Adj. to नृपस्य मण्डलम् and कूलम्। (1) Of lost confidence ; see Extracts ; (2) loose, slackened.

कूलम्—Obj. to अभिभूय and हरति। Bank.

आपगारयः—Nom. to अभिभूय and हरति। आपगायाः रयः (षष्ठीतत्) the current of a river. अपां समूहः इति आपम् (अप् + अण्)। आपेन गच्छति इति उपपदसमासे आप – गम् + ड कर्तरि, स्त्रियाम् = आपगा।

Ch. of Voice—......क्रियते......अनन्तरेण—आपगारयेण।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here a neighbouring king is compared with the current of a river and the kingdom is compared with the bank. In all the

epithets qualifying the kingdom and the bank, we have श्रर्थश्लेष, because they can be replaced by their synonyms.

Vyāsa came to Yudhisṭhira who was thus appeasing Bhīma.

अनुशासतमित्यनाकुलं
नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छित-
स्तमभीयाय पराशरात्मजः ॥ ५४ ॥

Prose—इति आकुलम् अर्जुनाग्रजं नयवर्त्म अनाकुलम् अनुशासतं तं पराशरात्मजः स्वयम् अभिवाञ्छितः अर्थ इव अभीयाय ।

Beng.—যুধিষ্ঠির ক্ষুভিত ভীমসেনকে এইরূপ সুস্পষ্ট নীতি উপদেশ দিতেছেন, এমন সময় পরাশরতনয় বেদব্যাস সাক্ষাৎ মনোরথের ন্যায় তাঁহার সন্নিধানে আগমন করিলেন ।

Eng. Equiv.—अनुशासतम्—explaining. इति—thus. अनाकुलं—in unmistakable terms. नयवर्त्म—the right line of policy. आकुलं—enraged. अर्जुनाग्रजम्—Bhīma (the elder brother of Arjuna). स्वयम्—embodiment. अर्थः—object. इव—as it were. अभिवाञ्छितः—desired. तम्—to him. अभीयाय—came. पराशरात्मजः—Vyāsa (the son of Parāśara)

Eng.—As he was thus explaining in unmistakable terms the right line of policy to Bhīma (the elder brother of Arjuna) who was enraged, there came to him Vyāsa (the son of Parāśara), an embodiment, as it were, of the desired object.

Malli.—अन्विति । इति इत्थम् आकुलम् अरिनिकारस्मरणात् क्षुभितम् अर्जुनाग्रजं भीमसेनं नयवर्त्म नीतिमार्गम् अनाकुलम् असङ्कीर्णम् यथा तथा अनुशासतम् उपदिशन्तम् । "जक्षित्यादयः षट्" इत्यभ्यस्तात्वान्नुमभावः । तं युधिष्ठिरं पराशरात्मजः पराशरस्य आत्मजः पुत्रः वेदव्यासः । स्वयम् अभिवाञ्छितोऽर्थ इव साक्षात् मनोरथ इव इत्युत्प्रेक्षा । अभीयाय प्राप्तः ।

Extracts from other Commentaries—"......अथवा नयवर्त्माकुलमित्येकं पदम् अर्जुनाग्रजविशेषणम् । नयवर्त्मनि नीतिमार्गे आकुलं असमञ्जसम्, नयतत्त्वस्या-

निर्णयेन अनवस्थितमित्यर्थः ।......अभीप्सयेति । अभिराभिमुख्ये वर्तते । अनुग्रहोन्मुख्य-मिहाभिमुख्यं विवक्षितम् । इयाय जगाम, अनुग्रहोन्मुख आजगामेत्यर्थः । ननु कुरुकुलगुरु-र्मुनीन्द्रस्तेषां सुयोधनादीनाम् अभिभवं वधं वा नानुमन्येत, तत् कुतस्तदुपायमुपदिशेदिति शङ्का पराशरात्मजशब्देन निरस्यते । पराशरो हि नृशंसतमाना नराशनानां निःशेषाकरणाय राक्षससत्रं कृतवानिति श्रूयते । परान्ना आशरा राक्षसा येन स पराशर इति च पराशरशब्दस्य निरुक्तिः । "राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशर" इत्यमरसिंहः । ततस्तस्य पराशरस्य औरसः पुत्रो द्वैपायनः दुरितैकनिष्ठानां दुष्टचेतसां धार्तराष्ट्राणाम् अभिभवं वधं वा प्रयोजयेदेव इत्यभिप्रायः"—चित्रभानुः ।

Notes—अनुशासतम्—Present participle adj. to तम् । अनु – शास् + शतृ, २या १वचन । Guiding—"विविच्य ज्ञापनविषय एवानुशास्तिः प्रसिद्धः 'अथ शब्दानुशासनम्' इत्यादौ"—Chitrabhānu. The root शास being a अभ्यस्त root, does not take नुम् by the rule "नाभ्यस्ताच्छतुः" । The base is declined like भृभृत् ।

इति—अव्यय ; thus. अनेन प्रकारेण ।

अनाकुलम्—Adj. to अनुशासतम् । न आकुलम् (नञ्तत्) तत् यथा तथा । Without any confusion. Clearly, in unmistakable terms. "अनाकुल-मित्यनुशासनविशेषणं तमित्यस्य विशेषणं वा" (चित्रभानुः) ।

नयवर्त्म—Direct object of अनुशासतम् । Chitrabhānu, however, takes it as the indirect object and अर्जुनाग्रज as the direct object. "वृकोदरस्य अनुशासनविषयत्वेन द्वीप्सिततमत्वात् प्रधानकर्मत्वम् । नयवर्त्मनस्तु अनुशासनसम्बन्धित्वमात्रं विवक्षितमित्यप्रधानकर्मत्वम्" (चित्रभानुः) । नयस्य वर्त्म (षष्ठीतत्) तत् । The right line of policy. Or, नयवर्त्माकुल is one word (चित्र) ।

आकुलम्—Adj. to अर्जुनाग्रजम् ; agitated. "परिभवासहिष्णुतया युधिष्ठिरभावा निश्चयेन कृत्यविषयेन अज्ञानेन विपर्ययज्ञानेन च विचलितमित्यर्थः" (चित्रभानुः) ।

अर्जुनाग्रजम्—Indirect object of अनुशासतम् (which is द्विकर्मक) । Acc. to चित्रभानु direct object (प्रधानकर्म) । See नयवर्त्म । अर्जुनस्य अग्रजः (षष्ठीतत्) तम् । Bhīma. अग्रे जात इति उपपदसमासे अग्र – जन + ड = अग्रजः elder.

स्वयम्—अव्यय । साक्षात्, incarnte. (अनुपचरितः मुख्यतमः) ।

अर्थः—Nom. to अभीप्साय । Object.

अभिवाञ्छित:—Adj. to अर्थ:। अभि अभिमुखम् अव्यवहितं इति अभि – वाञ्छ + क्त कर्मणि = अभिवाञ्छित:, most desired.

तम्—Obj. to अभीयाय। Refers to Yudhiṣṭhira.

अभीयाय—Nom. पराशरात्मज:। अभि – इ + लिट् णल्। Came.

पराशरात्मज:—Nom. to अभीयाय। पराशरस्य आत्मज: (षष्ठीतत्)। Vyāsa was the son of Parāśara who was the grandson of Vaśiṣṭha. He was called कृष्णद्वैपायन because of his dark complexion and his being born on an island (द्वीप). His mother was सत्यवती who gave birth to him before her marriage. Vyāsa or Vedavyāsa is so called because he divided (व्यास) and arranged the Vedas. Like Bhīṣma he was also the grandfather of the Kauravas and the Pāṇḍavas. For the significance of this word, see Extracts from Chitrabhānu. आत्मन: जायते इति उपपदसमासे आत्मन् – जन् + ड = आत्मज:, son.

Ch of Voice—अनुशासत्......अर्थेन .....अभिवाञ्छितेन स: अभीये पराशरात्मजेन।

Remark—The figure of speech in this verse is उत्प्रेक्षा (for def., see St. 10). Here व्यास is imagined to be identical with the desired object.

मधुरैरवशानि लम्भय-
न्नपि तिर्यञ्चि शमं निरीक्षितै: ।
परित: पटु बिभ्रदेनसां
दहनं धाम विलोकनक्षमम् ॥ ५५ ॥
सहसोपगत: सविस्मयं
तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनि:
स वपुष्मानिव पुण्यसञ्चय: ॥ ५६ ॥

Yudhiṣṭhira saw the sage with great astonishment.

Prose—मधुरै: निरीक्षितै: अवशानि तिर्यञ्चि अपि शमं लम्भयन्, परित: एनसां दहनं

विलोकनक्षमं पटु धाम बिभ्रत्, सहसा उपगतः, तपसां सूतिः आपदाम् असूतिः स मुनिः वपुष्मान् पुण्यसञ्चय इव जगतीभुजा सविस्मयं ददृशे ।

Beng.—যিনি শান্ত দৃষ্টিপাতে অবশীভূত জন্তু সকলেরও অন্তরে শান্তি সঞ্চার করিতেছেন, যিনি পাপনাশক দর্শনযোগ্য উজ্জ্বল প্রভামণ্ডল চতুর্দ্দিকে ধারণ করিতেছেন, ধর্ম্মরাজ যুধিষ্ঠির সেই তপস্যার উৎপত্তিস্থল, বিপদের নিবারক, সহসা আগমনকারী, সাক্ষাৎ পুণ্যরাশির ন্যায় মহর্ষি ব্যাসকে বিস্ময়ের সহিত দেখিতে লাগিলেন।

Eng. Equiv.—मधुरैः—sweet. अवशानि—wild. लम्भयन्—causing to get. अपि—even. तिर्यक्षु—animals (beasts etc.). शमं—peaceful disposition. निरीक्षितैः—looks परितः—all around. पटु—brilliant. बिभ्रत्—diffusing. एनसां—of sins. दहनं—which burns. धाम—lustre. विलोकनक्षमम्—which could be gazed at. सहसोपगतः—who made his sudden appearence. सविस्मयं—with great astonishment. तपसां—of piety. सूतिः—source. असूतिः—remover. आपदाम्—of evils. ददृशे—was seen. जगतीभुजा—by the king. मुनिः—sage स—that. वपुष्मान् embodiment. इव—as. पुण्यसञ्चयः—a store of religious merits.

Eng.—Making even the wild animals (beasts, birds etc) get a peaceful disposition by his sweet looks, diffusing a brilliant lustre all around which burned all sins and which could be gazed at, the source of piety, the remover of evils, that sage, who made his sudden appearence, was seen by the king as an embodiment of a store of religious merits, with great astonishment.

Malli.—अथ युग्मेनाह—मधुरैरिति । मधुरैः शान्तैः निरीक्षितैः अवलोकनैः, "नपुंसके भावे क्तः" । न विद्यते वशम् आयत्तत्वं येषां तानि अवशानि प्रतिकूलानि । "वशमायत्ततायां च" इति विश्वः । तिर्यक्षु मृगपक्ष्यादीनि शमं शान्तिं लम्भयन् प्रापयन् । "लभेश्च" इति नुमागमः । "गत्यर्थ—" इत्यादिना द्विकर्मकत्वम् । परितः पटु उज्ज्वलम् । एनसाम् । दह्यते अनेनेति दहनं निवर्तकम् तथापि विलोकनक्षमं दर्शनीयम् । वह्न्यादिविलक्षणमिति भावः । धाम तेजः बिभ्रत् । सहसेति । पुनः सहसा उपगतः, अकस्मात् आगतः, तपसां सूतिः प्रसवः, आपदाम् असूतिः अप्रभवः, निवर्तक इति यावत् । स मुनिः व्यासः वपुष्मान् देहधारी पुण्यसञ्चयः पुण्यराशिः इव इत्युत्प्रेक्षा, जगतीभुजा राज्ञा सविस्मयं ददृशे दृष्टः ।

Extracts from other Commentaries—"......जातिवाची तिर्यक्-शब्दः पुंलिङ्ग एवेति विशेषणतां गतेन तिर्यञ्चीति पदेन भूतानीति विशेष्यपदमाक्षिप्यते। अथवा तिर्यञ्चु नपुंसकानि तिर्यञ्चीत्यनेन उच्यन्ते। शमविरोधिनां तामसत्वातिशयं द्योतयितुं तिर्यग्जातिरेव तामसी, तत्रापि नपुंसकानि अतितामसानीति। भूतशब्दाध्याहारे तिर्यञ्चि भूतान्यपि शमं लम्भयन् इत्यन्वयः। भूतशब्दः प्राणिवाची। अनध्याहारे तिर्यञ्चपि शमं लम्भयन्नित्यन्वयः। तिर्यञ्चि तिर्यङ्मुखेन्द्रियाणि शब्दादीन् विषयानपि सम्यगवगन्तुमसमर्थानि अज्ञानविपर्ययज्ञानाभ्यां नित्यसम्बद्धानीति लभ्यते।...स इति प्रस्तुतप्रसिद्धानुभूतार्थविषयस्तच्छब्दः। इह तु तत्त्वेनावस्था वा तदर्थत्वं तच्छब्देन परामृश्यते। पूर्ववाक्ये प्रस्तुतो महानुभावतया प्रसिद्धो युधिष्ठिरेणाभ्युदयदायितया अनुभूतश्च द्वैपायनस्त्रिधा तच्छब्देन परामर्शमर्हति।...... सहसेत्येतत् पदं ददृश इत्यनेन च सम्बन्धं शक्यमुचितं च, सहसा ददृश इति। तेन योगशक्त्या तिरोहितदिव्यमूर्तिर्द्वैपायनः पुण्यवतां पाण्डवानां सन्निकर्षे तदनुग्रहार्थमाविर्बभूव इति व्यज्यते"—चित्रभानुः।

Notes—मधुरैः—Adj. to निरीक्षितैः। Sweet, pleasing. मधु माधुर्यं राति ददाति इति उपपदसमासे मधु–रा+क। Or, मधु माधुर्यम् अस्यास्ति इति मधु+र=मधुरः।

अवशानि—Adj. to तिर्यञ्चि। अविद्यमानं वशम् येषां तानि (नञ्गर्भ-बहुव्रीहिः)। Alt. form अविद्यमानवशानि। Wild, savage. Chitrabhānu explains it as परतन्त्राणि—"तिर्यञ्चोऽपि प्रबललुब्धकशरभादिभीत्या दुर्बलशशादिजिघत्सया च सन्ततं समन्ततः क्षिप्यन्त इति तेषां स्वातन्त्र्यलेशोऽपि सम्भवति" (चित्रभानुः)।

लम्भयन्—Present participial adj. to मुनिः। लभ्+णिच्+शतृ, १मा १वचन। The नुम् comes in by the rule "लभेश्च"—which means that लभ takes the augment नुम् (i. e., न् after its last vowel), when an affix beginning with a vowel (except शप् and लिट्) follows.—Making one get. लभ् is a गत्यर्थक root.

अपि—अव्यय, implies विरोधः। "तिरश्चां शमसम्बन्धविरोधमपिशब्दो द्योतयति" (चित्रभानुः)।

तिर्यञ्चि—Obj. to लम्भयन्। लभ् being a गत्यर्थक root governs the subject of the non-causal in the accusative in the causal form by the rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ"। (तिर्यञ्चि शमं लभन्ते, स तानि शमं लम्भयति)। तिरः अञ्चति इति तिरस्+अञ्च्+क्विन् कर्तरि by the rule

"ऋत्विक्-दधृक्-स्रक्-दिग्-उष्णिग्-अञ्चु-युजि-क्रुञ्चां च"। तिरस् is replaced by तिरि before the अ of अञ्च् by the rule "तिरसस्तिर्यलोपे"। तिर्यच् means 'animal' who goes horizontally as distinguished from man who walks erect. The word is used in the masculine as well as in the neuter. Chitrabhānu explains it in two ways—(1) Adj. to भूतानि understood or (2) the neuter class in the animals to whom peace is unknown. See Extracts.—Feminine तिरश्ची।

शमम्—Obj. to लम्भयन्। शम्+घञ् भावे ("नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति वृद्ध्यभावः)। Peaceful disposition. "अनुचितस्य इन्द्रियव्यापारस्य उपरमम्" (चित्रभानुः)।

निरीक्षितैः—करणे तृतीया। निर्-ईक्ष+क्त नपुंसके भावे=निरीक्षितं, तैः। Looks.

परितः—अव्यय। All around. परि+तस् (सर्वार्थे)।

पटु—Adj. to धाम। 'Brilliant' acc. to Malli. Chitrabhānu explains it as निपुणम् (expert) "विषयप्रकाशनपरः शक्तिशयस्तेजसः पटुत्वम्। आदित्यवद् व्याप्तिविषयप्रकाशनादिकरं न प्रदीपवत् सङ्कुचितवृत्तीत्यर्थः"—चित्रभानुः।

बिभ्रत्—Present participle adj. to मुनिः। भृ+शतृ, १मा, १वचन। Diffusing, holding. 'भृ' being a अभ्यस्त root does not take नुम् by the rule "नाभ्यस्ताच्छतुः"।

एनसाम्—कृद्योगे कर्मणि षष्ठी। एनस् sin, evil.

दहनम्—Adj. to धाम। दहतीति दह्+ल्यु, कर्तरि (नन्द्यादिना)—that which burns.

धाम—Obj. to बिभ्रत्। Lustre.

विलोकनक्षमम्—Adj. to धाम। विलोकनस्य क्षमम् (षष्ठीतत्)। Capable of being gazed at, क्षमते इति क्षम्+अच्=क्षमम्। वि-लोक+णिच्+ल्युट् भावे=विलोकनम्। पुनः पुनः दर्शनीयमित्यर्थः (चित्रभानुः)।

सहसा—अव्यय। Suddenly. Adv. to उपगतः। Chitrabhānu also construes it with ददृशे। See Extracts. सह+असा=सहसा।

उपगतः—Adj. to मुनिः। उप-गम्+क्त कर्तरि (गत्यर्थत्वात्)। Come.

सविस्मयम् – Adv to ददृशे । विस्मयेन सह वर्तमानं तत् यथा स्यात् (बहुव्रीहि) तथा । With astonishment. वि – स्मि + अच् भावे = विस्मयः । Alt. form सहविस्मयम् ।

तपसाम्—कर्मणि षष्ठी । Piety. "इन्द्रियशमप्रधानानां प्रकृष्टतमानां पुण्यानाम्" चित्रभानुः ।

सूतिः—Adj. to मुनिः । सूयते अस्मिन् इति सू + क्तिन् अधिकरणे (Chitrabhānu) = सूतिः, source.

असूतिः—Adj. to मुनिः । न सूतिः (नञ्तत्) । Here नञ् is विरोधार्थक । "अत्र सूतिविशेषणेन नञा तद्विरोधी प्रत्याय्यते" (Chitrabhānu); remover. नञ् is used in six different meanings "तत्-सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः" ॥ तत्सादृश्य– अब्राह्मणः ; अभाव—असुखम् ; तदन्यत्वम् —अघटः ; तदल्पता—अनुदरी ; अप्राशस्त्य—अकार्यम्, विरोध—असुरः ।

आपदाम्—कृद्योगे कर्मणि षष्ठी । Of evils. Chitrabhānu reads एनसाम् ।

ददृशे—दृश् + लिट् ए कर्मणि । Was seen.

जगतीभुजा—अनुक्ते कर्तरि तृतीया । जगतीं भुनक्ति पालयति इति उपपदसमासे जगती – भुज् + क्विप् कर्तरि = जगतीभुज्, तेन । Refers to Yudhiṣṭhira. गम् + क्विप् = जगत् ; शतृवद्भावात् "उगितश्च" इति ङीप् = जगती ।

मुनिः—उक्ते कर्मणि प्रथमा । The sage Vyāsa. "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते" ॥—गीता (२।५६)

सः—Adj. to मुनिः । According to Chitrabhānu here तत् is प्रक्रान्तप्रसिद्धानुभूतार्थकम् । See Extracts.

वपुष्मान्—Adj. to पुण्यसञ्चयः । वपुरस्यास्ति इति वपुस् + मतुप् = वपुष्मान् ।

पुण्यसञ्चयः—उपमान of मुनिः । पुण्यानां सञ्चयः (षष्ठीतत्) a store of religious merits. पुनाति इति पू + यत्, णुक् ह्रस्वश्च = पुण्यम् । सम् – चि + अच् भावे = सञ्चयः ।

Ch. of Voice—......लम्भयन्तं......बिभ्रतम्......उपगतम्......सूतिम् असूतिम् वपुष्मन्तमिव पुण्यसञ्चयम् मुनिम् जगतीभुक् ददर्श ।

Remark—The figure of speech in this verse is उत्प्रेक्षा (for def., see St. 10). Here the sage is imagined to be indentical with a store of religious merits. Again the figure व्यतिरेक (for def, see St. 43) is implied as the lustre of the sage has been represented as superior to fire—"प्रत्यात्मसमवेतानां सूक्ष्माणाम् अमूर्तानां दुरितानां दाहकमिदं तेजः,

वह्नितेजस्तु स्थूलानां मूर्तानाम् इन्धनादीनामिव दाहकतया दृष्टमिति व्यतिरेकः प्रतीयते" (चित्रभानुः)। According to Chitrabhānu the figure may be a व्यतिरेकोपमा also "इवशब्देन उपमा व्यज्यते उत्प्रेक्षा वा। परोक्षप्रमाणविषयादन्तरान्तरा दुरित-संहृतात् पुण्यान्तरात् प्रत्यक्षविषयत्वफलेन मूर्तिमत्त्वेन दुरितासंस्पर्शद्योतकेन निविडत्वेन च पुण्यविशेषस्य व्यतिरेको व्यज्यते। तादृशेन पुण्यसञ्चयेन मुनीन्द्रस्य साम्यमिवशब्दो द्योतयति तद्भावोत्प्रेक्षां वा इति व्यतिरेकोपमा व्यतिरेकोत्प्रेक्षा वा अयमलङ्कारः"—चित्रभानुः।

Yudhiṣṭhira rose from his seat.

अथोच्चकैरासनतः परार्ध्या-
दुद्यन् स धूतारुणवल्कलाग्रः।
रराज कीर्णाकपिशांशुजालः
शृङ्गात् सुमेरोरिव तिग्मरश्मिः॥ ५७॥

Prose—अथ उच्चकैः परार्ध्यात् आसनतः उद्यन् धूतारुणवल्कलाग्रः स (नृपः) कीर्णाकपिशांशुजालः सुमेरोः शृङ्गात् (उद्यन्) तिग्मरश्मिः इव रराज।

Beng.—অনন্তর রক্তবর্ণ বল্কলের অগ্রভাগ কম্পিত করিয়া তিনি (যুধিষ্ঠির) উৎকৃষ্ট উচ্চাসন হইতে গাত্রোত্থান করিলেন এবং আলোহিত কিরণজালবিস্তার করিয়া সুমেরু পর্ব্বতের শৃঙ্গ হইতে উত্থিত প্রভাকরের ন্যায় শোভা ধারণ করিলেন।

Eng. Equiv.—अथ - then. उच्चकैः—lofty. आसनतः—seat. परार्ध्यात्—excellent. उद्यन्—rising. स—he. धूतारुणवल्कलाग्रः—the ends of whose purple bark-garment were gently shaken. रराज—shone. कीर्णाकपिशांशुजालः—spreading his purple rays all around. शृङ्गात्—from the peak. सुमेरोः—of the Sumeru mountain. इव—like. तिग्मरश्मिः—sun.

Eng.—Then while rising from his lofty and excellent seat, the king, the ends of whose purple bark-garment were gently shaken, shone like the sun rising from the peak of the Sumeru mountain and spreading his purple rays all around.

Malli.—अथेति। अथ दर्शनानन्तरम्। उच्चकैः उन्नतात्, परार्ध्यात् श्रेष्ठात्। "अर्धाद्यत्", "परावराधमोत्तमपूर्वाच्च" इति यत्-प्रत्ययः। आसनतः सिंहासनात् उद्यन् उत्तिष्ठन् अत

एव धूतारुणवल्कलाग्र: धूतानि कम्पितानि अरुणानि वल्कलाग्राणि यस्य स तथोक्त:। स नृप: कीर्णाकपिशांशुजाल:, कीर्णं विसृतम् आकपिशम् अंशुजालं यस्य स तथोक्त:। सुमेरो: शृङ्गात् उद्यन् तिग्मरश्मिरिव रराज।

Extracts from other Commentaries—"......वृसीरूपादासनादिति वक्तव्ये परार्ध्यादासनत इत्युक्तम्। तेन द्वैपायनदर्शनजनितेन प्रमोदातिशयेन विस्मृतानुभूयमानवनवासो युधिष्ठिर: स्वराज्यस्थमेवात्मानं मन्यमानस्तदानीमेव आत्मन: सिंहासनादुत्थानमभ्यमन्यतेति द्योत्यते।...तदानीन्तनी युधिष्ठिरस्य दीप्तिर्विश्वाभ्युदयहेतुरिति द्योतयितुं दृष्टान्तमाह—सुमेरो: शृङ्गात् शीतरश्मिरिवेति।......युधिष्ठिरभावनारूढं हिरण्मयं सिंहासनमुपमेयत्वेन विवक्षितमिति तादृशं सुमेरुशृङ्गम् उपमात्वेन उपात्तम् इत्युपमानोपमेयवैषम्यदोषो न शङ्कनीय:। अथवा पावनत्वं सत्-सेव्यतादिगुणयोगित्वम् आसनस्य परार्ध्यत्वमभिप्रेतम्। सुमेरुशृङ्गं च तादृशगुणयोगेनैव आसनस्योपमानं स्यादित्युपमानोपमेययोर्न वैषम्यम्। न च उपमायां रूपकवत् अतिसादृश्यं विवक्ष्यते"—चित्रभानु:।

Notes—अथ—अव्यय ; denotes आनन्तर्यं : After the arrival of Vyāsa.

उच्चकै:—For derivation see St. 40 This word, as Chitrabhānu remarks, may be an adverb to उद्यन् or an adjective to स: or आसनत:—"उत्थानस्य उन्नतत्वं तात्कालिकं तदुत्तमाङ्गाभ्युन्नमनम्। युधिष्ठिरस्य तु मनस उन्नति:। आसनस्य संस्थानोच्छ्रय:"—Chitrabhānu.

आसनत:—अपादाने ५मी। आसनात् इति आसन+तस् = आसनत: ; from the seat. आस्यते अस्मिन् इति आस+ल्युट् अधिकरणे = आसनम्।

परार्ध्यात्—Adj. to आसनत:। पर: अर्ध: (कर्मधा) = परार्ध: (upper-half) परार्धे भव: इति परार्ध+यत् by the rule "अर्धाद् यत्" and "परावराधमोत्तमपूर्वाच्च"। परार्ध्य means "excellent" "magnificient"—"परार्ध्याग्र्यप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम्" इत्यमर:।

उद्यन्—Adj. to स:। उत्—इ+शतृ, १मा १वचन। Rising.

धूतारुणवल्कलाग्र:—Adj. to स:। वल्कलस्य अग्राणि (षष्ठीतत्) ; अरुणानि वल्कलाग्राणि (कर्मधारय) ; धूतानि अरुणवल्कलाग्राणि यस्य स: (बहुव्रीहि)—the tips of whose purple bark-garment were gently shaken. धू+क्त = धूत।

रराज—Nom. to स: and तिग्मरश्मि:। राज्+लिट् णल्। Shone.

कीर्णाकपिशांशुजाल:—Adj. to तिग्मरश्मि:। आ (ईषत्) कपिशानि (प्रादितत्) = आकपिशानि। अंशूनां जालानि (षष्ठीतत्); आकपिशानि अंशुजालानि (कर्मधा); कीर्णानि आकपिशांशुजालानि येन स: (बहुव्रीहि); spreading purple rays. कॄ + क्त कर्मणि = कीर्ण:। Chitrabhānu's reading is "कीर्ण: कपिशांशुजालै:"।

शृङ्गात्—अपादाने ५मी। From the peak.

सुमेरो:—शेषे षष्ठी; सुमेरु or मेरु is the name of a fabulous mountain which is situated in the centre of the earth and round which all the planets are said to revolve. It is also said to consist of gold and gems.

तिग्मरश्मि:—Nom. to रराज। तिग्मा: (sharp) रश्मय: यस्य स: (बहुव्रीहि)। The sun. तेजयति इति तिज + मक् (औणादिक), कवर्गश्चान्तादेश:। Chitrabhānu's reading is शीतरश्मि: (the moon).

Ch. of Voice—......उद्यता......धृताकणवल्कलाग्र्येण तेन कीर्णाकपिशांशुजालेन तिग्मरश्मिना इव रेजे।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here Yudhiṣṭhira is compared with the sun, the lustre of the bark-garment with the purple rays of the sun and the seat with Sumeru. In the last comparison one can find incongruity in the उपमान and उपमेय, because the comparison shows that he was seated on a throne of gold. But Yudhiṣṭhira living in the forest had no such seat (as is evident from Canto I, St. 38), his seat being made of Kuśa grass (बृसी). Chitrabhānu however ingenuously defends this flaw of Bhāravi by saying that this indicates the extreme joy of Yudhiṣṭhira on seeing Vyāsa whereby he forgot his forest-life and thought himself seated on the throne at his own capital. Another explanation given by him is that the poet here means by the excellence (परार्ध्यत्व) of seat' the 'purity of the seat'; hence there is no dissimilarity between the उपमान and उपमेय। See Extracts quoted above.

The king after worshipping Vyāsa took his seat being asked by the sage.

अवहितहृदयो विधाय सोऽर्हा-
मृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात्
प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ५८ ॥

Prose—सः अवहितहृदयः (सन्) ऋषिप्रवरे ऋषिवत् गुरूपदिष्टाम् अर्हां विधाय पश्चात् तदनुमतम् आसनम् प्रशमः श्रुतम् इव अलञ्चकार ।

Beng.—অনন্তর তিনি অবহিতমনে মুনিশ্রেষ্ঠ ব্যাসদেবকে শাস্ত্রানুসারে ঋষি-সমুচিত সংকার করিয়া পরিশেষে শান্তভাব যেরূপ শাস্ত্রজ্ঞানকে অলঙ্কৃত করে, সেইরূপ মুনিকর্ত্তৃক অনুজ্ঞাত হইয়া আসনকে অলঙ্কৃত করিলেন ।

Eng Equiv.—अवहितहृदयः –with an attentive mind. विधाय—having offered. सः—he. अर्हाम्—worship. ऋषिवत्—saintly. ऋषिप्रवरे—to him the saint of saints. गुरूपदिष्टाम—as instructed by his spiritual guide. तदनुमतम्—being asked by him (to occupy it). अलञ्चकार—adorned. पश्चात्—afterwards. प्रशमः—tranquility of minds. इव—as. श्रुतम—knowledge of the Vedas आसनं—seat नरेन्द्रः—monarch.

Eng.—Having offered with an attentive mind the saintly worship to him—the saint of saints, as instructed by his spiritual guide, the monarch adorned the seat, being asked (to occupy it) by him (the sage), as tranquility of mind does the knowledge of the Vedas.

Malli.—अवहितेति । स नरेन्द्रः अवहितहृदयः अप्रमत्तचित्तः सन् । "चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः । ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवत् ऋष्यर्हाम् । अर्हार्थे वतिप्रत्ययः । गुरूपदिष्टाम् शास्त्रीयामित्यर्थः । अर्हां पूजाम् । "गुरोश्च हलः" इति अकारप्रत्ययः । विधाय पश्चात् अनन्तरं तदनुमतं तेन अनुज्ञातम् आसनम्, प्रशमः शान्तिः श्रुतं शास्त्रश्रवणम् इव अलञ्चकार । उक्तञ्च पूर्वम्--"प्रशमस्य भवत्यलङ्क्रिया" इति । मुन्याज्ञया उपविष्टवान् इत्यर्थः ।

Extracts from other Commentaries—"......मुनिवराभ्यासनेनैव युधिष्ठिरस्य अभ्यासनेन मुनिवरोचितस्य विष्टरस्य शोभा जातेति द्योतयितुम् अलञ्चकार इत्युक्तम्,

न त्वध्यासितवान् इति।......श्रुतं प्रशम इवेति। यथा श्रुतस्य प्रशम एव भूषणं नान्यः पराक्रमो बलं वा, तथैव तस्य तापसविष्टरस्य युधिष्ठिर एव भूषणं, नान्यस्तापसो नरदेवो वेति भावः"—चित्रभानुः।

Notes—अवहितहृदयः—Adj. to नरेन्द्रः। अवहितं हृदयं यस्य सः (बहुव्रीहि); with an attentive mind. अव – धा + क्त कर्तरि = अवहितम्। The root अव-धा is used intransitively.

विधाय—वि – धा + ल्यप्; having offered.

सः—Adj. to नरेन्द्रः। अत्र तच्छब्दः प्रकाश्यार्थत्वात् यदुपादानं नापेक्षते।

अर्हाम्—Obj. to विधाय। अर्ह + अ भावे by the rule "गुरोश्च हलः"; स्त्रियां टापि अर्हा, worship.

ऋषिवत्—Adv. to विधाय। ऋषिम् अर्हति इति ऋषि + वति अर्हार्थे by the rule "तदर्हम्"। "क्रियाग्रहणं मण्डूकप्लुत्या अनुवर्तते। तेनेह न। राजानमर्हति छत्रम्" Bhaṭṭoji. Saintly. Chitrabhānu, however, analyzes the word thus—"ऋषिवत् ऋषिरिवेत्यर्थः। युधिष्ठिरस्य तदानीं तापसवृत्तित्वात् नरेन्द्रत्वस्य अनपायात् ऋषिसाम्यम् उक्तम् न तु ऋषित्वमेव। "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययः"।

ऋषिप्रवरे—अधिकरणविशेषे विषये सप्तमी। ऋषीणां (शेषे षष्ठी) प्रवरः (षष्ठीतत्); तस्मिन्। Saint of saints. प्रवरः means 'best'. प्रकृष्टो वरः (प्रादिसमासः)।

गुरूपदिष्टाम्—Adj. to अर्हाम्। गुरुणा उपदिष्टा (तृतीयातत्) ताम्। उप – दिश् + क्त कर्मणि। स्त्रियां टाप्। Instructed by his spiritual guide. Malli explains it as 'शास्त्रीयाम्'—'as prescribed in the Śāstras'—which he learnt from his Guru. Chitrabhānu explains it as "गुरुणा पुरोहितेन उपदिष्टाम्"।

तदनुमतम्—Adj. to आसनम्। तेन अनुमतम् (तृतीयातत्) = तदनुमतम् "उपवेश्यत्वेन उक्तम् इत्यर्थः" (चित्रभानुः)। Being asked by him to occupy. अनु – मन् + क्त कर्मणि (भूते) = अनुमतम्। If it is derived as वर्तमाने क्त by the rule "मतिबुद्धिपूजार्थेभ्यश्च", then it can not enter into compound with तत् by the rule "क्तेन च पूजायाम्"।

अलञ्चकार—Nom. नृपेन्द्रः। अलम् – कृ + लिट् णल्। Adorned. अलं is used in the sense of भूषण। "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्"।

पश्चात्—अव्यय। Afterwards. "अवरस्मिन्"। "पश्चात्" इत्यनेन अवरस्य सप्तमी-पञ्चमी-प्रथमान्तस्य निपातितः"—Bhānuji.

प्रशमः—उपमान of नरेन्द्रः। For derivation, see St. 32. Tranquility of mind.

श्रुतम्—Obj. of अलञ्चकार। For derivation, see St. 32. Vedas.

आसनम्—Obj to अलञ्चकार। For derivation, see St. 57. Seat.

नरेन्द्रः—Nom. to अलञ्चकार। नराणां or नरेषु इन्द्रः (इन्द्र इव) (षष्ठीतत् or सुप्सुपेति) = नरेन्द्रः monarch. Yudhiṣṭhira.

Ch. of Voice—अवहितहृदयेन......अलञ्चक्रे .... प्रशमेन......नरेन्द्रेण तेन।

Remark—The figure of speech in this verse is उपमा (for def., see St. 3). Here Yudhiṣṭhira is compared with प्रशमः and आसन with श्रुत। This उपमा, however, suffers from the defect known as कालभेद (diversity in tense) of the older rhetoricians. Mammaṭa includes this defect in भग्नप्रक्रमता। Here the verb अलञ्चकार is in the past tense. It may apply to उपमेय (i. e., नरेन्द्रः) but as applying to the उपमान (i. e., प्रशम) it should be in the present tense, because tranquility still adorns knowledge. This diversity in tense mars the clear comprehension of उपमा and thus constitutes this defect. See Kāvyaprakāśa, X. 589.

Sitting before the sage Vyāsa, Yudhiṣṭhira looked like the Moon by the side of Jupiter.

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन् मुनेरभिमुखं स विकीर्णधाम्नः।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः॥ ५८॥

॥ इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये द्वितीयः सर्गः॥

Prose—व्यक्तोदितस्मितमयूखविभासितोष्ठः विकीर्णधाम्नः मुनेः अभिमुखं तिष्ठन् स इद्धम् अंशुजालं तन्वन्तं गुरुम् अभितः (तिष्ठतः) सकलस्य शशाङ्कमूर्तेः लक्ष्मीम् उवाह।

Beng.—सुव्यक्त हास्येर द्वारा ওষ্ঠপুট উদ্ভাসিত করিয়া যখন তিনি (যুধিষ্ঠির)

মুনির সম্মুখে উপবিষ্ট হইলেন, তখন বৃহস্পতির সম্মুখে দীপ্ত-কিরণজাল-বিস্তারকারী অখণ্ড চন্দ্রমণ্ডলের ন্যায় তাঁহার অপূর্ব্ব শোভা হইল।

Eng. Equiv.—व्यक्तोदितस्मितमयूखविभासितोष्ठः—with his lips illumined by the clearly shining rays of his smile. तिष्ठन्—seated. मुनेः—of the sage. अभिमुखम्—in front of. सः—he. विकीर्णधाम्नः—whose lustre was diffused all around. तन्वन्तम्—spreading. इद्धम्—brilliant. अभितः—by the side of. गुरुम्—Jupiter. अंशुजालम्—flood of rays. लक्ष्मीम्—beauty. उवाह—bore. सकलस्य—full. शशाङ्कमूर्तेः—of the moon.

Eng.—He, with his lips illumined by the clearly shining rays of his smile and seated in front of the sage whose lustre was diffused all around, bore the beauty of a full Moon by the side of Jupiter, spreading around his brilliant flood of rays.

Malli.—व्यक्तेति—व्यक्तोदितस्मितमयूखविभासितोष्ठः, व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखैः विभासितौ ओष्ठौ यस्य स तथोक्तः। विकीर्णधाम्नः विस्तृततेजसः मुनेः अभिमुखं तिष्ठन् सः नृपः इद्धं समृद्धं दीप्तमिति यावत्। अंशुजालं तन्वन्तं गुरुं गीष्पतिम्। "गुरुर्गीष्पतिपित्राद्यौ" इत्यमरः। "अभितः-परितः—" इत्यादिना द्वितीया। अभितः अभिमुखं तिष्ठत इति शेषः। सकलस्य सम्पूर्णस्य शशाङ्कमूर्तेः शशाङ्का मूर्त्तिः यस्य तस्य इन्दोः लक्ष्मीमुवाह, वहति स्म। अत्र उपमेयस्य राज्ञः उपमानेन्दुधर्मेण लक्ष्म्याः साक्षात् सम्बन्धासम्भवात् तत्सदृशीं लक्ष्मीमिवेति प्रतिबिम्बकरणाक्षेपात् असम्भवद्वस्तुसम्बन्धात् पदार्थवृत्तिः निदर्शनालङ्कारः। तदुक्तम्—"प्रतिबिम्बस्याकरणं सम्भवता यत्र वस्तुयोगेन। तत्सामान्यमसम्भवता निदर्शना सा द्विधाभिमता" ॥ इति।

॥ इति श्रीमहामहोपाध्याय-कोलाचल-मल्लिनाथ-सूरिविरचितायां किरातार्जुनीय-महाकाव्य-व्याख्यायां घण्टापथसमाख्यायां व्यासागमनो नाम द्वितीयः सर्गः ॥

Extracts from other Commentaries—"......यथा चन्द्रस्य निखिलदृश्यायां बाह्यायां मण्डलरूपायां मूर्ताविव अपचयमालिन्यादयो दोषाः प्रतीयन्ते, न तु नित्यनिर्मले नित्यपरिपूर्णे अभ्यन्तरे मण्डले, तथैव युधिष्ठिरस्य बाह्यायां मूर्ताविव वनवासकृताः कार्श्यमालिन्यादयो दोषाः प्रतीताः न त्वभ्यन्तरे हृदय इति द्योतयितुं मृगाङ्कमूर्तेरित्युक्तं न मृगाङ्कलाञ्छनस्येति। ......इद्धमंशुजालं तन्वन्तमिति।......तेन शरद्वसन्तयोरन्यतरस्मिन् ऋताविति प्रतीयते"—चित्रभानुः।

Notes—व्यक्तोदितस्मितमयूखविभासितौष्ठः—Adj. to सः। व्यक्तम् उदिताः (सुप्सुपेति); स्मितस्य मयूखाः (षष्ठीतत्); व्यक्तोदिताश्च स्मितमयूखाश्च (कर्मधारय); व्यक्तोदितस्मितमयूखैः विभासितौ ओष्ठौ यस्य सः (बहुव्रीहि)। With his lips illumined by the clearly shining rays of his smile. Alt. form......विभासितौष्ठः by the Vārttika "ओत्वोष्ठयोः समासे वा"—which means that पररूप is optional when ओतु (cat) and ओष्ठः (lip) are the final of a compound. वि—अञ्ज् + क्त कर्तरि = व्यक्तम् clearly. उत्—इ + क्त कर्तरि—उदितः। स्मि + नपुंसके भावे क्त = स्मितम्, smile (हर्षहेतुकः अनुल्वणोल्लासः). स्मित is one of the six varities of laughter—"ईषद्विकसि नयनं स्मितं स्यात् स्पन्दिताधरम्। किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः॥ मधुरस्वरं विहसितम्, सांसशिरःकम्पमवहसितम्। अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्"॥ (साहित्यदर्पण III. 200). (Remember in this connection the Bengali proverb—"आहाम्मके तिन वार हासे")। वि—भास् + णिच् + क्त कर्मणि = विभासित—illumined. ओष्ठौ—the upper and the lower lips.

तिष्ठन्—Adj. to सः। स्था + शतृ, १मा १वचन। Seated. "गतिनिवृत्त्यर्थतया पठितस्तिष्ठतिः अत्र उपवेशनरूपायां गतिनिवृत्तौ वर्तते" (चित्रभानुः)।

मुनेः—शेषे षष्ठी। Of the sage Vyāsa.

अभिमुखम्—Adv. modifying तिष्ठन्। अभिगतं मुखमस्य तद् यथा स्यात् तथा (बहुव्रीहि)। In front.

सः - Nom. to उवाच। Refers to Yudhiṣṭhira.

विकीर्णधाम्नः—Adj. to मुनेः। विकीर्णं धाम यस्य तस्य (बहुव्रीहि)। Whose lustre was diffused all around. वि—कॄ + क्त कर्मणि = विकीर्णम्।

तन्वत्—Adj. to गुरुम्। तन् + शतृ, २या १वचन। Spreading.

इद्धम्—Adj. to अंशुजालम्। इन्ध् + क्त कर्तरि = इद्धम्, brilliant

अभितः—अव्यय: Adv. to तिष्ठतः understood. अभि + तसिल्। "गुरुमभितः बृहस्पतेः पुरस्तादित्यर्थः" (चित्रभानुः)—in front of, by the side of.

गुरुम्—द्वितीया in connection with the word अभितः by the Vārttika "अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि"। "षष्ठ्यर्थे द्वितीया"—चित्रभानुः। गुरु is planet Jupiter.

अंशुजालम्—Obj. to तन्वन्तम्। अंशूनां जालम् (षष्ठीतत्); flood of rays.

लक्ष्मीम्—Obj. to उवाह। For derivation, see, St. 19. Beauty.

उवाह—Nom. सः। वह् + लिट् णल्। Bore.

सकलस्य – Adj. to शशाङ्कमूर्तेः। कलाभिः (digits) सह वर्तमानः (बहुव्रीहि) तस्य; full.

शशाङ्कमूर्तेः—शेषे षष्ठी। शशः अङ्कः यस्याः सा (बहुव्रीहि) = शशाङ्का, marked by hare. शशाङ्का मूर्तिः यस्य सः (बहुव्रीहि) तस्य, moon. मूर्छ् + क्तिन् = मूर्तिः body. Chitrabhānu reads the word as मृगाङ्कमूर्तेः। The moon spot supposed to be a hare (शश) or a deer (मृग)।

Ch of Voice—व्यक्तोदितमयूखविभसितोष्टेन तिष्ठता......तेन......लक्ष्मीः ऊहे।

Remark—The figure of speech in this verse is निदर्शना which is thus defined—"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना"॥ (साहित्यदर्पण X. 70)—when the relation between two objects, possible or impossible implies similarity between them, the figure is called निदर्शना। निदर्शना is therefore of two kinds—(1) where the relation is possible, and (2) where it is not. Here there is असम्भवद्वस्तु पदार्थ-निदर्शना, because there is no relation between the two पदार्थs—the beauty of the moon and the beauty of the king; yet it has been said that the king bears the beauty of the moon. The sentence, therefore, means that the king bears a certain beauty like the beauty of the moon. The relation, therefore, being impossible, (असम्भवत्) implies similarity (बिम्बानुबिम्बत्व)।

N. B. Both निदर्शना and दृष्टान्त are based on बिम्बप्रतिबिम्बभाव; but in निदर्शना the बिम्बप्रतिबिम्बभाव is expressed by one sentence, while is दृष्टान्त it is expressed by two sentences. Also see our notes on दृष्टान्त in St 36.

Notes on the Colophon of Canto II

"Here ends the Second Canto of the celebrated great Epic Kirātārjunīya composed by the blessed great poet Bhāravi"—thus runs the Colophon.

[For details, see notes on Colophon, Canto I, Kirāta, by A. Śāstrī].

व्यासागमनः—Adj. to सर्गः। व्यासस्य आगमनं यस्मिन् (बहुव्रीहि) सः। Where there is the (description of the) return of Vyāsa.

द्वितीयः—Adj. to सर्गः। Second. द्वि + तीय पूरणे।

सर्गः—Canto. सृज् + घञ् भावे। "सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु"—इत्यमरः। प्रातिपदिकार्थे प्रथमा। "समाप्तः इति शेषः" इति मल्लिनाथः। The term सर्गः indicating the Chapter of Epic, signifies that that the work is based on the imaginative insight of the Poet.

Mallinātha's Commentary is called 'Ghaṇṭāpatha'.

"घण्टापथः संसरणम्"—अमरः। घण्टोपलक्षितः पन्थाः, शाकपार्थिववदुत्तरपदलोपी समासः। यद्वा, घण्टानां पन्थाः (षष्ठीतत्)। "घण्टाग्रहणं वादित्राणां तद्वतां हस्त्यादीनाञ्चोपलक्षणम्"—भानुजिः। "ऋक्पूरब्धूःपथामानक्षे" इति समासान्त अः। "दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः"—चाणक्यः।

॥ कलिं शमयते ॥

APPENDIX A

Metre

[For General Notes on Metre, Vide Appendix B, Kirāta Canto I, A. Śāstrī].

In Canto II of Kirāta, four kinds of metres are found to regulate the stanzas. They are वियोगिनी (or सुन्दरी), उपजाति, पुष्पिताग्रा and वसन्ततिलकम् । (1) वियोगिनी (also called सुन्दरी) is an अर्धसमवृत्त containing 10 syllables each in the first and the third feet and 11 syllables in the second and the fourth feet. The definition is—"अयुजो यदि सौ जगौ युजो: सभरा ल्गौ यदि सुन्दरी तदा", "सभराल्गोऽथ गुरुर्वियोगिनी" इति च लक्षणात् । The scansion is thus :—

स	स	ज	ग
⏑ ⏑ —	⏑ ⏑ —	⏑ — ⏑	—
वि हि तां	प्रि य या	म न: प्रि	याम्

स	भ	र	ल	ग
⏑ ⏑ —	— ⏑ ⏑	— ⏑ —	⏑	—
अ थ नि	श्चि न्व गि	रं ग री	य	सीम्

The other two lines follow the same arrangemet. Stanzas 1-56 in Canto II are written in this metre.

(2) उपजाति is a mixture of उपेन्द्रवज्रा and इन्द्रवज्रा. It is a समवृत्त containg 11 syllables in each foot. As to the mixture, however, there is no fixed ruling. उपेन्द्रवज्रा is defined as "उपेन्द्रवज्रा जतजास्ततो गौ (प्रथमे लघौ सा)" ; the definition of इन्द्रवज्रा is "स्यादिन्द्रवज्रा यदि तौ जगौ ग:" । The scansion is thus :—

ज	त	ज	ग	ग	
⏑ — ⏑	— — ⏑	⏑ — ⏑	—	—	(उपेन्द्रवज्रा)
अ थो च्च	कै रा स	न त: प	रा	र्ध्यात्	

त त ज ग ग

— — ⏑ — — ⏑ ⏑ — ⏑ — — (इन्द्रवज्रा)

उ ग्रन् स धू ता रु णा व ल्क ला ग्र:

The last two lines follow the same arrangement. Stanza 57 is written in this metre.

(3) The metre पुष्पिताग्रा is defined as—"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा"—which means that in the odd lines i. e., in the 1st and the 3rd lines, the scansion will be न न र य ; and in the even lines i. e., in the 2nd and the 4th lines the scansion will be न ज ज र ग. The scansion of the whole stanza is :—

न न र य

⏑ ⏑ ⏑ ⏑ ⏑ ⏑ — ⏑ — ⏑ — —

अ व हि त ह द यो वि धा य सोऽ ढाम्

—1st and 3rd lines.

न ज ज र ग

⏑ ⏑ ⏑ ⏑ — ⏑ ⏑ — ⏑ — ⏑ — —

ऋ षि व द्द षि प्र व रे गु रू प दि ष्टाम्

—2nd and 4th lines.

Thus it is an अर्धसमवृत्त (i. e., a class of metre with uneven पादs) in which the 1st and the 3rd lines contain 12 syllables each, while the 2nd and the 4th lines contain 13 syllables each. Stanza 58 is written in this metre.

(4) वसन्ततिलकम् (का) is a समवृत्त containing 14 syllables in each foot. The definition of वसन्ततिलक is "ज्ञेयं वसन्ततिलकं तभजा जगौ ग:" ।

त भ ज ज ग ग

— — ⏑ — ⏑ ⏑ ⏑ — ⏑ ⏑ — ⏑ — —

व्य क्री ढि त श्चि त म यू ख वि भा सि तो ष्ठ:

The other three lines also will follow the same arrangement. Stanza 59 is written in this metre.

Explanation of the mnemonic syllables :—

म = — — —, न = ⏑ ⏑ ⏑, भ = — ⏑ ⏑, य = ⏑ — —,
ज = ⏑ — ⏑, र = — ⏑ —, स = ⏑ ⏑ —, त = — — ⏑

ल (लघु) is denoted by (⏑) and ग (गुरु) is by (—).

APPENDIX B

श्रीमहाभारते वनपर्वणि युधिष्ठिर-भीमसेन-संवादः

याज्ञसेन्या वचः श्रुत्वा भीमसेनो ह्यमर्षणः । निश्वसन्नुपसङ्गम्य क्रुद्धो राजानमब्रवीत् ॥
राज्यस्य पदवीं धर्म्यां व्रज सत्पुरुषोचिताम् । धर्मकामार्थहीनानां किं नो वस्तुं तपोवने ॥
नैव धर्मेण तद्राज्यं नार्जवेन न चौजसा । अक्षकूटमधिष्ठाय हृतं दुर्योधनेन वै ॥

... ...

धर्मलेशप्रतिच्छन्नः प्रभवं धर्मकामयोः । अर्थमुत्सृज्य किं राजन् दुःखेषु परितप्यसे ॥
भवतोऽनवधानेन राज्यं नः पश्यतां हृतम् । अहार्यमपि शक्रेण गुप्तं गाण्डीवधन्वना ॥

... ...

भवतः प्रियमित्येवं महद्व्यसनमीदृशम् । धर्मकामे प्रतीतस्य प्रतिपन्नाः स्म भारत ॥
कर्षयामः स्वमित्राणि नन्दयामश्च शात्रवान् । आत्मानं भवतां शास्त्रैर्नियम्य भरतर्षभ ॥
यद्वयं न तदैवैतान् धार्तराष्ट्रान्निहन्महि,। भवतः शास्त्रमादाय तन्नस्तपति दुष्कृतम् ॥
अथैनामन्ववेक्षस्व मृगचर्यामिवात्मनः । दुर्बलाचरितां राजन्नबलस्थैर्निषेविताम् ॥
यां न कृष्णो न बीभत्सुर्नाभिमन्युर्न सृञ्जयाः । न चाहमभिनन्दामि न च माद्रीसुतावुभौ ॥
भवान् धर्मो धर्म इति सततं व्रतकर्षितः । कच्चिद्राजन्न निर्वेदादापन्नः क्लीबजीविकाम् ॥

... ...

सर्वथा कार्यमेतन्नः स्वधर्ममनुतिष्ठताम् । काङ्क्षतां विपुलां कीर्तिं वैरं प्रतिचिकीर्षताम् ॥
आत्मार्थं युध्यमानानां विदिते कृत्यलक्षणे । अन्यैरपि हृते राज्ये प्रशंसैव न गर्हणा ॥

कर्षणार्थो हि यो धर्मो मित्राणामात्मनस्तथा । व्यसनं नाम तद्राजन् न स धर्मः कुधर्मतत् ॥

... ...

भैक्षचर्या न विहिता न च विट्शूद्रजीविका । क्षत्रियस्य विशेषेण धर्मस्तु बलमौरसम् ॥

स्वधर्मं प्रतिपद्यस्व जहि शत्रून् समागतान् । धार्तराष्ट्रबलं पार्थ मया पार्थेन नाशय ॥

... ...

स भवान् रथमास्थाय सर्वोपकरणान्वितम् । त्वरमाणोऽभिनिर्यातु विप्रेभ्योऽर्थविभावकः ॥

अमित्रांस्तेजसा मृद्नन्नसुरानिव वृत्रहा । श्रियमादत्स्व कौन्तेय धार्तराष्ट्रान्महाबल ॥

न हि गाण्डीवमुक्तानां शराणां गार्ध्रवाससाम् । स्पर्शमाशीविषाभानां मर्त्यः कश्चन संसहेत् ॥

न स वीरो न मातङ्गो न च सोऽश्वोऽस्ति भारत । यः सहेत गदावेगं मम क्रुद्धस्य संयुगे ॥

... ...

शत्रुहस्तगतां राजन् कथं स्विन्नाहरेर्महीम् । इह यत्नमुपाहृत्य बलेन महतान्वितः ॥ (३३ अः)

स एवमुक्तस्तु महानुभावः सत्यव्रतो भीमसेनेन राजा ।

अजातशत्रुस्तदनन्तरं वै धैर्यान्वितो वाक्यमिदं बभाषे ॥

युधिष्ठिर उवाच—

असंशयं भारत सत्यमेतद् यन्मां तुदन् वाक्यशल्यैः क्षिणोषि ।

न त्वां विगर्हे प्रतिकूलमेव ममानयाद्धि व्यसनं व आगात् ॥

अहं ह्यधानन्वपद्यं जिहीर्षन् राज्यं सराष्ट्रं धृतराष्ट्रस्य पुत्रात ।

तन्मां शठः कितवः प्रत्यदेवीत् सुयोधनार्थं सुबलस्य पुत्रः ॥

... ...

यन्तुं नात्मा शक्यते पौरुषेण मानेन वीर्येण च तात नद्धः ।

न ते वाचो भीमसेनाभ्यसूये मन्ये तथा तद्भवितव्यमासीत् ॥

स नो राजा धृतराष्ट्रस्य पुत्रो न्यपातयद्व्यसने राज्यमिच्छन् ।

दास्यञ्च नोऽगमयद्भीमसेन यत्राभवच्छरणं द्रौपदी नः ॥

त्वञ्चापि तद्वेत्थ धनञ्जयश्च पुनर्द्यूतायागतानां सभां नः ।

यन्माब्रवीद्धृतराष्ट्रस्य पुत्र एकग्लहार्थं भरतानां समक्षम् ॥

प्रागेव चैवं समयक्रियायाः किं नाब्रवीः पौरुषमाविदानः ।
प्राप्तन्तु कालं त्वभिपद्य पश्चात् किं मामिदानीमतिवेलमात्थ ॥

... ...

न त्वद्य शक्यं भरतप्रवीर कृत्वा यदुक्तं कुरुवीरमध्ये ।
कालं प्रतीक्षस्व सुखोदयस्य पक्तिं फलानामिव बीजवापः ॥

... .

मम प्रतिज्ञाञ्च निबोध सत्यां वृणे धर्मममृताज्जीविताच्च ।
राज्यञ्च पुत्राश्च यशो धनञ्च सर्वं न सत्यस्य कलामुपैति ॥ (३४ अः)

भीमसेन उवाच—

प्रत्यक्षं मन्यसे कालं मर्त्यः सन् कालबन्धनः । फेनधर्मा महाराज फलधर्मा तथैव च ॥
निमेषादपि कौन्तेय यस्यायुरपचीयते । सूच्येवाञ्जनचूर्णस्य किमिति प्रतिपालयेत् ? ॥

.. ..

शरीरिणां हि मरणं शरीरे नित्यमाश्रितम् । प्रागेव मरणात् तस्माद्राज्यायैव घटामहे ॥
यो न याति प्रसंख्यानमस्पष्टो भूमिवर्धनः । अयातयित्वा वैराणि सोऽवसीदति गौरिव ॥
यो न यातयते वैरमल्पसत्त्वोद्यमः पुमान् । अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः ॥

... ...

नातः पापीयसीं काचिदापदं राजन् भविष्यति । यन्नो नीचैरल्पबलै राज्यमाच्छिद्य भज्यते ॥

. ...

श्रोत्रियस्येव ते राजन् मन्दकस्याविपश्चितः । अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥
घृणी ब्राह्मणरूपोऽसि कथं क्षत्रेषु जायथाः । अस्यां हि योनौ जायन्ते प्रायशः क्रूरबुद्धयः ॥
अश्रौषीस्त्वं राजधर्मान् यथा वै मनुरब्रवीत् । क्रूरान्निकृतिसम्पन्नान् विहितानशमात्मकान् ॥
धार्तराष्ट्रान्महाराज क्षमसे किं दुरात्मनः । कर्तव्ये पुरुषव्याघ्र किमास्से पीठसर्पवत् ॥

... ...

तस्माच्छत्रुवधे राजन् क्रियतां निश्चयस्त्वया । क्षत्रियस्य हि सर्वस्य नान्यो धर्मोऽस्ति संयुगात् ॥
(३५ अः

भीमसेनवचः श्रुत्वा कुन्तीपुत्रो युधिष्ठिरः । निश्वस्य पुरुषव्याघ्र संप्रदध्यौ परन्तपः ॥

श्रुता मे राजधर्माश्च वर्णानाञ्च विनिश्चयाः। आयत्याञ्च तदात्वे च यः पश्यति स पश्यति॥
धर्मस्य जानमानोऽहं गतिमग्र्यां सुदुर्विदाम्। कथं बलात् करिष्यामि मेरोरिव विमर्दनम्॥

... ...

महापापानि कर्माणि यानि केवलसाहसात्। आरभ्यन्ते भीमसेन व्यथन्ते तानि भारत॥
सुमन्त्रिते सुविक्रान्ते सुकृते सुविचारिते। सिद्ध्यन्त्यर्था महाबाहो दैवञ्चात्र प्रदक्षिणम्॥
यत् तु केवलचापल्याद्बलदर्पोत्थितः स्वयम्। आरब्धव्यमिदं कार्यं मन्यसे शृणु तत्र मे॥

... ...

राजानः पार्थिवाश्चैव येऽस्माभिरुपतापिताः। संश्रिताः कौरवं पक्षं जातस्नेहाश्च तं प्रति॥
दुर्योधनहिते युक्ता न तथास्मासु भारत। पूर्णकोषा बलोपेताः प्रयतिष्यन्ति सङ्गरे॥

... .

समा यद्यपि भीष्मस्य वृत्तिरस्मासु तेषु च। द्रोणस्य च महाबाहो कृपस्य च महात्मनः॥
अवश्यं राजपिण्डस्तैर्निर्वेश्य इति मे मतिः॥

... ...

अनिर्जित्य रणे सर्वानेतान् पुरुषसत्तमान्। अशक्यो ह्यसहायेन हन्तुं दुर्योधनस्त्वया॥

... ...

एतद्वचनमाज्ञाय भीमसेनोऽत्यमर्षणः। बभूव विमनास्त्रस्तो न चैवोवाच किञ्चन॥
तयोः संवदतोरेवं तदा पाण्डवयोर्द्वयोः। आजगाम महायोगी व्यासः सत्यवतीसुतः॥
सोऽभिगम्य यथान्यायं पाण्डवैः प्रतिपूजितः॥ युधिष्ठिरमिदं वाक्यमुवाच वदतां वरः॥

(३६ अः)

APPENDIX C

Synopsis of Canto II

Verse No. *Subject-matter*

1. After the speech of Draupadī, Bhīmasena begins to support her.
2. According to him—Draupadī's speech is prompted by her affection for her husbands and at the same time is unique.
3. The science of politics can be understood by deep study, but very rare is the unerring leader.
4. Draupadī's speech—brief, but efficacious.
5. May this speech be acceptable to Yudhiṣṭhira—an appreciator of merits.
6. Bhīma is sorry to find that Yudhiṣṭhira's discriminating mind is sinking into thoughtlessness.
7. The decline of his prowess also is equally lamentable.
8. A true politician carefully considers the rise and decline of his foes.
9. He waits only when the fall of his foes is imminent, and his own success sure.
10. Fortune forsakes the king who neglects the rise of his foes.
11. People respect a rising king—though devoid of former glory.
12. Policy plus energy—real source of treasure and power.
13. Personal valour - mainstay of man having self respect.
14. A feeble man has no future or respect.
15. Fortune favours the brave
16. If Yudhiṣṭhira waits for the expiry of the stipulated period of exile he will be a fool.
17. Kingdom obtained as a gift from the enemy,—is an insult to the valour of the hero.
18. A spirited man gains prosperity by his own might and does not seek it as a favour.
19. To the ambitious, wealth is a secondary consideration.
20. Men of self-respect rather part with their lives than with their spirit.
21. The mighty never brooks the superiority of another.

22-24. Bhīma thus exhorts Yudhiṣṭhira—'Rise up and show your valour. The ruin of the foes is delayed by your inaction. Your brothers are really invincible. May the fire of your anger be extinguished by the tears of the wives of your enemies'.
25. Yudhiṣṭhira begins to pacify Bhīma.
26. Bhīma's speech reflects his clear mind.
27-28. Bhīma's words have all the requisites of a good speech—which is at once spirited and inimitable.
29. But even such a speech cannot remove the doubts of Yudhiṣṭhira's mind.
30. Rashness and want of discrimination - source of all misfortunes.
31. Duty, coupled with prudence, brings sure success.
32. Thoughtfulness is the ornament of valour tranquility—knowledge.
33. Scriptural knowledge—beacon to the wise.
34. To those who follow the great, downfall is equal to rise.
35. Those who desire to conquer their enemies first should overcome wrath and join their valour to favourable means.
36. Bhīma should conquer wrath, if he wishes to rise.
37. Even a powerful king loses all, if he fails to control his anger.
38. The true monarch assumes mildness or severity as occasions demand
39. Fortune eludes those who are slaves of passions.
40. Bhīma should not show untimely mental agitation.
41. Fortune forsakes even the wise, if they do not check their passions.
42. Bhīma should not allow anger to rob him of success
43. Forgiveness is the best means of success.
44. The Yādavas will not submit to Duryodhana and desert us who are submissive to them.
45. The Yādavas now follow Duryodhana only to gain their ends.
46. A timely attack will alienate them from Duryodhana.
47. Kings, insulted by Duryodhana, will side with us.
48. The prosperity of the arrogant only heightens their insolence.
49. Pride causes imprudence which creates unpopularity.
50. Even a mighty enemy is uprooted by a patient man.
51. Internal revolution surely destroys a king.
52. The prosperity of the arrogant and the impudent ends in distress. A wise man waits for the proper time.

53. A neighbour king subjugates another king whose subjects are dissatisfied.

54. Vy sa suddenly appears before the Pāṇḍavas.

55-56. Yudhiṣṭhira looks upon the great sage, shining with ascetic splendour, in utter astonishment.

57. Yudhiṣṭhira rises from his seat in deep veneration for the sage.

58. After honouring the sage, the king is permitted to resume his seat

59. Yudhiṣṭhira sits down before Vyāsa to receive his instructions—like the Moon beside Jupiter.

Model Questions and Answers

1. Summarize the speech of Bhīma. (Vide, Introduction).
2. Summarize the speech of Yudhiṣṭhira. (Vide, Introduction).
3. Describe briefly how a clever politician should deal with a rising foe (vide, Headnotes and Explanations verses 8—11).
4. What are the requisites of a good speech (Vide, Explanations, verses 26—28).
5. Describe in detail the flaws caused by anger (vide, Explanations and Headnotes, verses 35—41).
6. Describe the disadvantages of imprudence and arrogance (vide, Explanations, verses 48—53).
7. Translate into English :—

Verses Nos. 2, 3, 4, 5, 6, 7, 8, 9, 10, 11, 12, 13, 14, 18, 19, 20, 21, 24, 26, 27, 28, 30, 31, 32, 33, 34, 35, 36, 37, 38, 39, 40, 41, 42, 43, 46, 47, 50, 51, 53, 55. 58.

8. *Explain :*—Verses Nos 2, 3, 4, 6, 8, 9, 10, 11, 12, 17, 18, 19, 20, 21, 24, 26, 27, 28, 30, 31, 32, 33, 34, 35, 36, 37, 33, 39, 40, 41, 41, 42, 43, 46, 49, 49, 52, 53.

9. Write grammatical notes on the difficult expression in the following verses :—1, 2, 4, 9, 9, 10, 11, 12, 14, 17, 18, 19, 24, 25, 27, 28, 30, 31, 32, 35, 37, 39, 40, 41, 42, 43, 46, 47, 50, 51. 52, 53, 57, 59.

10. Clear the Allusion in verse 59.

BIBLIOGRAPHY

Amarakoṣa (with Bhānuji Dīkṣita's Commentary).
Bhagavadgītā (Ch. XI.—A. S'āstrī).
Bhaṭṭikāvya Canto I.—A. Śāstrī).
Chandomañjarī
Gaṇadarpaṇa (Ed by R. S'iromaṇi. Cal. 1283—B. S.)
A Guide to Sanskrit Composition—Apte.
Higher Sanskrit Grammer—U N. Vidyābhūṣaṇa.
History of Sanskrit Literature --A. B Keith.
Kālasiddhāntadarśinī—MM. Haran Chandra Śāstrī.
Kāśikā (Benares Edition).
Kāvyādarśa —(with the com. of P. Tarkavāgīśa—Royal Asiatic Society, 18 3).
Kāvyaprakāśa (Jhalakiker's Edition).
" (Calcutta Sanskrit Series—with Dr. A. Thakur's Introduction).
Kāvyālaṅkāra-Sūtra—(Nirṇayasāgara edition—1926, Bombay).
Kirātārjunīya (Cantos I-III —M. R. Kāle).
" —(Cantos I-X —Mr. Pangarkar, English translation only. The English translation has been adopted with profit mainly from this book).
" —(with Beng Translation—R. M. Bose & Co. Cal. 1715 saka)
" —Jīvānanda Vidyāsāgara's Edition.
" —(with the com. of Chitrabhānu. ed. by T. Gaṇapati Śāstrī. Trivandrum - 1918).
Laghuśabdenduśekhara—(Benares Edition, 1881).
Mahābh rata —(Baṅgabāsī Edition).
Mudrārākṣasa—(ed. by B. Goswāmi)
Manusaṃhitā—(Jīvānanda Vidyāsāgara's Edition).
" —(Ch. I.—A. Śāstrī).
Padamañjarī—(Benares Edition—Reprint from the Pandit—1895).
Practical Sanskrit English Dictionary—V. S. Apte.
Paudhamanoramā—(Chowkhamba Sanskrit Series, Benares, 1936)
Raghuvaṃśa—(Cantos V, VI A. Śāstrī).
Rasagaṅgādhara—(Nirṇayasāgara Edition).
Śākuntalam—(A B. Gajendragadkar's Edition).
Sāhityadarpaṇa—(Gurunātha Vidyānidhi's Edition).
Śiśupālavadham—(Ed. Jīvānanda Vidyāsāgara).
Siddhāntakaumudī—(with Tattabodhinī) .
Subhāṣitaratnabhāṇḍāgāra—(Nirṇayasāgara Edition).
Siddhāntamuktāvalī of Bhāṣāparichheda.
Vācaspatya—T. N. Tarkavācaspati.